(उत्तरार्धम्)

सप्तमं सोपानम्

धातारं सृष्टिकर्तारं मयं वास्तुकलाविदम्।
आराध्यं शिल्पिवर्गस्य विश्वकर्माणमाभजे ।।

विश्वकर्मा चतुर्बाहुरक्षमालां च पुस्तकम् ।
कंबुकमण्डलुं घत्ते त्रिनेत्रो हंसवाहनः ।।

कंबासूत्रांवुपात्रंवहतिकरतलेपुस्तकंज्ञानसूत्रं
हंसारूढस्त्रिनेत्रःशुभमुकुटशिराः सर्वतोवृद्धकायः।
त्रैलोक्यंयेनसृष्टंसकलसुरगृहंराजहर्म्यादिहर्म्य
देवोसौसूत्रधारोजगदखिलहितः पातुबोविश्र्वकर्मा।। राजवल्लभ, श्लोक-४

१. वास्तुविद्या

वास्तुशब्दस्य व्युत्पत्तिः, व्याख्या, इतिहासः, विकासः, महत्त्वं च

बृहत्संहितायाः उत्तरार्धे वास्तुविवेचनम् वराहमिहिरेण सविस्तरं कृतम्। वास्तु विषयकं शास्त्रीयज्ञानं बहमदेवात् विनिर्गतम् परम्परातः पृथ्वीतलं अवतीर्णम्। अस्मिन् विषय एकं आभाणकं तत्र दत्तम्। पुरा एकः उद्भूतः जीवः स्व शरीरेण पृथ्वीं आकाशंच आच्छादितवान्। देवैः सः निगृहीतः , तस्य मुखं अधः कृतम् पृथिव्यां च स्थापितम्। येन देवेन तस्य यत् अंग निगृहीतं तस्मिन् एव अंगे सनिवासनं कृतवान्। अस्य देवमय पुरुषस्य वास्तुपुरुष इति नाम कृतम्।

देवा वसंन्ति अस्मिन् अतः स वास्तुपुरुष इति उच्यते। वास्तुशब्दस्य प्रयोगः ऋग्वेदे कृतः दृश्यते। तथा हि– अन्यत्रापि च, वास्तु शब्दस्य प्रयोगः कृतः।

वास्तुपुरुषस्य उत्पत्तिविषये विविधाः कथाः विविधेषु ग्रन्थेषु उल्लिखिताः दृश्यन्ते तथा हिः–

मत्स्य पुराणानुसारेण पुरा शिवस्य अंधकासुरेण सह धोरयुद्धं जातम्, तत्र परिश्रमेण भगवतः शिवस्य ललाटतः प्रस्वेदः अगलत् अस्मात् स्वेद जलात् भीषणः पुरुषः उत्पन्नः, सः अंधकासुरस्य रुधिरम् अपि अपिबत्, शिवेन तस्य मुखम् अधः कृत्वा ईशान कोणे स्थापितः। वास्तुमंडल ग्रन्थेअपि इयमेव कथा किंचित् वैविध्येन उपलभ्यते।

वास्तुशब्दस्य व्यापक विस्तरः।

वास्तुशब्दस्य सामान्यः अर्थः निवासयोग्या भूमिः अथवा भवनं इति अस्ति। किन्तु विश्वकर्मानुसारेण यत्र देवाः मनुष्याः गजाः अश्वाः गवादयश्च निवासं कुर्वन्ति तद् वास्तु इति उच्यते। यथाः–

देवतानां नराणां च गजगोवाजिनामपि।
निवासभूमिशिल्पज्ञैर्वास्तुसंज्ञमुदीरितम्।।

अस्मिन् विषये मयमतं किंचित् भिन्नम् एव दृश्यते। यत्र अमर्त्याः अर्थात् देवाः – मर्त्याः अर्थात् मनुष्यादयः वसंति तत् स्थानं वास्तु इति उच्यते। मानसारग्रन्थेऽपि अयमेवअर्थः प्रतिपादितः अस्ति। मानसारग्रन्थे अस्मिन् विषये सूक्ष्मं विवेचनं वर्तते, यथा–

कृतं - १ धरा (भूमिः)　　　२ हर्म्यः (प्रासादः)

३ पानं (वाहन्म)　　　४ पर्यंकादि (शयनीयम्)

एतत् सर्वं वास्तुशब्देन उच्यते। तथापि, मुख्यतया वास्तु शब्दः भवनस्य भूमिः इति अर्थे एव प्रयुज्यते।

वास्तुशास्त्रसम्बन्धितनैकग्रन्थेषु शीर्षकेषु मयशब्दस्य प्रयोगः दृश्यते। यथा- मयमतम् मयमत -शिल्पशास्त्र विधानम् मयमतशिल्पशतिका, मयशिल्प , मयवास्तु, मयवास्तुशास्त्रम्, मयदीपिका, मयसङ्ग्रह तथा मयमतवास्तुशास्त्रम् इत्यादि। मयकृतग्रन्थानां मातृकाः , सन्दरर्भाश्च प्राप्यन्ते। विशेषरुपेण स्थापत्कलाः शिल्पा, यान विमानादयः, शय्यादि उपस्कारकाः इत्यादीनां निर्माणे मयस्य सिद्धान्तानां सर्वत्रपालनं दृश्यते। वाल्मीकिरामायणे द्वि प्रकारधकस्य विमानस्य उल्लेखः प्राप्यते प्रासादैश्च लङ्का परमभूषिता। आकाशमार्गे गमनं (विमान पुष्पकविमानं) कर्ता तथा द्वितीयं भवनम्।[1]

वास्तुविद्याध्यायः

त्रिस्कन्धात्मकं ज्यौतिषस्त्रीयसंहितास्कन्धग्रन्थेषु वराहमिहिररचितबृहत्संहितायाः उत्कृष्टं स्थानं वर्तते। एषः ग्रन्थः खगोलविद्यायाः अस्ति, परन्तु तत्र वास्तुविद्यास्थापत्यविद्यायाः अपि वैज्ञानिकं प्रतिपादिनमास्ति। अत्र वास्तुविद्याध्याये वास्तुचयनं, भूमिपरीक्षा, वृक्षारोपणं, वास्तुस्थापनादीनां विवेचनमपि दृश्यते। तस्य अध्याय-५६ तमे विशांतिः लक्षणानि प्रासादस्य प्राप्यन्ते। देवालयभूमिः कीदृशी भवतु गर्भद्वारं कथं स्यात्, प्रतिमा कथं भवितव्या इत्यादीनां विवरणपत्र प्राप्यते। अत्र वज्रलेपलक्षणं, शयनासनलक्षणं, प्रतिमालक्षणादीनां निरुपणमपि प्रतिपादितमस्ति।

बृहत्संहिताद्वारा वास्तुशास्त्रस्य सप्त संख्यकानाम् आचार्याणां ज्ञानं लभ्यते। तेषां नाम्नां अग्रे विवरणं भविष्यति। बृहत्संहिता वास्तुविद्यायाः अपूर्वः ग्रन्थः अस्ति इति मन्यन्ते।

धन्योऽयं वराहमिहिरो यस्य ज्योतिंप्रभा अद्यापि ज्योतिर्जगति न केवलं भारतेऽपि तु समग्रेऽपि विश्वे तथैव प्रभासते यथा सार्धसहस्त्रमिते पूर्वे चमत्कृतासीत्। अप्रतिमस्यास्य महापण्डितस्य विद्वत्ता खगोलशास्त्रे, भौतिकज्योतिषशास्त्रे, वास्तुशास्त्रे अन्यान्येषु च लौकिकोपयोगिविषयेषु

१. वाल्मीकि रामायण, सुन्दरकान्ड, सर्ग-७-९ आदि

यथा दृश्यते तथा तु न ततः पूर्वं पाश्चाद् वा। अस्य कवित्वशक्तिः वैज्ञानिकं च खगोलीयज्ञानं भारतीयशास्त्राणं परिशीलनम्। विषयानुकूल भावोपस्थाने दक्षता लेखकीयसिद्धता बृहत्संहितायाम् अपूर्वा एव विद्यते अस्मिन् ग्रन्थे वराहमिहेरेण समीचीनतया वास्तुविषये विवेचनं कृतं वर्तते।

प्रमाणं यच्च निर्दिष्टं लक्षणं विश्वकर्मणा।

प्रेक्षागृहाणां सर्वेषां तच्चैव हि निबोधत।।[१]

वास्तुविद्या व्याख्यायते। तत्रादावेवागमप्रदर्शनार्थमाह-

वास्तुज्ञानमथातः कमलभवान्मुनिपरम्परायातम्।

क्रियतेऽधुना मयेदं विदग्धसांवत्सरप्रीत्यै।।१।।

बृ.सं. भो. श्लोक-१ उत्तरार्ध प्रारम्भे

अथानन्तरमतोऽस्मात् पिटकलक्षणादधुना इदानी विदग्धसांवत्सराणां पण्डितदैवज्ञानां प्रीत्यै प्रीत्यर्थं वास्तुज्ञानं मया क्रियते। अथवा विदग्धसांवत्सरप्रीत्या हेतुभूतया। कीदृशम् ? कमलभवाद् ब्रह्मणः सकाशाद् मुनीनां गर्गादीनां यत् पारम्पर्येण यातं प्राप्तमिति। वेदाः ब्राह्मणग्रन्थाः, रामायणम्, महाभारतम्, पुराणानि, जैनागमाः , बौद्धग्रन्थाः इत्यादिषु प्रमाणभूतेषु ग्रन्थेषु वास्तुविद्यायाः वर्णनं प्राप्यते।।

वास्तुज्ञानस्योत्पत्तिप्रदर्शनार्थं श्लोकद्वयमाह-

किमपि किल भूतमभवद्रुन्धानं रोदसी शरीरेण

तदमरगणेन सहसा विनिगृह्याधोमुखं न्यस्तम्।।२।।

यत्र च येन गृहीतं विबुधेनाधिष्ठितः स तत्रैव।

तदमरमयं विधाता वास्तुनरं कल्पयामास।।३।।

बृ.सं. उत्तरार्ध वास्तुविद्या

किलेत्यागमसूचने। किमपि भूतमभवत् सत्त्वमासीत्। किमपीत्यानिर्दिष्टनामाऽपरिज्ञात-स्वरूपम्। रोदसी द्यावापृथिव्यौ शरीरेण वपुषा रुन्धानं व्याप्यामानम्। तद्भतममरगणेन देवसमूहेन सहसा झटित्येव विनिगृह्य गृहीत्वा अधोमुखमवाग्वदनं न्यस्तं क्षिप्तिम्।

---

१. नाट्यशास्त्रम् २.१२

एतेषां क्रमेण आयुर्वेदः धनुर्वेदः गान्धर्ववेदः, स्थापत्यवेदश्चेति चत्वार उपवेदाः सन्ति। प्राचीनकालादाराभ्य द्यावधि वास्तुविद्यायाः प्रसिद्धाः, चत्वारो वेदाः प्रसिद्धाः। यथा- ऋग्वेदः, यजुर्वेदः, सामवेदः, अर्थववेदश्च। वास्तुशास्त्रस्य मूलं तु अथर्ववेदे प्राप्यते।

यत्र च यस्मिन्नङ्गे स्थित्वा येन च विबुधेन देवेन गृहीतम् ,स तत्रैवाधिष्ठितो व्यवस्थित इत्यर्थः। तं भूतं विधाता प्रजापतिरमरमयं देवमयं वास्तुनरं वास्तुपुरुषं कल्पयामास कल्पितवानिति। तथा च बृहस्पतिः- **बृ.सं., पृ-२**

कालान्तरे तेषां विकासो भूत्वा स्थपत्यवेदस्य प्रसिद्धिः संजाताः। एवं तत्र वास्तुकलायाः विकासोऽभवत्। अयं स्थापत्यवेदो वास्तुकलायां नगरनिर्माणे भवननिर्माणे च श्रेष्ठो मार्गदर्शकः।

''ता वां वास्तून्युश्मसि गमध्यै......।''[१]

वास्तोष्पते.... [२]

नृपादिब्राह्मणान्तानां सर्वेषां पञ्च पञ्च गृहाणि प्रत्येकस्य वक्ष्यति। तत्रादावेव नृपगृहाणां प्रमाणमाह-

उत्तममष्टाभ्यधिकं हस्तशतं नृपगृहं पृथुत्वेन।

अष्टाष्टोनान्येवं पञ्च सपादानि दैर्ध्येण।।४।।

राजवेश्मोत्तमं प्रधानमष्टाभ्यधिकमष्टोत्तरं हस्तशतं पृथुत्वेन विस्तारेण कार्यम्। अन्यानि चत्वारि गृहाण्यष्टाष्टोनानि, अष्टाभिर्हस्तैरूनानि कार्याणि। एतदुक्तं भवति- प्रथमं नृपगृहमष्टाधिकं विस्तीर्णम्, द्वितीयं शतम्, तृतीयं द्विनवतिः , चतुर्थं चतुरशीतिः, पञ्चमं षट्सप्ततिरित। प्रत्येकस्य गृहस्य यत् पृथुत्वमुक्तं तत् सपादं चतुर्भागेनाधिकं तस्य दैर्ध्यं कार्यमित्यर्थः। यथा प्रथमगृहे पञ्चत्रिशदधिकं शतम्, द्वितीयं पञ्चविंशत्यधिकम्, तृतीयं पञ्चदशाधिकम्, चतुर्थं पञ्चोत्तरं शतम्, पञ्चमं पञ्चनवतिरित्येवं ज्ञेयमिति। तथा च काश्यपः- **बृ.सं., पृ-२**

अष्टोत्तरं हस्तशतं विस्तारान्नृपमन्दिरम्।
कार्यं प्रधानमन्यानि तथाष्टाष्टोनिताति तु।।
विस्तारं पादसंयुक्तं दैर्ध्य तेषां प्रकल्पयेत्।
एवं पञ्च नृपः कुर्याद् गृहाणां च पृथक् पृथक्।।इति।।

---

१. ऋग्वेद , १.१५४.६
२. ऋग्वेद, ७.५४.१-३, ७.५५.१

एवं पञ्च गृहाणि प्रत्येकस्याचार्येणाभिहितानि। अत ऊनाधिकता न शोभनेति।।

तस्मात् केषाञ्चित् ग्रन्थानां रचना - कालः निश्चितं ज्ञातमस्ति, परन्तु केचन ग्रन्थाः अनुपलब्धाः सन्ति तथा तस्य रचना कालः अपि नश्चितः नास्ति। भारतीय शिल्पस्थापत्यस्य (वास्तुविद्यायाः) प्रारम्भः कदा जातः इति निर्णयः प्राचीनसहित्याधारेण कर्तुं शक्यते। वास्तुनः वा स्थापत्यस्य अस्माकं भारतवर्षे अधिकतम विकासः जातः तस्मात् कारणात् एतद्विषकविस्तृत लेखनस्य आवश्यकता जाता, तदा एतद्विषयकस्य अनेकग्रन्थानां रचना जाता।

ग्रामे वाथपुरेनरेन्द्रभवनंतत्षोऽशांशंभवेत्

मध्यात्पश्चिमदिकसमाश्रितमिदंदुर्गेभवेत्भूवशात्।।

द्वारद्दक्षिणवामतश्चपुरतः कार्यास्त्रयश्चत्वराः

सर्ववास्तुगृहादिवासरचनाभूपेच्छयाकारयेत्।।[1]

शुभदा चतुरश्रा भूर्भूमिपानां विशेषतः।

पुरस्य मध्यभागे वा निर्दिष्टे वा स्थलोत्तमे।

भूपहर्म्यं प्रकर्तव्यं तल्लक्षणमनोहरम्।।[2]

कृते पुरनिवेशऽथ चतुः षष्टिपदाश्रये।

नियुक्तपरिखासालगोपुराट्टालकेऽपि च।।

विभक्तेरथ्ये परितः प्रविभाजितचत्वरे।

क्रमादन्तर्बहिः क्लृप्तदेवतायतनस्थितौ।।[3]

सरिद्विस्तीर्णपरिखं स्पष्टाञ्चितमहापर्थ शैलकल्पमहावप्रं गिरिव्रजमिवापरम्।

पाण्डुराट्टालसुमुखं सुविभक्तान्तरापणं हर्म्यमाला परिक्षियतम्।[4]

---

१. विश्वकर्मवास्तुशास्त्रम्, अ.१२.१-२

२. विश्वकर्मवास्तुशास्त्रम् , अ.१२.१-२

३. सौन्दरानन्द, १.४२-४३

४. समराङ्गणसूत्रधारः (जुगनू), अ.१५.१-२

'मयेन साक्षादिव निर्मितानि।'[1]

'मयस्य मायाविहितं गिरिदुर्ग विचिन्वताम्।[2]

यथा - दक्षिणे मयः।[3]

तस्य प्रसारः मध्य अमेरिकादेश पर्यन्तं प्रसारितमिति पुरातत्त्विय सम्बन्धि उत्खनने हनुमानः गणेशः इन्द्रादि, देवानां मूर्तयः उपलब्धं जातम्।[4]

'वदतो मेऽवधानेन श्रृणु यद् ब्रह्मणोदितम्।'[5]

अतो लोकेषु सर्वेषु शिल्पं बहुविधं ततम्।
ग्रामाणा्च पुरीणांच लक्षणं बहुधा स्मृतम्।।
खेटकर्वटकादीनां दृर्गाणामपि लक्षणम्।
प्रासादेषु च हर्म्येषु देवानां भूभुजामपि।।
विविधेष्वपि निर्माणष्वपि सन्दूप्वकं बहु।
भवने न्यायाशालायां समायं कोशसद्मनि।।
अन्तः पुरे शस्त्रगेहे शालाषु विविधासु च।
क्रिडागेहेषु रम्येषु तोरणादिषु मिञ्चके।।
अधि – ष्ठानोपपीठेषु गोपुरेषु तथा बहु।
सङ्कर्णभवनाढ्येषु पताकापारिभद्रके।।
चातुवर्ण्यगृहाणाश्च लक्षणं बहुधा स्मृतम्।
वेदिका पोतिकासन्धिबन्धनावरणेषु च।।
स्तम्भादिके च निर्माणे विधेषभवनेषु च।
मण्डपेषु विमानेषु प्राकारादिषु यन्मतम्।।
लक्षणं बहुा प्रोक्तं नानादेश विभागशः।
सकलं तच्व संक्षिप्य वक्ष्येऽध्यायक्रमादहप्।।[6]

---

१. वाल्मीकि रामायण, (श्रीनिवास कट्टी शास्त्री), सुन्दरकान्ड, सर्ग-७.४
२. वाल्मीकि रामायण, (जगदीश्वरानन्द) किष्किन्धाकान्ड, सर्ग-२५.२१
३. मानसार अ-२.६
४. स्वतन्त्रकलाशास्त्रम् भाग-१, पृ.६०५
५. समराङ्गणसूत्रधारः, अ.४.३
६. विश्वकर्मवास्तुशास्त्रम् , अ.२.३३-४०

भारतीयवास्तुकालायां द्वयं परम्परायाः वा शैल्यायाः प्रचलनं नास्ति एवं न विश्वकर्मा उत्तरीयायाः परम्परायाः तथा मयः दाक्षिणात्यपरम्परायाः प्रतिनिधयः आसन्।[१]

कस्मिन् स्थाने कथं कार्यं शक्रध्वजनिवेशनम् पुरस्याभ्यान्तरे पूर्वं कैर्द्रव्यावयवक्रमैः।।[२]

बिल्लः एवमलिखित् – पण्डिता मण्डिताः सर्वे भोजराजे भुवं गते लक्षं महाकवेर्देयं तदर्धं विबुधस्य च देयं ग्रामेकमर्धस्य तस्याप्यर्धमर्थिनः।।[३]

कार्यः क्व च कथं सन्निवेशो जनपदाश्रयः।।[४]

अथेदानीं सेनापतिगृहाणां प्रमाणमाह–

षड्भिः षड्भिर्हीना सेनापतिसद्मनां चतुः षष्टिः।
एवं पञ्च गृहाणि षड्भागसमन्विता दैर्ध्यम्।।५।।

चतुः षष्टिर्हस्ताः षड्भिः षड्भिर्हीना पृथुत्वम्। तद्यथा- प्रथमगृहस्य चतुः षष्टिः, द्वितीयस्याष्ट-पञ्चाशत्, तृतीयस्य द्वापञ्चाशत्, चतुर्थस्य षट्चत्वारिंशत्, पञ्चमस्य चत्वारिंश-दिति। एवमनेन प्रकारेण पञ्च गृहाणि। विस्ताराः षड्भागसमन्विता दैर्ध्यमिति। प्रत्येकस्य गृहस्य यो विस्तारः उक्तः,स एव षड्भागाधिको दैर्ध्यं भवति। अत्रेयं परिभाषा- भाग- हारेण भागमपहृत्य हस्ता लभ्यन्ते, शेषाच्चतुर्विंशतिगुणितादंगुलानिं, तच्छेषात् षष्टिगुणाद्वयंगुलानि सर्वत्र। ऋग्वेदे वास्तोष्पतेः स्तुतिर्दृश्यते। पाषणनिर्मितानि १०० नगराणां सप्रमाणं भवनरचनाया समुल्लेखो दृश्यते। अथर्ववेदस्य सुक्तेषु स्थापत्यकला - गुहनिर्माणस्य नियमाः दृश्यन्ते।।

प्रासादोऽस्यां भूमौ स्यादिति।[१]

सर्वेषां मूलहर्म्याणां पूर्वद्वारं प्रकल्पयेत्।[२]

विमुञ्चेद् ब्रह्मणः स्थानमिन्द्रध्वजयुतं नृणाम्।।

तत्राशुभानि वेश्मानि निवेशाश्चासुखावहाः।[३]

---

१. भारतीय वास्तुशास्त्रका इतिहास अ.१ पृ.२२
२. समराङ्गणसूत्रधार (पूष्पेन्द्र) , अ.११-१७
३. भोजनप्रबन्धश्लोकः ३२६-३२७
४. समराङ्गणसूत्रधार (पूष्पेन्द्र) , अ.३.४-१०
५. मानसार, अ.४०.४५
६. मानसार, अ.४०
७. समरा”णसूत्रधारः (जुगनू), अ.१५.४७

सचिवगृहाणां प्रमाणमाह-

षष्टिश्चतुश्चतुर्भिर्हीना वेश्मानि पञ्च सचिवस्य।

स्वाष्टांशयुतो दैर्ध्य तदर्धतो राजमहिषीणाम्।।६।।

सचिवस्य मन्त्रिणः पञ्च वेश्मानि गृहाणि यानि तेषां षष्ष्श्चितुर्भिर्हीना पृथुत्वम्। तद्यथा – प्रथमगृहस्य षष्टिः , द्वितीयस्य षटढपञ्चाशत्, तृतीयस्य द्वापञ्चाशत्, चतुर्थस्याष्टचत्वारिंशत्, पञ्चमस्य चतुश्चत्वारिशदिति। प्रत्येकस्य गृहस्य यो विस्तारः स एव स्वाष्टांशयुतोऽष्टभागसंयु-क्तस्तस्य दैर्ध्यम्। तदर्धतो राजमहिषीणाम्, महिष्यः, प्रधानस्त्रियः, तासां नृपमहिषीणां तदर्धतः सचिवप्रमाणार्धेन गृहाणि कार्याणीति। एतदुक्तं भवति- सचिवस्य यानि पञ्च गृहाण्युक्तानि तेषां यो विस्तारो यच्च दैर्ध्यम् , तदर्धेन राजमहिषीणां गृहाणि कार्याणीत्यर्थः। तद्यथा- प्रथमगृहस्य पृथुत्वं त्रिंशत् द्वितीयस्याषविंशतिः, तृतीयस्य षड्विंशतिः चतुर्थस्य चतुर्विंशतिः, पञ्चमस्य द्वाविंशतिरिति। स्वाष्टांशयुतो दैर्ध्यं सर्वेषां कार्यमिति।।

युवराजगृहाणां लक्षणमाह-

षड्भिः षड्भिंश्चैवं युवराजस्यापवर्जिताऽशीतिः।

त्र्यंशान्विता च दैर्ध्यं पञ्च तदर्धस्तदनुजानाम्।।७।।

युवराजस्याशीतिः, षड्भिः, षड्भिरपवर्जिता पञ्चानां गृहाणां पृथत्वम्। तद्यथा प्रथमस्याशी-तिर्हस्तो विस्तारः, द्वितीयस्य चतुः सप्ततिः, तृतीयस्याष्टषष्टिः, चतुर्थस्य द्विषष्टिः, पञ्चमस्य षट्पञ्चाशत्। प्रत्येकस्य गृहस्य विस्तारः स्वस्वत्र्यंश आत्मीयत्रिभागेन युतो दैर्ध्य भवति। एवं पञ्च गृहाणि तदनुजानामिति। तस्य युवराजस्यानुजानां पश्चाज्जातानां कनीयसां भृत्यानां तदर्धैः पृथुत्वदैर्ध्यात् पञ्च गृहाणि कार्याणि। तद्यथा- प्रथमस्य पृथुत्वं चत्वारिंशत्, द्वितीयस्य सप्तत्रिंशत्, तृतीयस्य चतुस्त्रिशत्, चतुर्थस्यैकत्रिंशत्, पञ्चम्स्याष्टाविंशतिः, त्र्यंशान्वितं सर्वेषां दैर्ध्यमिति।।

अधुना सामन्तप्रवराजपुरुषकञ्चुकिवेश्याकलाज्ञानां गुहलक्षणान्याह-

नृपसचिवान्तरतुल्यं सामन्तप्रवराजपुरुषाणाम्।

नृपयुवराजविशेषः कंचुकिवेश्याकलाज्ञानाम्।।

नृपगृहाणां पञ्चानां सचिवगृहैः पञ्चभिः सह यदन्तरं तत्सामन्तानां माण्डलिकानां नृपाणां प्रवराणां प्रधानानां राजपुरुषाणां च कार्यम्। एतदुक्तं भवति - नृपसचिवयोः परस्परं विस्तारस्य विस्तारेण सहान्तरे कृते दैर्ध्यस्य दैर्ध्येण च सहान्तरे कृते यद् भवति तत्पृथुत्वं

विशेषोऽन्तरं भवति तत्कञ्चुतिनां महत्तरकपतीनां वेश्यानां साधारणस्त्रीणां कलाज्ञानां कलाप्रवीणानां गेयवाद्यनृत्यचित्रपुस्तकपत्रच्छेदकर्मविदां च कार्यमिति।।८।।

इष्टव्यासायामं प्रागेवालं विचिन्त्य कर्तव्यम्।

तस्माद्धीनं यत्तन्निष्पन्नं वास्तु येन केनापि।।

अशुभमवनीपतेस्तत् सततं विपदां पदं भवति।

पौराणां यद्वस्तु वर्धितुमिच्छेद् बहिस्ततस्तस्मात्।।

प्रागुत्तरदिशि वृद्धिः शस्ता परितस्तु वा न्याय्या।[1]

ज्येष्ठे पुरे विधातव्यं ज्येष्ठं राजनिवेशनम्।

मध्यमे मध्यमं कार्यं कनिष्ठं च कनीयसि।।[2]

त्रिचत्वारिंशता युक्ते ज्येष्ठं स्याद् द्वे धनुः शते।

मध्यं शतं द्वाषष्टिः शतं साष्टकमन्तिमम्।।[3]

---

१. मयमतम्, अ.२९.१०-१२

२. समराङ्गणसूत्रधारः (जुगनू), अ.१५.७

३. समराङ्गणसूत्रधारः (जुगनू), अ.१५.६

अथाध्यक्षाधिकृतकर्मान्ताध्यक्षदूतानां पञ्च गृहाण्याह-

अध्यक्षाधिकृतानां सर्वेषां कोशरतितुल्यम्।

युवराजमन्त्रिविवरं कर्मान्ताध्यक्षदूतानाम्।।९।।

स्फुटार्थ चक्रम्

ज्ञातयः	हस्त	अंगुलानि	हस्त	अंगुलानि	हस्त	अंगुलानि	हस्त	अंगुलानि	हस्त	अंगुलानि	प्रमाणम्
राज्ञः	१०८	०	१००	०	९२	०	८४	०	७६	०	विस्तारः
	१३५	०	१२५	०	११५	०	१०५	०	९५	०	दैर्घ्यम्
सेनापतेः	६४	०	५८	०	५२	०	४६	०	४०	०	विस्तारः
	७४	१६	६७	१६	६०	१६	५३	१६	४६	१६	दैर्घ्यम्
मन्त्रिणः	६०	०	५६	०	५२	०	४८	०	४४	०	विस्तारः
	६७	१२	६३	०	५८	१२	५४	०	४९	१२	दैर्घ्यम्
राजमहि-षीणाम्	३०	०	२८	०	२६	०	२४	०	२२	०	विस्तारः
	३३	१८	३१	१२	२९	६	२७	०	२४	१२	दैर्घ्यम्
युव राजस्य	८०	०	७४	०	६८	०	६२	०	५६	०	विस्तारः
	१०६	१६	९८	१६	९०	१६	८२	१६	७४	१६	दैर्घ्यम्
युवराजा-नुजस्य	४०	०	३७	०	३४	०	३१	०	२८	०	विस्तारः
	५३	८	४९	८	४५	८	४१	८	३७	८	दैर्घ्यम्
साम न्तस्य	४८	०	४४	०	४०	०	३६	०	३२	०	विस्तारः
	६७	१२	६२	०	५६	१२	५१	०	४५	१२	दैर्घ्यम्
कञ्चुकि वेश्याकला ज्ञानाम्	२८	०	२६	०	२४	०	२२	०	२०	०	विस्तारः
	२८	८	२६	८	२४	८	२२	८	२०	८	दैर्घ्यम्
कर्माध्य-क्षस्य	२०	०	१८	०	१६	०	१४	०	१२	०	विस्तारः
	३९	४	३५	१६	३२	४	२८	१६	२५	४	दैर्घ्यम्
ज्यौतिषिक पुरोहित वैद्यानाम्	४०	०	३६	०	३२	०	२८	०	२४	०	विस्तारः
	४६	१६	४२	०	३७	४	३२	१६	२८	०	दैर्घ्यम्

अश्वशालागजशालागोशालासूपकारादिशालाध्यक्षाणां तत्राधिकृतानां तथान्येषामन्यत्र कर्मादाव-धिकृतानामधिकारे स्थापितानां नियोगिनां सर्वेषां कोशरतितुल्यम्, कोशगृहप्रमितं रतिगृहप्रमितं वा कुर्यात्। कोशरतिभवनप्रमाणमुत्तरत्र वक्ष्यति। युवराजमन्त्रिविवरमिति।

युवराजमानस्य मन्त्रिमानेन सह यद्विवरमन्तरं तत्कर्मान्तरेषु कर्मशालासु येऽध्यक्षास्तेषां षट्कर्मपतीनां दूतानां च कुर्यात्। केचित् सामन्तरमन्त्रिविवरमिति पठन्ति। सामन्तमानस्य मन्त्रिमानेन सहान्तरे यत् तेन मानेनेति। एतद् वृद्धस्थपतिभिर्नादृतमतिमानाल्पत्वादिति।।

चूलीहर्म्यसमायुक्तं पक्षिशालाभिरन्वितम्।

पञ्चाशतदण्डमानादि दण्डपञ्चशतावधि।।

प्रमाणमिह निर्दिष्टं भूमिपालस्य मन्दिरे।

अथवा भागमानेकायेन्नृपमन्दिरम्।।[1]

एकाशीत्या पदैर्भाक्तिं विधेयं – नृपमन्दिरम्।[2]

क्षोणीविभूषणं त्वाद्यं पृथिवीतिलकं परम्।

प्रतापवर्धनं चान्यच्छ्रीनिवासं ततोऽपि च।।

लक्ष्मीविलाससञ्ज्ञं च पञ्चमं परिकीर्तितम्।[3]

माडश्च मौडः शुद्धश्च शिखरं च चतुर्थकम्।

तुङ्गरः सिंहकश्चेव षड्भेदा राजवेश्मनाम्।।[4]

दैवज्ञभिषक्पुरोहितानां वास्तुप्रमाणमाह-

चत्वारिंशद्धीनां चतुश्चतुर्भिस्तु पञ्च यावदिति।

षड्भागयुता दैर्ध्यं दैवज्ञपुरोधसोर्भिषजः।।१०।।

अथ दैवज्ञभिषक्पुरोहितानां च। दैवज्ञः सांवत्सरिकः। भिषग्वैद्यः। पुरोहितः पुरोधाः। एषां चत्वारिंशच्चतुश्चतुर्भिर्हीनां गृहपऽञ्चकस्य विस्तारः। तद्यथा- प्रथमगृहस्य विस्तारश्चत्वारिंशत्, द्वितीयस्य षट्त्रिंशत् तृतीयस्य द्वात्रिंशत्, चतुर्थस्याष्टाविंशतिः, पञ्चमस्य चतुर्विंशतिः। सैव चत्वारिशत् षड्भागयुता दैर्ध्य कार्यम्। प्रत्येकस्य गृहस्य यो विस्तारः स एव स्वषड्भागाधिको दैर्ध्यं भवति।।१०।।

१. विश्वकर्मवास्तुशास्त्रम्, अ.१२.३-४

२. समराङ्गणसूत्रधारः (जुगनू), अ.१५.१

३. समराङ्गणसूत्रधारः , (पुष्पेन्द्र), अ-३०.१६९

४. अपराजितापृच्छा, ६०.३०

ग्रहोच्छ्रायप्रमाणमेकशालस्य च दैर्ध्यमाह-

वास्तुनि यो विस्तारः स एव चोच्छ्रायनिश्चयः शुभदः।

शालैकेषु गृहेष्वपि विस्ताराद् द्विगुणितं दैर्ध्यम्।।११।।

वास्तुनि गृहे यो विस्तार उक्तः स एवोच्छ्रायनिश्चिय औच्च्यप्रमाणं शुभद इति। यथा नृपस्य प्रथमगृहमष्टाधिकं हस्तशतं विस्तारादुक्तमं तथाष्टाधिकं हस्तशतमेवोच्छ्रितं कार्यमिति। एकशालगृहेषु च विस्ताराद् द्विगुणं दैर्ध्यं कार्यमिति। तथा च काश्यपः। **बृ.सं., पृ-७**

ब्राह्मणादिवर्णचतुष्टयस्य गृहप्रमाणमाह-

चातुर्वर्ण्यव्यासो द्वात्रिंशत् सा चतुञ्चतुर्हिना।

आषोडशादिति परं न्यूनतरमतीव हीनानाम्।।१२।।

सदशांशं विप्राणां क्षत्रस्याष्टांशसंयुतं दैर्ध्यम्।

षड्भागयुतं वैश्यस्य भवति शूद्रस्य पादयुतम्।।१३।।

चातुर्वर्ण्य इति। चतुर्वर्णानां भावश्चातुर्वर्ण्यम्। चत्वारो वर्णाः- ब्राह्मणक्षत्रियवैश्यशूद्राः। तस्मिश्चातुर्वेर्ण्ये ब्राह्मणादिके व्यासो विस्तार द्वात्रिंश, सा चतुश्चतुर्हीना। आषोडशादिति, षोडशं यावदिति। द्वात्रिंशच्चतुश्चतुर्भिर्हीनां तावत् कार्या यावत् षोडशेति। एतदुक्तं भवति- ब्राह्मणस्य प्रथमगृह-व्यासो द्वात्रिंशद्धस्ताः, अन्यानि चत्वारि चतुर्भिश्चतुर्भिर्हीनानि। क्षत्रियस्य प्रथमगृहव्यासो हस्ता अष्टाविंशतिः, अन्यानि त्रीणि चतुर्भिश्चतुर्भिर्हीनानि। वैश्यस्य प्रथमगृहं चुतर्विंशतिः, अन्ये द्वे चतुर्भिश्चतुर्भिहीने। शूद्रस्य प्रधानं गृहं विंशतिर्हस्ताः, अपरं षोडशेति। एवं ब्राह्मणस्य पञ्च गृहाणि, क्षत्रियस्य चत्वारि, वैश्यस्य त्रीणि, शूद्रस्य द्वे। अतः परं निकृष्टं न्यूनतरमल्पतरमतीव हीनानां चाण्डालश्वपाकादीनां कार्यमिति।

विप्राणां ब्राह्मणानां व्यासो यद्विस्तामानमुक्तं तदेव सदशांशं स्वदशभागयुतं दैर्ध्यं कार्यम्, पञ्चस्वपि गृहेषु। एवं क्षत्रियस्याष्टांशयुतमष्टभागाधिकम्। वैश्यस्य स्वषड्भागयुतम्। शूद्रस्य पादयुतं चतुर्भागाधिकमित्यर्थः। तथा च किरणाख्ये तन्त्रे-

कोशरतिभवनयोः प्रमाणं राजपुरुषाणां च गृहप्रमाणान्याह-

नृपसेनापतिगृहयोरन्तरमानेन कोशरतिभवने।

सेनापतिचातुर्वर्ण्यविवरतो राजपुरुषाणाम्।।१४।।

स्फुटार्थ चक्रम्

ज्ञातयः	हस्त	अंगुलानि	हस्त	अंगुलानि	हस्त	अंगुलानि	हस्त	अंगुलानि	हस्त	अंगुलानि	प्रमाणम्
ब्राह्मणस्य	३२	०	२८	०	२४	०	२०	०	१६	०	विस्तारः
	३५	५	३०	१९	१६	१०	२२	०	१७	१४	दैर्ध्यम्
क्षत्रियस्य	२८	०	२४	०	२०	०	१६	०	×	×	विस्तारः
	३१	१२	२७	०	२२	१२	१८	०	×	×	दैर्ध्यम्
वैश्यस्य	२४	०	२०	०	१६	०	×	×	×	×	विस्तारः
	२८	०	२३	८	१८	१६	×	×	×	×	दैर्ध्यम्
शूद्रस्य	२०	०	१६	०	×	×	×	×	×	×	विस्तारः
	२५	०	२०	०	×	×	×	×	×	×	दैर्ध्यम्
कोशरति-भवनस्य	४४	०	४२	०	४०	०	३८	०	३६	०	विस्तारः
	६०	८	५७	८	५४	८	५१	८	४८	८	दैर्ध्यम्
राजपुरु-षाणाम	३२	०	३०	०	२८	०	२६	०	२४	०	विस्तारः
	३९	११	३६	२१	३४	६	३१	१६	२९	२	दैर्ध्यम्

नृपस्य गृहमानस्य प्रागुक्तस्य सेनापतिगृहमानेन प्रागुक्तेनैव सह यदन्तरं तेन मानेन कोशभवनं च कार्यम्। कोशभवनं गञ्ज,तिभवनं क्रीडागृहम्, अनयोस्तुल्यं प्रमाणम्। सेनापतेश्चातुर्वर्ण्यस्य च यद्विवरमन्तरं तेन तनेन राजपुरुषाणां कार्यम्। अत्र यदा ब्राह्मणो राजपुरुषो भवति, तदा ब्राह्मणवास्तुमानं सेनापतिवास्तुमानादपास्य यदवशिष्यते तेन क्षत्रियवास्तुमानेन सहान्तरं कृत्वा शेषं क्षत्रियराजपुरुषस्य प्रधानगृहम्। एवं तृतीयस्य द्वितीयेन, चतुर्थस्य तृतीयेन पञ्चमस्य चतुर्थेनेति। एवं तृतीयेन सेनापतिगृहेण सहान्तरं वैश्यस्य प्रधानगृहम् चतुर्थेन शूद्रस्येति।।

पारशवादीनां वास्तुप्रमाणं हीनाधिकस्य वास्तुनश्चाशुभत्वमाह-

अथ पारशवादीनां स्वमानसंयोगदलसमं भवनम्।

हीनाधिकं स्वमानादशुभकरं वास्तु सर्वेषाम्।।१५।।

अथानन्तरं ये ब्राह्मणेन शूद्रायां जाताः पारशवाः। एवं वैश्यायां जातो भूर्जकण्टकः। क्षत्रियायां जातो मूर्धावसिक्तः। एतेषां पारशवादीनां स्वमानसंयोगदलसमं भवनं कार्यम्।

स्वमानस्यात्मीमयमानस्य द्वयोरेव मापापित्रोः संयोगादैक्यं कृत्वा तस्य दलमर्धं तत्तुल्यं पारशवादेर्भवनं गृहं कार्यम्। एतदुक्तं भवति – ब्राह्मणस्य यन्मानं यच्च शुद्रस्य तयोरैक्यं कृत्वा अर्धीकार्यम्। तन्मानं पारशवगृहस्य। वैश्यायाः क्षत्रियायाः पुत्राणामेवमपि। सर्वेषां नृपादीनां पारशवान्तानां स्वमानादात्मीयमानाद्धीनमधिकं वास्तु न शुभकरमिति।।

मित्रभागे प्रहरणस्थानमुक्तं मुनीश्वरैः।[1]

पश्वाश्रमिणां धान्यायुधवह्निरतिगृहाणां च परमतेनोच्छ्रायप्रमाणं चाह-

पश्वाश्रमिणाममितं धान्यायुधवह्निरतिगृहाणां च।
नेच्छन्ति शास्त्रकारा हस्तशतादुच्छ्रितं परतः।।१६।।

पशूनां चतुष्पदानाम्। आश्रमिणां च प्रव्राजकानाममितमपरिमितं यथेष्टप्रमाणं गृहस्य। तथा धान्यगृहस्य धान्यानि यत्र स्थाप्यन्ते, आयुधगृहस्यायुधानि यत्र स्थाप्यन्ते, वह्निगृहस्य चाग्निशालायाः रतिगृहस्य च क्रीडावेश्मनः। एषाममितमपरिमितं प्रमाणम्। शास्त्रकारा वास्तुज्ञानविदो हस्तशतात् परत उच्छ्रितं नेच्छन्ति। हस्तशतादूर्ध्वमुच्छ्रितं गृहं न कार्यम्। वास्तुनि तो विस्तारः स एव चोच्छ्रायनिश्चयः शुभद इत्यस्यायमपवादः। तथा च गर्गः-**बृ.सं.,पृ-९**

शतहस्तोच्छ्रितं कार्यं चतुः शालगृहं बुधैः।
अपि तत्त्वेकशालं तु शुभदं तत्प्रकीर्तितम्।। इति।।

मध्यभागे राजवेश्म नवसौधतलावधि।[2]

सेनापतिनृपद्वारेण सर्ववास्तुनां शालाडिलन्दयोः प्रमाणमाह-

सेनापतिनृपतीनां सप्ततिसहिते द्विधाकृते व्यासे।
शाला चतुर्दशहृते पञ्चत्रिंशद्धृतेऽलिन्दः।।१७।।

सेनापतेर्नृपतेर्वास्तुनि व्यासस्य वा चातुर्वर्ण्यविवर्जितस्यान्यस्य वा यस्य कस्यचित् सप्ततिसहितस्य सप्तत्या युक्तस्य तथाभूतस्य द्विधाकृतस्य द्विष्ठस्यैकत्र चतुर्दशभिर्भागमपहत्व यल्लभ्यते हस्ता अङ्गुलानि च तेन प्रमाणेन शाला कार्या। शालाशब्देन गृहाभ्यन्तरमुच्यते। अन्यत्र पञ्चत्रिंशता भागे हृते यल्लभ्यते हस्तादिकं तेन प्रमाणेनालिन्दः कार्यः। अलिन्दशब्देन शालाभित्तेर्बाह्या या गमनिका जालकावृताङ्गणसम्मुखा क्रियते सा ज्ञेयेति। पूर्वमुक्तमुतम मष्टाभ्यधिकं हस्तशतमित्यादि क्षेत्रप्रमाणं तत्र चायं निर्माण-विधिरिति।।

---

१. विश्वकर्मवास्तुशास्त्रम् , अ.१२.९

२. विश्वकर्मवास्तुशास्त्रम्, अ.१२.१०

चातुर्वर्ण्यस्य शालालिन्दयोः प्रमाणमाह-

हस्तद्वात्रिंशादिषु चतुश्चतुस्त्रित्रिकत्रिकाः शालाः।

सप्तदशत्रितयतिथित्रयोदशकृताङ्गुलाभ्यधिकाः॥१८॥

त्रित्रिद्विद्विद्विसमाः क्षयक्रमादङ्गुलानि चैतैषाम्।

व्येका विंशतिरष्टौ विंशतिरष्टादश त्रितयम्॥१९॥

हस्तद्वात्रिंशादिषु। द्वात्रिंशदादौ ब्राह्मणादीनां वर्णानामित्यर्थः। तेषां चतुश्चतुस्त्रित्रिकत्रिका हस्ताः शालाः कार्याः। किम्भूताश्च ते हस्ताः? सप्तदशत्रितयतिथित्रयो-दशकृताङ्गुलाभ्यधिका इति। तद्यथा- चातुर्वर्ण्यस्य प्रथमगृहे प्रधाने शाला चतुर्हस्ता सप्तदशाङ्गुलाभ्यधिका कार्या, द्वितीये चतुर्हस्याङ्गु-लत्रितयेनाधिका, तृतीये त्रिहस्ता तिथिभिः पञ्चदशभिरङ्गुलैरधिका, चतुर्थे त्रिहस्ता त्रयोदशभिरङ्गुलै-रधिका, पञ्चमे त्रिहस्ता कृतैश्चतुर्भि-रङ्गुलैरधिका कार्येति। एवं यद् गृहं ब्राह्मणस्य द्वितीयं तत् क्षत्रियस्य प्रधानमढ यत् क्षत्रियस्य द्वितीयं तद्वैश्यस्य प्रधानम्, यद्वैश्यस्यं द्वितीयं तच्छूद्रस्य प्रधानम्। अनेनैव प्रकारेण शालाप्रमाणं सिद्धम्।

त्रित्रिद्विद्विद्विसमा इति। त्र्यादयश्च हस्ता व्येकविंशतिप्रभृतिभिरङ्गुलैर्युक्ताः। चातुर्वण्यं वास्तुष्वलिन्द-प्रमाणमनुक्तमपि ज्ञायते। तद्यथा- ब्राह्मणस्य प्रथमगृहेऽलिन्दप्रमाणं हस्तत्रितयमेकोन-विंशत्यङ्गुलैंरधिकम्। व्येका विंशतिः। विगत एको विंशतेः। द्वितीये हस्तत्रिकमष्टाभिरङ्गुलैरधिकम्। तृतीये हस्तद्वयं विंशत्यङ्गुलै-रधिकम्। चतुर्थे हस्तद्वितयमष्टादशभिरङ्गुलैरधिकम्। पञ्चमे हस्तद्वितयं त्रिभिरङ्गुलैरधिकम्। एवमेतेषां हस्तानां क्षयक्रमाद् गृहक्रमेणैतान्यङ्गुलान्यधिकानि कार्याणि। अत्र केचित् पठन्ति - व्यतिक्रमादङ्गुलानि चैतेषामिति। अन्ये एवं व्याचक्षत्रे। यथा-एतान्यङ्गुलानि क्षयो हानिरेषां हस्तानां कार्यः। एतदृद्धस्थपति-भर्नाङ्गीकृतम्। अत्र यथा सेनापतिचातुर्वर्ण्यविवरतो राजपुरुषाणामिति तच्छालालिन्दयोरपि कार्यमिति ॥

वीथिकाप्रमाणं तदुपलक्षितानां च वास्तूनां नामान्याह-

शालात्रिभागतुल्या कर्तव्या वीथिका बहिर्भवनात्।

यद्यग्रतो भवति सा सोष्णीषं नाम तद्वास्तु॥२०॥

सायाश्रयमिति पश्चात् सवष्टम्भं तु पार्श्वसंस्थितया।

सुस्थितमिति च समन्ताच्छास्त्रज्ञैः पूजिताः सर्वाः।।२१।।

१. गोवीथी- यदि भूमिः पश्चिम दिशायां उच्चस्था तथा पूर्वदिशायां नीचस्था अस्ति तर्हि सा भूमिः गोवीथी पूर्वदिशायां प्लवा पश्चिम दिशायां उच्चस्थः भवति।

२. यमवीथी – "यमप्लवास्याद् यमवीथी" यदिभूमिः दक्षिणदिशायां नीचस्था तथा उत्तरदिशि उच्चस्था भवति तर्हि सा भूमिः यमवीथी इत्युच्यते। यमवीथी दक्षिण दिशायां प्लवा तथा उत्तरदिशायां उच्चस्था भवति।

३. जलवीथी –जलवीथी पूर्वोच्चस्था पश्चिमे नीचस्था भवति। यदि भूमिः पूर्वदिश उच्चस्था पश्चिम दिशि नीचस्था भवति सा जलवीथीत्युच्चते।

४. गजवीथी –यमोच्च सोमनीचस्था च गजवीथीरिति कथ्यते यदि भूमिः उत्तरदिशामां उच्चस्था दक्षिणदिशायां नीचस्था अस्ति तर्हि सा भूमिः गजवीथीत्युच्यते।

५. भूतवीथी –ईशोच्चं निर्ऋतौनीचं भूतलं भूतवीथिकम्। यदि भूमिः ईशान्यां उच्चस्था अस्ति निर्ऋतौ नीचस्था अस्ति तर्हि सा भूमिः भूतवीथीरित्युच्यते।

६. नागवीथी – आग्नेयोच्चस्थं वायुनीचस्थं भूतलं नागवीथीरिति उच्यते। यदि भूमिः आग्नेयदिशायानां उच्चस्था वायव्य दिशायां नीचस्था वर्तते तर्हि सा भूमिः नागवीथीरित्युच्यते।

७. वैशानरी वीथी- वायूच्चं अग्निनीचं भूमिः वैश्वानरी इति कथ्यते या भूमिः वायव्य दिशायां उच्चस्था अग्निदिशायां नीचस्था भवति सा वैश्वानरी भूमिः इति कथ्यते।

८. धनवीथी- निर्ऋतृच्चमीशनीचं धन वीथीरीति उच्यते। या भूमिः नैऋत्य दिशायां उच्चस्था ईशान्यां नीचस्था भवति सा धनवीथीरिति कथ्यते।

९. पितामहवीथी – इन्द्राग्न्यन्तरमुच्चे स्यानीयं वरुण वातयोः वास्तु पैतामहं विधान्नराणां कुरुते शुभम्। या भूमिः सूर्याग्नि मध्ये उच्चस्थयो भूत्वा पश्चिमवायव्योर्मध्ये नीचस्था भवति सा भूमिः पितामहवीथी इति कथ्यते।

शालात्रिभागतुल्येति। शालाया यत् प्रमाणमुक्तं तत्त्रिभागतुल्या वीथिका स्थला भवनात् क्षेत्राद् बहिर्बाह्यतः कर्तव्या विधेया। सा च वीथिका यदि गेहस्याग्रतः प्राग्भागे भवति, तदा तद्वास्तु सोष्णीषं नाम।

अथ पश्चाद् भवति पश्चिमभागे क्षेत्रस्य तदा तद्वास्तु सायाश्रयं नाम। अथ पार्श्वयोर्दक्षिणो-त्तरयोः स्थिता भवति प्राग् वा पश्चाच्च वा, तदा सावष्टम्भं नाम तद्वास्तु। अथ समन्ताच्चतसृष्वपि दिक्षु भवति , तदा तद्वास्तु सुस्थितं नाम। एताः सर्वाः शास्त्रज्ञैर्वास्तुलक्षणविद्भिः पूजितां प्रशंसिता इति। तथा च किरणाख्ये तन्त्रे-

यः शालायास्तृतीयांशस्तेन कार्या तु वीथिका।
यद्यग्रतो भवेद्वीथी सोष्णीषं नाम तद् गृहम्।।
पश्चात्सायाश्रयं नाम सावष्टम्भं तु पार्श्वयोः।
समन्ताद्यदि जाता सा तदा सुस्थितमुच्यते।। इति।।[1]

समस्तवास्तुनि भूमिकाप्रमाणमाह-

विस्तारषोडशांशः सचतुर्हस्तो भवेद् गृहोच्छ्रायः।
द्वादशभागेनोनो भूमौ भूमौ समस्तानाम्।।२२।।

वास्तुनि यो विस्तार उक्तस्तस्यः यः षोडशभागः सचतुर्हुस्तः चतुर्हस्ताधिको गृहस्योच्छ्रायो भवति, अधस्तनभूमिकायामुच्छ्राय औच्च्यं भवतीत्यर्थः। यथा नृपगृहस्याष्टाधिकं हस्तशतं पृथुत्वम्, अतः षोडशांशो हस्ताः षडङ्गुलान्यष्टादश एव चतुर्हस्ताधिका हस्ता दश एतदधस्तनभूमिकाप्रमाणम्। एवमन्यत्रापि ज्ञेयम्। तदुपरि या भूमिका सा तद्द्वादश-भागोना कार्या। प्रथम भूमिकाप्रमाणातदद्वा-दशभागमपास्य यद् भवति तेन प्रमाणेनेत्यर्थः। एवमेतस्या अप्युपरि या भूमिका सा तद्द्वादशभागोना कार्या। एवं समस्तानां सर्वासां भूमिकानां द्वादशभागेनोनं प्रमाणमुपर्युपरि कार्यमित्यर्थः।।

भित्तिप्रमाणज्ञानं पक्वेष्टकादारुकृतानां च विशेषमाह-

व्यासात् षोडशभागः सर्वेषां सद्मनां भवति भित्तिः।
पक्वेष्टकाकृतानां दारुकृतानां तु न विकल्पः।।२३।।

सर्वेषां नृपाद्यानां पारशवान्तानां सद्मनां गृहाणां व्यासाद्विस्ताराद्यः षोडशभागः षोडशांशः स भित्तिप्रमाणं भवति। यथा नृपगृहस्य व्यासस्याष्टाधिकशतस्य षोडशभागः षड्ढस्ता अष्टादशाङ्गुलान्ये-तद्भित्तिप्रमाणम्। एवमन्येषामपि ज्ञेयम्। तथा च गर्गः-

---

१. किरणाव्येतन्त्रे- वा.वि. अ. ५३ श्लोक २०-२१

विस्तारशोऽशांशेन गृहभित्तिं प्रकल्पयेत्।
हीनाधिका न कर्तव्या गृहभर्तुर्न शोभना।।

एतद्भित्तिप्रमाणं तत्पक्वेष्टकाकृतानां वास्तूनाम्, अन्येषां दारुकृतानां तु वास्तूनां न विकल्पः, नेयं विकल्पना। तेषां यथेच्छं कार्यम्। न केवलं भित्तिप्रमाणं यावत् पृथुत्वदैर्घ्यत्वोच्छ्रायाश्च यथाऽभिमताः कार्या इति। तथा च किरणाख्ये तन्त्रे –

पक्वेष्टानामयं व्यासो दारुजानां यथेच्छाया।
द्विजाद्येव गृहं कार्य तत् स्याच्छुभं स्वदिग्गतम्।।
नवत्रयोदशाद्यैश्च करैर्ज्ञात्वा प्रकल्पयते।। इति।।

नृपबलेशद्वारेण चातुर्वर्ण्यविवर्जितानां सर्वेषां वास्तूनां द्वारप्रमाणज्ञानमाह-

एकादशभागयुतः ससप्ततिर्नृपलेशयोर्व्यासः।
उच्छ्रायोऽङ्गुलतुल्यो द्वारस्यार्धेन विष्कम्भः।।२४।।

अत्र नृपबलेशग्रहणमुपलक्षणार्थम्। नृपो राजा। बलेशः सेनापतिः। नृपबलेशयोरन्यस्य वा यस्य कस्यचिच्चातुर्वण्यविवर्जितस्य यो व्यासो गृहविस्तारः स एकादशभागयुतः स्वकीयेनैकादशभागेन युक्तः ससप्ततिः सप्तत्या सहितः कार्यः। एवं कृते यद्भवति तावन्त्यंगुलानि द्वारस्योच्छ्रायः, औच्च्यमित्यर्थः। यथा नृपव्यासोऽष्टिाधिकं हस्तशतमस्यैकादशभागोऽर्धाधिकाद्दश, तत्सहितमष्टाधिकं शतं तच्च सप्तत्यधिक-मष्टाशीत्यधिकं शतम्। एतावन्त्यङ्गुलानि द्वारोच्छ्रायः। यत उक्तमुच्छ्रायोऽङ्गुलतुल्यो द्वारस्य। एवमन्येषामपि ज्ञेयम्। अर्धेन विष्कम्भ इति। अस्मादुच्छ्रायादर्धेन विष्कम्भो विस्तारः कार्यः। यथा- नृपगृहद्वारस्यं नवनवत्यङ्गुलानि विस्तारः। एवमन्येषामपि ज्ञेयम्।।

चातुर्वर्ण्यस्य द्वारप्रमाणमाह-

विप्रादीनां व्यासात् पञ्चांशोऽष्टादशाङ्गुलसमेतः।
साष्टांशो विष्कम्भो द्वारस्य त्रिगुण उच्छ्रायः।।२५।।

विप्रादीनां ब्राह्मणादीनां वर्णानां ब्राह्मणक्षत्रियवैश्यशुद्राणां व्यासाद्विस्ताराद्यः पञ्चांशः पञ्चमो भागः स चाष्टादशभिरङ्गुलैरधिकः कार्यः। ततः पुनरस्य योऽष्टांशस्तेन युतं कृत्वा यद्भवति तावन्त्यङ्गुलानि द्वारस्य विष्कम्भो विस्तारः कार्यः। यथा- ब्राह्मणाव्यासो द्वात्रिंशते।

अस्य पञ्चांशः षड्ढस्ताः। एते अङ्गुलत्वेन परिकल्प्याः। अष्टादशाङ्गुलसमेतश्चतुर्विंशतिः। पुनरस्यां अष्टांशेनाङ्गुलत्रितयेन युता सप्तविंशतिरेतद्वि-ष्कम्भप्रमाणम्। विष्कम्भात्त्रिगुणादुच्छ्राय इति।।

शाखोदुम्बराणां बाहुल्यं पृथुत्वं च स्तम्भस्याग्रमूलयोः प्रमाणमाह-

उच्छ्रायहस्तसंख्यापरिमाणान्यङ्गुलानि बाहुल्यम्।

शाखाद्वयेऽपि कार्यं सार्धं तत् स्यादुदुम्बरयोः।।२६।।

द्वारोच्छ्रायस्य यावती हस्तसङ्ख्या तावन्त्यङ्गुलानि बाहुल्यं घनत्वं शाखाद्वयेऽपि कार्यम्। शाखा द्वारिका। अपिशब्दः सम्भावनायाम्। बहुष्वप्येवमेवेति। यथा नृपगृहद्वारस्योच्छ्रायोऽङ्गुला-नामष्टाशीत्यधिकं शतम्। अतो हस्ता अर्धाधिकेनाष्टौ भवन्ति। एतावन्त्यङ्गुलानि शाखाद्वये बाहुल्यम्। एवमन्यत्रापि।

सार्धं तत्स्यादुदुम्बरयोरिति। तच्छाखाबाहुल्यं सार्धं सार्धकमुदुम्बरयोः प्रमाणं स्याद् भवेत्। यथाऽत्र नृपगृहे सार्धकं शाखाबाहुल्यं द्वादशाङ्गुलान्येवमन्यत्र। उदुम्बरौ शाखयोरूपर्यधः स्थिते काष्ठे देहलीनिटालाख्ये।।

उच्छ्रायात् सप्तगुणादशीतिभागः पृथुत्वमेतेषाम्।

नवगुणितेऽशीत्यंशः स्तम्भस्य दशांशहीनोऽग्रे।।२७।।

उच्छ्रायात् सप्तगुणादिति। द्वारस्य य उच्छ्रायस्तस्मात् सप्तगुणाद्योऽशतिभागोऽशीत्यंशः ततुल्यं पृथुत्वं विस्तृतत्वमेतेषां शाखोदुम्बराख्ये कार्ये। यथा- नृपद्वारोच्छ्रायोऽष्टाशीत्यधिक-मङ्गुलशतम्, अस्मात् सप्तगुणादशीतिभागः षोडश सार्धाङ्गुलानि। एतत्सर्वेषां पृथुत्वम्। एवमन्यत्रापि।

नवगुणिता इति। स्तम्भोच्छ्राये नवगुणिते नवाहते योऽशीत्यंशोऽशीतितमो भागस्तत् प्रमाणं स्तम्भस्य मूले पृथुत्वम्, तदेव स्वदशांशोनमग्रे पृथुत्वं स्तम्भस्य। यथा नृपगृहेऽधस्तनभूमिकाप्रमाणे दश हस्ता अष्टादशाङ्गुलानि। एतदेव स्तम्भयौच्छ्र्यम्। अस्मान्नवगुणिादशीत्यशंः अष्टाविंशत्येतदङ्गुलानि। एतदेव स्तम्भस्यौच्छ्र्यम्। अस्मान्नवगुणिता-दशीत्यंशः अष्टाविंशत्येतदङ्गुलानि। एतन्मूले पृथुत्वम्। तदेव स्वदशांशोनमग्रे पृथुत्वम्। अतिस्त्रगुणः परिधिः। एतदुदाहरणमात्रेण प्रदर्शनम्। अन्यथा स्तम्भं विभज्य नवधा वहनं भाग इत्यनया परिभाषया यो मध्यभागः समचतुरस्त्रादिकस्तस्यैष विभागो ज्ञेय इति।।

स्तम्भादीनां नामाह-

समचतुरस्त्रो रुचको वज्रोऽष्टास्त्रिर्द्विवज्रको द्विगुणः।

द्वात्रिंशता तु मध्ये प्रलीनको वृत्त इति वृत्तः।।२८।।

स्तम्भो मध्ये मध्यभागे समचतुरस्त्रः, समाभिस्तुल्याभिश्चतसुभिरस्त्रिभिर्युक्तः स रुचकनामा। यस्य मध्ये समा अष्टास्त्रिः स वज्रनामा। यस्य मध्ये द्विगुणः समाभिः षोऽशभिरस्त्रिभिर्युक्तः स द्विवज्रनामा। अष्टास्त्रापेक्षया द्विगुणः। यश्च मध्यऽस्त्रीणां द्वात्रिंशता युक्तः स प्रलीनकनामा। यश्च मध्ये वृत्तः परिवर्तुलः स वृत्तसंज्ञः। एते पञ्च स्तम्भाः। सर्व एव स प्रशस्तफलाः। अतोऽन्ये नेष्टा इत्यर्थाद्विज्ञेयाः। अत्र मध्यग्रहणं किमर्थं कुतमुभयतः स्तम्भं विभव्य नवधेत्यनेनाध-ऊर्ध्वभागयो रचना भविष्यतीति। तथा च किरणाख्ये तन्त्रे-

स्तम्भस्याधरोर्ध्वभागयो रचनाप्रदर्शनार्थमाह-

स्तम्भं विभज्य नवधा वहनं भागो घटोडस्य भागोऽन्यः।

पद्मं यथोत्तरोष्ठं कुर्याद् भागेन भागेन ः।।२९।।

स्तम्भं स्तम्भप्रमाणं नवधा नवभिर्भागैर्विभज्य पृथक्पृथग्नभागे विभक्तं कृत्वा तत्र सर्वाधोभागे वहनं कार्यम्। उह्यते धार्यते भूमौ येन स्तम्भागेन तद्वहनम्। अस्य भागस्यो पर्यन्यो यो द्वितीयो भागः स घटस्ततोऽन्यः पद्मं कमलं पद्माकारमेव कार्यम्। तथा तेनैव प्रकारेण पद्मस्योपरि यो नवमो भागः से उत्तरोष्ठः कार्य। उत्तरोष्ठो यत्र शोभार्थं रूपकविशेषाः क्रियन्ते। एवं पद्मं भागेनोत्तरोष्ठं च भागेन कार्यम्। केचिदुत्तरोष्ठमष्टमभागे नवमे कमलमितीच्छन्ति। एतदुक्तं भवति- नवधा विभक्ते स्तम्भेऽधरोर्ध्व-भागचतुष्केऽधो हिरण्यादीनि कार्याणि, शेषं भागपञ्चकं समचतुरस्त्रादिकं कार्यम्। तथा च किरणाख्ये तन्त्रे-

भारतुलातुलोपतुलानां च प्रमाणमाह-

स्तम्भसमं बाहुल्यं भारतुलानामुपर्युपर्यासाम्।

भवति तुलोपतुलानामूनं पादेन पादेन।।३०।।

भारं तोलयन्तीति भारतुलाः। स्तम्भस्योपरि यत्तिर्यक् कृत्वा काष्ठं दीयते तद्भारतुलासंज्ञम्। प्रासादादिषु स्तम्भानां बहुत्वाद् भारतुला इति बहुवचननिर्देशः कृतः। भारतुलाया उपरि यदन्यत् काष्ठं दीयते तत्तुलोपतुलासंज्ञम्। भारतुलानां स्तम्भसमं स्तम्भप्रमितं बाहुल्यं घनत्वं कार्यम्। यथा नृपगृहे स्तम्भस्य पृथुत्वमष्टाविंशत्यङ्गुलानि, तदेव भारतुलानाम्। एवमन्यत्र।

आसां भारतुलानामुपर्युपरि यास्तुलोपतुलास्तासां ताभ्यः सकाशात् पादोनं बाहुल्यं कार्यम्। यथा नृपगृहे एकविंशत्यङ्गुलम्। अन्यत्र पादेन चतुर्भागेनोनं कार्यम्। वीप्साकरणात् केचिच्चतस्त्र इति वर्धयन्ति। भारतुला उपतुला तुलोपतुला चेति। आसां भारतुलातः पादेन पादेनोनं बाहुल्यं कार्यम्। ताश्चोपर्युपरि दीयन्त इति।।

अत्र वास्तुकरेण पञ्च चतुः शालगृहाणि भवन्ति, सर्वतोभद्रनन्द्यावर्तवर्धमान-स्वस्तिकरुचका-ख्यानि। तत्रादावेव सर्वतोभद्रस्य लक्षणमाह-

अप्रतिषिद्धालिन्दं समन्ततो वास्तु सर्वतोभद्रम्।
नृपविबुधसमूहानां कार्यं द्वारैश्चतुर्भिरपि।।३१।।

यस्मिन् वास्तुन्यलिन्दानां गमनिकानां प्रतिषेधो विच्छितिर्नास्ति समन्ततः सर्वासु दिक्षु, तद्वास्तु सर्वतोभद्रसंज्ञम्। तच्च नृपाणां राज्ञां विबुधसमूहानां द्रेवन्दानां कार्यं विधेयम्। चतुर्भिर्द्वारैरुपलक्षितं चतसृष्वपि दिक्षु तत्र द्वाराणि कार्याणीत्यर्थः। तथा च गर्गः-**बृ.सं., पृ-१६**

सर्वतोभद्रम्

पूर्वा



नन्द्यावर्तस्य लक्षणमाह-

नन्द्यावर्तमलिन्दैः शालाकुड्यात् प्रदक्षिणान्तगतैः।
द्वारं पश्चिममस्मिन् विहाय शेषाणि कार्याणि।।३२।।

नन्द्यावर्तम्

पूर्वा



शालाकुड्यात् शालाभित्तेरारभ्य प्रदक्षिणान्तगतैरलिन्दैर्नन्द्यावर्तनाम वास्तु। प्रादक्षिण्येनान्तं ये गता अलिन्दास्तैरुपलक्षितै :। चतसृष्वपि शालासु शालाप्रदक्षिणान्त-गतास्तत्रालिन्दा भवति। अस्मिन्नन्द्या-वर्तिनि पश्चिमद्वारं विहाय त्यक्त्वा शेषाण्यन्यानि त्रीणि द्वाराणि पुर्वदक्षिणोत्तराणि कार्याति। तथा च गर्गः- **बृ.सं., पृ-१८**

वर्धमानस्य लक्षणमाह-

द्वारालिन्दोऽन्तगतः प्रदक्षिणोऽन्यः शुभस्ततश्चान्यः।

तस्मिंश्च वर्धमाने द्वारं तु नदक्षिणे कार्यम्।। ३३ ।।

प्रधानवास्तुनो यद्द्वारन्तत्र योऽलिन्दः स द्वारालिन्दः। स चान्तगतः कार्यः। दक्षिणोत्तर-शालासंलग्न इत्यर्थः। अन्यो द्वितीयोऽलिन्दः प्रदक्षिणः प्रादक्षिण्येन गतः, स च शुभः शोभनः। ततश्चान्यस्तस्मात्प्रदक्षिणादन्तर्गत एव। एवंविधैरलिन्दैरुलक्षितो वर्धमानः तस्मिन् वर्धमाने दक्षिणं द्वारं न कार्यम्। अन्यानि त्रीणि पूर्वपश्चिमोत्तराणि कार्याणि। तथा च गर्ग-ः- **बृ.सं., पृ-१८**



स्वस्तिकलक्षणमाह-

अपरोऽन्तगतोऽलिन्दः प्रागन्तगतौ तदुत्थितौ चान्यौ।

तदवधिविधृतश्चान्यः प्राग्द्वारं स्वस्तिके शुभदम्।।३४।।

स्वस्तिकेऽपरः पश्चिमोऽलिन्दोऽन्तगतः कार्यो दक्षिणोत्तरशालासंलग्नः। अन्यौ तु दक्षितोत्तरौ द्वावलिन्दौ तदुत्थितौ तस्मात् पश्चिमादलिन्दादुत्पन्नौ प्राक्पूर्वस्यां दिश्यन्तगतौ शालासंलग्नौ कार्यौ। अन्यश्चतुर्थः पूर्वोऽलिन्दस्तदवधिविधृतस्तयोरवधौ मध्ये विधृतः स्थित इत्यर्थः। एवं स्वस्तिकं प्राग्द्वारं शुभदं पूर्वस्यां दिशि द्वारं तस्मिन कार्यम्, नान्यत्र क्वचिदिति तथा च गर्गः। **बृ.सं., पृ-१९**

स्वस्तिकम्



रुचकलक्षणमाह-

प्राक्पश्चिमावलिन्दावन्तगतौ तदवधिस्थितौ शेषौ।

रुचके द्वारं न शुभदमुत्तरतोऽन्यानि शस्तानि।।३५।।

रुचके प्राक्पश्चिमौ पूर्वापरौ द्वावलिन्दावन्तगतौ शेषौ, तयोरवधौ मध्ये स्थितौ तत्संलग्नावित्यर्थः। एवं रुचके द्वारमुत्तरं न शुभदम्। अन्यानि त्रीणि पूर्वदक्षिणपश्चिमानि शस्तानीति। तथा च गर्गः- **बृ.सं., पृ-२०**

रुचकम्

पूर्वा



तेषां पञ्चानां चतुः शालानां फलान्याह-

श्रेष्ठं नन्द्यावर्तं सर्वेषां वर्धमानसंज्ञं च।

स्वस्तिकरुचके मध्ये शेषं शुभदं नृपादीनाम्।।३६।।

सर्वेषां वर्णानां नन्द्यावर्तं चतुः शालं श्रेष्ठं प्रशस्तम्। वर्धमानसंज्ञं वर्धमानाख्यं च। चशब्दाच्छ्रेष्ठमेव। स्वस्तिकरुचके सर्वेषामेव मध्ये मध्यफले, न शुभे नाप्यशुभे इत्यर्थः। शेषं सर्वतोभद्रसंज्ञं चतुः शालं नृपादीनां राज्ञां राजमन्त्रिणां राजाश्रितानां देवानां च शुभम्,नान्येषामिति।।

त्रिशालानां हिरण्यनाभसुक्षेत्रचुल्लीपक्षध्यानां लक्षणमाह-

उत्तरशालाहीनं हिरण्यनाभं त्रिशालकं धन्यम्।

प्राक्शालया वियुक्तं सुक्षेत्रं वृद्धिदं वास्तु।।३७।।

याम्याहीनं चुल्ली त्रिशालकं वित्तनाशकरमेतत्।

पक्षध्नमपरया वर्जितं सुतध्वंसवैरकरम्।।३८।।

उत्तरशालया यद्विहीनम्। अन्यासु तिसृषु दिक्षु शाला भवन्ति। केवलयोत्तरया रहितं तत्त्रिशालकं हिरण्यनाभाख्यम्, तच्च धन्यं प्रशस्तम्। एवं प्राक्शालया पूर्वशालया वियुक्तं रहितं तत्त्रिशालं सुक्षेत्रं नाम वास्तु, तच्च वृद्धिं धनसुतादीनां ददाति।

याम्याहीनं दक्षिणस्यां दिशि रहितं तच्चुल्लीसंज्ञे त्रिशालम्। एतच्च वित्तस्य धनस्य नाशकरं क्षयावहम्। अपरया पश्चिमशालया यद्विवर्जितं तत्पक्षध्नं पक्षध्नंसंज्ञम्, तच्च सुतध्वंसवैरकरम्- सुतानां पुत्राणां ध्वंसं विनाशं वैरं च करोति। एषां विन्यासः सुगमत्वान्न प्रदर्शितः। यतश्चतुः शालाकृतिरे-वालिन्दवर्जिता एकादिगृहीतेति। तथा च किरणाख्ये तन्त्रे।

द्विशालानां सिद्धार्थयमसूर्यदण्डवाताख्यचुल्लीकाचानां लक्षणं सफलमाह-

सिद्धार्थमपरयाम्ये यमसूर्यं पश्चिमोत्तरे शाले।

दण्डाख्यमुदक्पूर्वे वाताख्यं प्राग्युता याम्या।।३९।।

पूर्वापरे तु शाले गृहचुल्ली दक्षिणोत्तरे काचम्।

सिद्धार्थेऽर्थावाप्तिर्यमसूर्ये गृहपतेर्मृत्युः।।४०।।

दण्डवधो दण्डाख्ये कलहोद्वेगः सदैव वाताख्ये।

वित्तविशानश्चुल्यां ज्ञातिविरोधः स्मृतः काचे।।४१।।

अपरयाम्ये पश्चिमदक्षिणे द्वे शाले यत्र भवतस्तद् द्विशाल सिद्धांर्थसंज्ञम्। एवं पश्चिमोत्तरे यत्र शाले तद्यमसूर्यम्। उदक्पूर्वे उत्तरपूर्वे यत्र दे शोले विद्येते तद्दण्डाख्यम्। प्राग्युता याम्या पूर्वयुक्ता दक्षिणा यत्र भवति, तद्वाताख्यं वातसंज्ञम्। पूर्वापरे पूर्वपश्चिमे यत्र द्वे शाले विद्येते तद् गृहचुल्ली नाम द्विशालम्। एवं दक्षिणोत्तरशालं तत्काचं नाम द्विशालम्।

एषा द्विशालानां फलान्याह- सिद्धार्थेऽर्थावाप्तिरिति। सिद्धार्थसंज्ञे द्विशालेऽर्थावाप्तिर्ध-नलब्धिर्भवति स्वामिनः। यमसूर्ये तद्गृहपतेर्गृहनाथस्य मृत्युर्मरणं भवति।

दण्डाराख्ये दण्डसंज्ञे द्विशाले दण्डवधः। दण्डताडनेन वधो मरणम्। अथवा दण्डश्च वधश्च दण्डवधाविति केचित् पठन्ति। दण्डोऽर्थाय कर्षणाम्, वधस्ताडनं तो द्वावेव भवतः। वाताख्ये वातसंज्ञे सदैव सर्वकालं कलहोद्वेगश्चितशोकः। चुल्ल्यां वित्तस्य धनस्य विनाशः। काचे ज्ञातिविरोधो बन्धुभिः सह द्वेष इति स्मृतः। तथा च किरणाख्ये तन्त्रे।

अथ विश्वकर्ममयकामादिभिरेकैकस्मिन् वास्तुनि योऽर्थो महता ग्रनथसन्दर्भेण चोक्तः, स एवाचार्येण गृहीतशास्त्रेण महाग्रन्थभीरुणा समासोक्तिप्रियेणैकैकेनैवापादकेनार्थो निर्दिष्टाः। तथा च हिरण्यगर्भेण गुहाणां विंशत्यधिकं शतमुक्तम्। तथा चाह-

आचार्येण चतुः शालत्रिशालद्विशालानि पञ्चदश गृहाण्यभिहितानि। विश्वकर्मादीनां चोक्तिभिरनु-पन्यस्यमानाभिः स्पष्टार्थोऽभिधातुं न शक्यते। तद्युक्त्युपन्यासो वा क्रियते, तदा हि विस्तरोक्तिः स्यात्। अतिविस्तरोक्तिश्च न गृह्यते। तथा च चिकित्साशास्त्रे चरके पठ्यते पराधिकारेषु न विस्तरोक्तिः शस्तेति नो नात्र ततः प्रयत्नः इति।

तस्मात्तात्पर्यार्थोऽभिधीयते- वास्तुनि यो विस्तारः स एव चोच्छ्रायनिश्चयः शुभदः, इत्युक्त-माचार्येण। पुनः स एवाह नेच्छन्ति शास्त्रकारा हस्तशतादुच्छ्रितं परतः। रूपाणामष्टोत्तरशतं गृहविसतारः। गृहविस्तारतुल्यश्च गृहोच्छ्रायः शुभदः। नेच्छन्ति शास्त्रकारा हस्तशादुच्छ्रितं परत इत्यनेन सह विरुध्यते। अत्र केचिदविदितशास्त्रसद्भावा मन्यन्ते। यथा गृहविस्तारतुल्यो गृहोच्छ्रायोऽभिहितो यः स उत्सर्गः। नेच्छन्ति शास्त्रकारा हस्तशतादुच्छ्रितं परत इत्यपवादः। उत्सर्गश्चापवादेन बाध्यते इति। वयं त्वत्र ब्रूमः- विषयविभागेन कल्पना कृता। तत्र नोत्सर्गो न चापवाद इति। आचार्य आह-

विप्रादीनां गृहेषु भूमिकामानमिदं विश्वकर्मणाऽभिहितम्।

अर्धचतुष्कभूमिकं गृहं शूद्राणां कर्तव्यम्, विशामर्धपञ्चकभूमिकम, अर्धष्ठभूमिकं क्षत्रियाणाम्, द्विजानामर्धसप्तमभूमिकम्, अर्धाष्टमभूमिकं नृपाणां कर्तव्यम्। तथा च विश्वकर्माऽऽह- **बृ.सं., पृ-२३**

विश्वकर्मा मन्दधुद्धिप्रबोधनार्थं पुनः स्पष्टतरं साधारणेन हस्तेन गृहोच्छ्रायहस्त-संख्यामाह-

साधारणेन हस्तेन हस्तशतं यत्तत्त्रैराशिकगणनया ज्येष्ठहस्तेनानुमीयमानं सप्ताशीतिर्हस्ताः सार्द्धा भवन्ति, द्वादशभागेनोनो भूमौ भूमौ इत्यनेनापि न्यायेनार्धाष्टमभूमिका हस्ता द्विषष्टिः सार्धा भवन्ति। अथात्रेदं मन्यसे साधारणेन हस्तेन हस्तशतोच्छ्रायं ज्येष्ठाहस्तमितेन हस्ताः सप्ताशीतिः सार्धा भवन्ति। नृपगृहस्योत्तमस्याष्टोत्तरशतविस्तृतस्य

द्वादशभागेनोना भूमौ भूमौ समस्तानामित्यनेन न्यायेन हस्ता द्विषष्टिः सार्धा भवन्ति। एककर्तृकस्यैव ग्रन्थस्यात्रापि भिन्नवाक्यतेति। अत्रोच्यते –

विश्वकर्मणोक्तागृहाणां हस्तद्वयं सार्धं पीठोच्छ्रायमुक्तम्। भूमिकान्तरे काण्डोच्छ्राय-पांशुकस्तरवर-डिकादिभिः सहितमेव मानं भवति, तस्मात् पुनरुक्तदोषो नात्रावगम्यत इति। द्वित्रिचतुः शालेषु गृहेषु भूमिकोच्छ्रायनियमोऽवगन्तव्यः। एकशालेषु व्यासतुल्यगृहोच्छ्रायः शस्यते, न द्वित्रिचतुशालेषु। तथा च शक्र आह-

आचार्येण त्वेकशाले गृहे व्यासतुल्य उच्छ्रायोऽभिहितः। व्यासद्विगुणश्चायामः। एकशालं विप्रादीनां न क्रियते, द्वित्रिचतुः शाला एव क्रियन्ते। तथा च वृद्धगर्गः- **बृ.सं., पृ-२४**

इत्यत्रापिशब्दश्चकारको द्रष्टव्यः।

विस्ताराद् द्विगुणितं च तेष्वेकशालेषु दैर्ध्यं कर्त्तव्यम्.। त्रित्रिद्विद्विद्विशमाः क्षयक्रमादङ्गुलानि चैतेषाम् इत्यत्र सन्दिह्यते किमष्टयवेनाङ्गुलेन चतुर्विंशत्यङ्गुलैर्या हस्तः स सम इति। विश्वकर्मणा त्रिविधो हस्त उच्यते-

तत्राष्टयवाङ्गुलः प्रशयाख्यः, सप्तयवाङ्गुलः साधारणः षडयवाङ्गुलः शमाख्य इति। अत्रोच्यते- आचार्येण शब्दाभिधानसामान्येनैव हस्तः शमोऽभिहितः। अन्यश्च विश्वकर्मणा त्रिविधस्यापि हस्तस्य प्रत्येकं कर्म प्रदर्शितम्। तत्राप्यष्टयवेनैवांगुलेन यो हस्तस्तेन गृहकर्मोक्तम्। आह च -

इत्येतन्न, यस्मादाचार्येण शब्दाभिधाने सामान्येनैव शमो हस्ते इत्युक्तः। केचिच्छय इति पठन्ति त्रित्रिद्विद्विद्विशया इति। एतत्प्रागुक्तं लक्षणं शयाख्यस्येति।

इत्यत्र सर्वशब्देनेदं ज्ञापपति, यथा चतुर्वणादिसद्मनां चतुः शालादिगृहाणां विस्तारात् षोडश-भागतुल्या पृथुला भित्तिः पक्वेष्टकाकृतानां कर्तव्या। पक्वेष्टकामेष्टकांसयोग-निषेधस्तन्त्रान्तरे पठयते –

संयोगो वेष्यते, तदा तेनानुक्रमेणेत्यत्र हिरण्यगर्भ आह-

पक्वेष्टाकागृहाणां सुवर्णतुणवस्त्रादिकृतानां हिरण्यगर्भोक्तानां निषेधार्थं मयेन पञ्च प्रकारा उक्ताः-

सवुर्णादिभेदान हिरण्यगर्भ आह-

दारुकृतानां तु न विकल्पः। दारुकृतानाममीषां च सुवर्णादिकृतभित्तिविस्तारविकल्पो नास्त्येव, किं यद्भित्तिविस्तारमेव केवलं दारुसुवर्णादिरचितानां नेतिः उत सर्व एव

स्तम्भभूमिविभागा विकल्पा इति। अत्रोच्यते- सर्व एव विकल्पाः पक्वेष्टकाकृतानां क्रियन्ते, नान्येषाम्। दारुकृतादीनां तु पुनर्देवतानिवेश-भोजनदेवागारमहानसादिनिवेशमात्रमेव क्रियते, नान्यदिति। तथा च तन्त्रान्तरे पठयते-

अधुनैकाशीतिपदस्य क्षेत्रस्य विभागप्रदर्शनार्थमाह-

एकाशीतिविभागे दश दश पूर्वोत्तरायता रेखाः।

अन्तस्त्रयोदश सुरा द्वात्रिंशद्वाह्यकोष्ठस्थाः।।४२।।

एकाशीतिपदविभागार्थं क्षेत्रे दश रेखाः पूर्वापरायता दश दक्षिणोत्तरायताश्च कार्याः। एवं कृते एकाशीतिपदं क्षेत्रमुत्पद्यते। अस्य क्षेत्रस्यान्तर्मध्ये त्रयोदशसुराः देवाः स्थिताः। बाह्यकोष्ठस्था बहिष्कोष्ठेषु स्थिता द्वात्रिंशत्। एवं पञ्चत्वारिशत् सुरा अत्र क्षेत्र इति।।

तत्र द्वात्रिंशद्वाह्यकोष्ठस्थान् सुरानाह-

शोषोऽथ पापयक्ष्मा रोगः कोणे ततोऽहिमुख्यौ च।

भल्लाटसोमभुजगास्ततोऽदितिर्दितिरिति क्रमशः।।४३,४४,४५।।

ऐशानीं दिशमादितः कृत्वा क्रमशः क्रमेण कोष्ठकेषु शिख्याद्या देवा स्थिताः। तद्यथा- ऐशान्यां शिखी, केषाञ्चित् पक्षे शिखाः। ततः परं तिर्यक्कृत्व द्वितीयकोष्ठके पर्जन्यः। ततो जयन्तः। तत इन्द्रः। ततः सूर्यः। ततः सत्यः। ततो भृशः। ततोऽन्तरिक्ष इति। दक्षिणपूर्वे कोणे आग्नेय्यां दिश्यनिलो वायुः केषाञ्चित् पक्षेऽनलोऽग्निः।

अनिलादनन्तरं क्रमेण दक्षिणस्यां दिशि पूषादयः स्थिताः। तद्यथा- पूषानन्तरं ततो वितथः। ततो बृहत्क्षतः, केषाञ्चित् पक्षे बृहत्क्षतिः। ततो यमः। ततो गन्धर्वाख्यः। ततो भृङ्गराजः। ततो मृगः। पित्रादयः पश्चिमायाम्। तद्यथा- पिता नैर्ऋतकोणे। ततोऽनन्तरं दौवारिकः। ततः सुग्रीवः। ततः कुसुमदन्तः। ततोऽम्बुपतिर्वरुणः। ततोऽसुरः।

ततः शोषः। अथानन्तरं पापयक्ष्मा। रोगः कोणे पश्चिमोत्तरे। तत उत्तरस्यां दिश्यहिः सर्पः। ततो मुख्यः। ततो भल्लाटः। ततः सोमः। ततो भुजगः। ततोऽदितिः। ततो दितिरित्यनेन प्रकारेण क्रमशः परिपाट्या देवाः स्थिता द्वात्रिंशत्।।

अभ्यन्तरस्थितान् त्रयोदशाह-

विबुधाधिपतिस्तस्मान्मित्रोऽन्यो राजयक्ष्मनामा च।

पृथिवीधरापवत्सावित्येते ब्रह्मणः परिधौ।।४६, ४७।।

आपो नामैशाने कोणे हौताशने च सावित्रः।

जय इति च नैर्ऋते रुद्र आनिलेऽभ्यन्तरपदेषु।।४८।।

वास्तुपुरुषस्योत्पत्तिः कथम् अभूत् इति मत्स्यपुराणानुसारम् -

तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम्।

पुरान्धकवधे घोरे घोररूपस्य शूलिनः।।

ललाटस्वेदसलिलमपतद् भुवि भीषणम्।

करालवदनं तस्माद् भूतमद्भुमुल्बणम्।।

ग्रसमानमिवाकाशं सप्तद्विपां वसुन्धराम्।

ततोऽन्धकानां रुधिरमपिबत् पतितं क्षितौ।।

प्रसीदध्वं सुरा सर्वे युष्माभिर्निश्चलीकृतः।

स्थाम्यहं किमाकारो ह्यवष्टब्धो ह्यधोमुखः।।[१]

मध्ये मध्यमागे ब्रह्मा पितामहो नवानां कोष्ठकानामधिपः स्वामी। अस्य ब्रह्मणः। अर्यमा प्राच्यां पूर्वस्यां दिशि स्थितः। अस्मादर्यम्ण एकान्तरादेकपदव्यवहितात् प्रदक्षिणं प्रादक्षिण्येन सवितृप्रभृतयः स्थिताः। तद्यथा- अर्यम्ण एकपदव्यवहितः सविता। तत एकपदव्यवहितो विवस्वान्।

ततोऽपि विबुधाधिपतिरिन्द्रः। तस्मादन्यो मित्रस्ततो राजयक्ष्मा नाम। ततः पृथिवीधरः। तत आपवत्स इत्येवं प्रकारा अष्टौ देवा एकान्तराद् ब्रह्मणः परिधिं व्याप्य स्थिताः।

ऐशाने कोणे पर्जन्याध आपो नाम स्थितः। हौताशने आग्नेये कोणे अन्तरिक्षस्याधः सावित्रः स्थितः। नैर्ऋते कोणे दौवारिकस्याधो जयः स्थितः। आनिले वायव्ये कोणे पापयक्ष्मणोऽधोभागे रुद्रः स्थितः। एते सुरा अभ्यन्तरपदेष्वैशानादिषु। यतो बाह्मपदेषु शिख्यादयः स्थिताः।।

अथात्र स्थितानां देवतानां पदसंख्याप्रदर्शनार्थमाह-

आपस्तथापवत्सः पर्जन्योऽग्निर्दितिश्च वर्गोऽयम्।

एवं कोणे कोणे पदिकाः स्युः पञ्च पञ्च सुराः।। ४९।।

---

१. मत्स्यपुराणम् , अ.२५२.५-७,१५-१६

बाह्या द्विपदाः शोषास्ते विबुधा विंशतिः समाख्याताः।

शेषाश्चत्वारोऽन्ये त्रिपदा दिक्ष्वर्यमाद्यास्ते।।५०।।

आप एकः आपवत्सो द्वितीयः पर्जन्यस्तृतीयः, अग्निश्चतुर्थः, दितिः पञ्चमः। अयं वर्गः समूह एकपदिक एकैकस्मिन् पदे। एवमनेन क्रमेण कोणे कोणेऽश्यामश्यां पञ्च पञ्च सुरा देवाः पदिका एकपदास्वामिनः स्युर्भवेयुः। तद्यथा- आपः, आपवत्सः, पर्जन्यः, अग्निः, दितिरित्यैशानकोणे एकपदिकाः, सविता, सावित्रः, अर्यमा , अन्तरिक्षः, पूषा इति पञ्चाग्नेयकोणे एकपदिकाः, विबुधाधिपतिः, जयः, दौवारिकः, पिता, मृग इति पञ्च नैर्ऋतकोणे एकपदिकाः, राजयक्ष्मा, रुद्रः, पापयक्ष्मा, रोगः, अहिरिति वायवीये कोणे पञ्चैकपदिकाः।

शेषा बाह्यकोष्ठेषु स्थिता विबुधा देवा द्विपदाः। पदद्वयस्वामिनस्ते च विंशतिः, समाख्याताः। तद्यथा- जयन्तेन्द्रसूर्यसत्यभृशाः पूर्वस्यां दिशि द्विपदाः। वितथबृहत्क्षतयमगन्धर्वाख्यभृङ्गराजा दक्षिणस्यां द्विपदाः। सुग्रीवकुसुमदन्ताम्बुपत्यसुरशोषाः पश्चिमायां द्विपदाः। मुख्यभल्लाटसोमभुजगादितय उत्तरस्यां द्विपदाः। एवं विंशतिर्द्विपदाः। शेषाश्चत्वारोऽन्ये त्रिपदा इति। उक्तेभ्योऽन्ते शेषा ये चत्वारो विबुधा अर्यमाद्या दिक्षु प्रागद्यासु ब्रह्मणः स्थितास्ते च त्रिपदास्त्रिषु पदेषु स्वामिनः। तद्यथा- अर्यमा विवस्वान मित्रः पृथिवी-धरश्चेत्येते त्रिपदाः स्वपदात् पार्श्वद्वये एतेषामन्यत्पदद्वयमिति। तथा च पराशरः- **बृ.सं., पृ-२९**

तत्र बहिर्देवताः प्राक्पर्जन्यकरग्रहमहेन्द्ररविसत्यभृशान्तरिक्षपवनाः। दक्षिणतः पूषावितथबृहत्क्षतयमभृङ्गगन्धर्वमृगपितरश्चेति। पश्चिमतो दौवारिकसुग्रीवपुष्पदन्तासुरवारुणय-क्षरोगशोषाश्चेति। उदङ्नागराज-मुख्यभल्लाटसोमादितिकुबरेनागहृतवरहाः। तन्मध्ये ब्रह्मा तत्पुरतोऽर्यमा दक्षिणतो विवस्वान्मित्रः प्रत्युदक् पृथ्वीधर इति ब्राह्मपदानुषङ्गिणोऽष्टावन्ये। आपापवत्सावैशान्यां सावित्रसवितारावेवाग्नेय्यां जयेन्द्रौ नैर्ऋत्यां रुद्रवायुं वायव्यामिति सर्वदेवताः पञ्चचत्वारिंशदिति। तथान्यै सहैतेषां पदानामसादृश्यम् इति। तथा च

पुरान्धकवधे शम्भो ललाटात् पतितः क्षितौ।

स्वेदस्तस्मात् समुद्भूतं भूतमत्यन्तंदुसदसहम्।।

गृहीत्वा सहसा देवैर्न्यस्तं भूमावधोमुखम्।

जानुनी कोणयोः पादौ रक्षोदिशि शिवे शिरः।।[1]

---

१. वास्तुमण्डनम्, अ.१.९०-९१

अथास्य वास्तुनरस्याङ्गप्रविभागमाह-

वितथो बृहत्क्षतयुतः पार्श्वे जठरे स्थितो विवस्वांश्च।

ऊरू जानु च जङ्घे स्फिगिति यमाद्यैः परिगृहीताः।। ।।

एते दक्षिणपार्श्वे स्थानेष्वेवं च वामपार्श्वस्थाः।

मेढ्रे शक्रजयन्तौ हृदये ब्रह्मा पिताऽङ्घ्रिगतः।।५१,५२,५३, ५४।।

पुरान्धकवधे रुद्रः ललाटात् पतितः क्षितौ।

स्वेदस्तस्मात् समुद्भूतं भूतमत्यन्त दुसहम्।

गृहीत्वा सहसा देवैर्न्यस्त भूमावधोमुखम्।

जानुनी कोणयोः पादौ २क्षोदिशि शिवे शिरः।।[1]

अयं पुरुषो वास्तुनगरः पूर्वोत्तरदिङ्मुर्धा। पूर्वोत्तरा ऐशानी दिक् तस्यामस्य शिरः। अवाङ्मुखो-ऽधोमुखः स्थितः। अस्य वास्तुनरस्य शिरसि मूर्धनि शिखी अग्निः स्थितः। आपो मुखे वदने। स्तने अस्यार्यमा स्थितः। उरसि वक्षसि आपवत्सः।

पर्जन्याद्याः पर्जन्यप्रभृतयो बाह्या बाह्यकोष्ठस्था यथाक्रमं दृक्श्रवणोरः स्थलांसगा देवाः स्थिताः। तद्यथा- पर्जन्यो दृशि चक्षुषि। जयन्तः श्रवणे कर्णे। इन्द्र उर :स्थले। सूर्योऽसेस्कन्धे। सत्याद्याः पञ्चके सत्यभृशान्तरिक्षानिलपूषणः। एते भुजे बाहौ स्थिताः। हस्ते पाणौ सविता तथा सावित्रश्च स्थितः।

वितथो बृहत्क्षतयुतः पार्श्वस्थितः। विवस्वानादित्यो जठरे उदरे। ऊर्वादयो यमाद्यैः परिगृहीता अधिष्ठिताः। तद्यथा – ऊरुप्रदेशे यमः। जानुनि गन्धर्वः। जङ्घायां भृङ्गराजः। स्फिजि मृगः।

एते यथोद्दिष्टा दक्षिणे पार्श्वे देवाः स्थिताः। एवमनेन प्रकारेणैतेषु स्थानेषु वामपार्श्वे स्थिताः। तद्यथा–वामे स्तने पृथिवीधरः। दितिर्दृशि। अदितिः श्रवणे। भुजग उरस्थले। सोमोंऽसे। भल्लाट-मुख्याहिरोगपापयक्ष्माणो भुजे। रुद्राराजयक्ष्माणौ हस्ते। शोषासुरौ पार्श्वे। ऊरुप्रदेशेऽम्बुपतिः। कुमुमदन्तो जानुनि। सुग्रीवो जङ्घायाम्। दौवारिकः स्फिजि। एवं वामपार्श्वे स्थिताः। मेढ्रे लिङ्गे शक्रजयन्तौ स्थितौ। ब्रह्मा हृदये। पिता अङ्घ्रिगतः पादाश्रितः। एवमेकाशीतिपदे नगरग्रामगृहवास्तुपुरुषे प्रविभागः।।

---

१. प्रासादमण्डनम्, अ.८.९६-९७

अधुना चतुः षष्टिपदस्य वास्तुनरस्य प्रविभागप्रदर्शनार्थमाह-

अष्टाष्टपदमथवा कृत्वा रेखाश्च कोणगास्तिर्यक्।
ब्रह्मा चतुष्पदोऽस्मिन्नर्धपदा ब्रह्मकोणस्थाः।।५५।।
अष्टौ च बहिष्कोणष्वर्धपदास्तुदुभयस्थिताः सार्धाः।
उक्तेभ्यो से शेषास्ते द्विपदा विंशतिस्ते हि।।५६।।

अथाष्टाष्टकपदं चतुः षष्टिपदं क्षेत्रं कारयेत। एतदुक्तं भवति - नव नव पूर्वोत्तरायता रेखाः कृत्वा चतुः षष्टिपदानि भवन्ति। तत्र कोणगास्तिर्यक्वतस्त्रो रेखाः कृत्वा कोणचतुष्टये तिर्यग्रेखाः कोष्ठत्रये मध्यगताः कार्या इति। अस्मिंश्चतुष्पष्टिपदे क्षेत्रे मध्ये ब्रह्मा चतुष्पदः। ब्रह्मकोणस्था अष्टौ विबुधा अर्धपादाः। तद्यथा – आपः आपवत्सः सविता सावित्रो विबुधाधिपतिर्जयन्तो राजयक्ष्या रुद्रश्चेति बहिष्कोणेषु बाह्यकोणेष्वष्टौ स्थिताः। शिख्यन्तरिक्षानिलपितृपापयक्ष्मरोगादितय एते अर्धपदाः। तदित्यनेन शिख्यादीनां एते सार्धपदिकाः। उक्तेभ्यः कथितेभ्यो ये शेषाः परिशिष्टां विंशतिस्ते द्विपदाः। तद्यथा-जयन्तेन्द्रसूर्यसत्यवितथबृहत्क्षतयगमन्धर्वकुसुमदन्ताम्बुपत्यसुरमुख्यभल्लाटसोमभुजगार्यमविवस्वन्मित्रपृथिवीधराः। एते विंशतिर्द्विपदाः। एष चतुषष्टिपदो वास्तुनरः। एतैः केचिद् बृहद्वास्तुनरमिच्छन्ति, तदपि न कश्चिद्दोषः। अनेन प्रविभागेण कोणस्थं द्वारं ज्ञायते निःसन्दिग्धमिति। आत्राचार्येण चतुरस्त्रे क्षेत्रे वास्तुनरः प्रदर्शितः न वृत्तषडश्रयष्टादशा-श्रिषोडशाश्रीणां क्षेत्राणाम्। लोके च गृहग्रामनगराणि दृश्यन्ते। तद्यथा अनेनैवाचार्येणोक्तम्- तत्र षडश्रिर्मेरुः। वृत्तः समुद्गनामा- इत्यादि। तथा भरतमुनिना त्र्यस्त्रं वृत्तं गुहमृक्तम्। तस्मादन्यशास्त्रादानीय प्रसङ्गा दस्माभिरिह प्रदर्श्यते-तद्यथा -

वृतोऽहं यत् ततो नाम्ना वासतुकोऽसि तथास्तु ते।
वसन्तु च त्वयि प्रीताः शतानन्दादिदेवताः।
अद्यप्रभृति भूलोके दैवं वान्यच्च मानुषम्।
कुर्वते वास्तु वासार्थं प्रथमं त्वां यजन्तु ते।।
पुष्पैश्च धूपदीपैश्च बलिभिश्च विलक्षणैः।
त्वं च त्वद्देहसंस्थाश्च पूज्याः स्युर्देवताः क्रमात्।।

एवं मयैव विहितं कुर्वतां वास्तुपूजनम्।
तदायतनवेश्मादौ वसतां सन्तु सम्पदः।।
अकृत्वा वास्तुयजनं प्रासादभवनादिकम्।
कृतं तदासुरं सर्वं भूयात् तत्र च यत् कृतम्।।[1]

तैत (ति) लाश्च नराश्चैव़ यस्मिन्नस्मिन् परिस्थि(ष्ठि) ताः।
तद्वस्तु सु(सू) रिभिः प्रोक्तां (क्तं) तथा वै वक्ष्यतेऽधुना।।[2]
धराहर्म्यादि यानं च पर्यङ्कादि चतुर्विधम्।
धरा प्रधानवस्तु स्यात्ततज्जातिषु सर्वशः।।[3]
सङ्ग्रामेऽन्धकरुद्रयोश्च पतितः स्वेदो महेशात क्षितौ
तस्मादं भूतमपूचच भीतिजननं द्यावापृथिव्योर्महत्।
तद्देवैः रसभा विगृह्य निहितं भूमावधोवक्यकं
देवानां वसनाच्च वास्तुपुरुषस्तेनैव पूज्यो बुधैः।।[4]
भूमिप्रासादयानानि शयतं च चतुर्विधम्।
भूरेव मुख्यवस्तु स्यात् तत्र जातानि यानि हि।।[5]
अमर्त्याश्चैव मर्त्याश्च यत्र - यत्र वसन्ति हि।
तद् वस्त्विति मतं तज्ज्ञै : ....।।[6]
पञ्चचत्वारिंशदस्य वास्तोर्देहे स्थिताः सुराः।
देव्योऽष्टौ बोगास्तेषां वसनाद्वास्तुरुच्यते।।[7]
देवतानां नराणाञ्च गजगोवाजिनामपि।
निवासभूमिशिल्पज्ञैर्वास्तुसंज्ञमुदीरितम्।।[8]

---

१. ईशानशिवगुरुदेव पद्धति क्रियापाद, उ.२६-११७-१२३
२. मानसार, अ.३.१
३. मानसार, अ.३.२
४. राजवल्लभः, अ.२.१
५. मयमतम् , अ.२.२
६. मयमतम् , अ.२.१
७. वास्तुमण्डनम् , अ.१.१२
८. विश्वकर्मावास्तुशास्त्रम्, अ.७.१

इष्टिका च शिला दारुदयः कीलादयोऽप्यमी।
वास्तुकर्मणि चान्यत्र वास्तुसंज्ञमुदीरितम्।।[1]
कीलादिद्रव्याणि वास्तुसंज्ञकं ज्ञायते।
अर्थात् इष्टिका- शीला- वृक्ष (काष्ठ) -
गृहं क्षेत्रमारामः सेतुबंधस्तटाकमाधारो वा वास्तुः।[2]
देशः पुरं निवासश्चच सभा वेश्मासनानि च।
यद्यदीदृशमन्यच्च तत्तच्छ्रेयस्करं मतम्।।
वास्तुशास्त्रादृते तस्य न स्याल्लक्षणनिश्चयः।
तस्माल्लोकस्य कृपया शास्त्रमेतदुदीर्यते।।[3]

महदादिसर्गः (सृष्टि- वर्णनम्) (अ-४), तथा भूवन- कोश (भूगोल- वर्णनम्) (अ-५) विश्वयोजनायाः सङ्केकं करोति। यदा समस्य भूमण्डलं च सौरमण्डलं वास्तोः विषयमस्ति तदा वास्तोः व्याख्या भवननिर्माणपर्यन्तं सीमितं स्थापनमेकम् अभिशापः भवति। अनेन प्रकारेण भारतीयवास्तुशास्त्रस्य विषयः सामान्यभवनं, प्रासादाः, ग्रामः, खेटकः पत्तनम्, पुटभेदनम्, एवं नगर पर्यन्तमेव समितिं नास्ति परन्तु जनपदम्, जनपद- समूहः, राष्ट्रः राष्ट्र- समूहः पर्यन्तं विस्तृतं वर्तते [4] महदादिसर्गः (सृष्टि- वर्णनम्) (अ-४), तथा भुवन- कोश (भूगोल- वर्णनम्) (अ-५) विश्वयोजनायाः सङ्केकं करोति।

नमस्तक्षभ्यः रथकोरेभ्यश्च वो नमः.........।।[5]

ये धीवानो रथकाराः.........।[6]

सौरमण्डलस्य गतिविधिः, सम्पूर्ण महासमायाः निवेशोपक्रमः, वसति- योग्यता, वास- स्थानम्, जनपद- निवेशश्च सृष्टिविभागः, एवं भूगोलादि वर्णनं वर्णितं वर्तते।[7]

रथाय नावमुत नो गृहाय नित्यारित्रां पद्धतीं रास्यग्ने।
अस्माकं वीरीं उत नो मघोनों जर्नाश्च या पारयाच्छर्म या च।।[8]

१. विश्वकर्मावास्तुशास्त्रम्, अ.७.६१
२. कौटिलीय अर्थशास्त्रम्, अधिकरणम् -३, अ.८
३. समराङ्गणसूत्रधारः, अ.१.४-५
४. समराङ्गणसूत्रधारः, भवन- निवेशः, भाग-१, हिन्दी अनुवादः, पृ-११
५. समराङ्गणसूत्रधारः, अ.३
६. अथर्ववेदः, ३.५.६ आदि
७. ऋग्वेदः, १६.२७
८. ऋग्वेदः, १.१४०.१२

चतुरस्त्रे एकाशीतिपदो वास्तुनगरः

ई **पू** **अनलः आ**

शिखी	**पर्जन्यः**	**जयन्तः**	**इन्द्रः**	**सूर्यः**	**सत्यः**	**भृशः**	**अन्तरिक्षः**	**अनिलः**
दितिः	आपः	जयन्तः	इन्द्रः	सूर्यः	सत्यः	भृशः	सावित्रः	पूषा
अदितिः	अदितिः	आपवत्सः	अर्यमा	अर्यमा	अर्यमा	सविता	वितथः	वितथः
भुजगः	भुजगः	पृथिवीधरः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विवश्वान्	बृहक्षतः	बृहक्षतः
सोमः	सोमः	पृथिवीधरः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विवश्वान्	यमः	यमः
भल्लाटः	भल्लाटः	पृथिवीधरः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विवश्वान्	गन्धर्वः	गन्धर्वः
मुख्यः	मुख्यः	राजयक्ष्मा	मित्रः	मित्रः	मित्रः	इन्द्रः	भृङ्गराज	भृङ्गराज
नागः	रुद्रः	शोषः	असुर	वरुणः	कुसुमदन्तः	सुग्रीवः	जयः	मृगः
रोगः	पापयक्ष्मा	शोषः	असुरः	वरुणः	कुसुमदन्तः	सुग्रीवः	दौवारिकः	पिता

वा **प** **नै**

चतुरस्त्रे चतुः षष्टिपदो वास्तुनरः

ई पू आ

शिखी / दितिः	पर्जन्यः	जयन्तः	इन्द्रः	सूर्यः	सत्यः	भृशः	अन्तरिक्षः / अनिलः
अदितिः	पर्जन्यः / अदितिः	जयन्तः	इन्द्रः	सूर्यः	सत्यः	भृशः / पूषा	पूषा
भुजगः	भुजगः	आपवत्सः / आपः	अर्यमा	अर्यमा	सविता / सावित्रः	वितथः	वितथः
सोमः	सोमः	पृथिवीधरः	ब्रह्मा	ब्रह्मा	विवश्वान	बृहक्षतः	बृहक्षतः
भल्लाटः	भल्लाटः	पृथिवीधरः	ब्रह्मा	ब्रह्मा	विवश्वान	यमः	यमः
मुख्यः	मुख्यः	रुद्रः / राजयक्ष्मा	मित्रः	मित्रः	इन्द्रः / जयः	गन्धर्वः	गन्धर्वः
नागः	नागः / शोषः	असुरः	वरुणः	कुसुमदन्तः	सुग्रीव	भृङ्गराजः / दौवारिकः	भङ्गराजः
रोगः / पापयक्ष्मा		असुरः	वरुणः	कुसुमदन्तः	सुग्रीव	दौवारिकः	मृगः / पिता

उ आ

वा प नै

वृत्ते एकाशीतिपदो वास्तुनरः



वृत्ते चतुषष्टिपदो वास्तुनरः



त्र्यस्त्रे एकाशीतिपदो वास्तुनरः



अथात्र मर्मविभागप्रदर्शनार्थमाह-

सम्पाता वंशानां मध्यानि समानि यानि च पदानाम्।

मर्माणि तानि विन्द्यान्न तानि परिपीड्येत् प्राज्ञः।।५७।।

वंशानां कोणात् कोणगतानां सूत्राणां ये सम्पाताः परस्परमेकीभावाः तथा च वक्ष्यति-

रोगाद्वायुं पितृतो हुताशनं शोषसूत्रमपि वितथात्।

मुख्याद् भृश् जयन्ताच्च भृङ्गमदितेश्च सुग्रीवम्।।इति।।

अत्राचार्येण, वंशानां रज्जूनां च विभागो नोक्तः, समासेन रोगाद्वयुमिति सूत्रलक्षणं कृतम्। तथा चास्मदीयवास्तुविद्यायाम्।

एवं वंशानां ये सम्पाताः पूर्वापराभिः सह तथा पदानां सर्वेषां यानि च समानि मध्यानि तानि च सर्वाणि मर्माणि विन्द्याज्जानीयात्। प्रोज्ञो मेधावी तानि च परिपीडयेत् तेषां च पीडनैरन्योन्यं दोषो भवति।।

तथाह-

तान्यशुचिभाण्डकीलस्तम्भाद्यैः पीडितानि शल्यैश्च।

गृहभर्तुस्तत्तुल्ये पीडामङ्गे प्रयच्छनित।।५८।।

तानि मर्माण्यशुचिभाण्डैरशुद्धैरुपकरणवस्तुभिस्तथा कीलकैः शङ्कुभिः स्तम्भैश्च, आदिग्रहणा-दन्यैरपि गुरुभिः पाषाणादिभिः शल्यैर्वा परिपीडितानि भवन्ति, तदा तत्तुल्येऽङ्गे तस्मिन्ने-वावयवे गृहभर्तुर्वेश्मस्वामिनः पीडां प्रयच्छन्ति।।

अधुना शल्यज्ञानमाह-

कण्डूयते यदङ्गं गृहभर्तुर्यत्र वाऽमराहुत्याम्।

अशुभं भवेन्निमित्तिं विकृतेर्वाग्नेः सशल्यं तत्।।५९।।

गृहभर्तुर्गृहस्वामिनो होमकाले पृच्छायां वा यदङ्ग कण्डूयते, तदेवाङ्गं वास्तुनरस्य सशल्यम्। वाऽमराहुत्यामशुभं भवेन्निमित्तम् अमरा देवाः शिख्यादयस्तेषां होमकाले याऽऽहुतिस्तस्यां यद्यशुभं निमित्तं भवेत् क्षुतनिष्ठीवनरोदनाक्रोशनवातोत्सर्गानिष्टा-शब्दश्रवणमग्नेर्विकृतिर्विकारो वा विस्फुलिङ्गसशब्ददुर्गन्धादि तत्सस्थानममराधिष्ठितं सशल्यं शल्य सयुतम्।

वर्णपरत्वेन भूमिलवत्वं शल्यज्ञान चाह-

सौम्यादिप्लावभूतले विरचयेद्विप्रादिकोऽग्रयोऽखिले
नान्येषां नियमोऽत्र यत्र निखिलाः कुर्युर्गुहं हत्स्थिरम्।
सद्मप्रश्नकृतो मुखात्प्रथमतो वर्गादिवर्णोद्विम-
श्चेत्तद्दिग्गतमादिशेतु हपयैः शल्यं सुधीर्मध्यतः।। मुहूर्तमार्तण्डः

यः शालायास्तृतीयांशेन कार्या तु वीथिका।
यद्यग्रतो भवेत् वीथी सोष्णीषं नाम तद्गृहम्।।
पश्चात्सायाश्रयम् नाम सवाष्टम्मन्तु पार्श्वयोः।
समता यदि जाता तदा सुस्थितमुच्यते।।[1]

विप्रस्यमहतीशाला न दैर्ध्य परतो भवेत्।
पंचत्रिंशत्करा वैश्ये अंगुलानि त्रयोदश।।
तावत्करेण शूद्रस्य युता पंच दशांगुलैः।
शालायास्तु त्रिभागेन यस्याग्रे वीथिका भवेत्।
सोष्णीषं नाम तद्वास्तु पश्चाच्छेयोसूषं भवेत्।
पार्श्चयोवीथिकायत्र सावष्टम्भं तदुच्यते।
सम्न्ताद्वीथिका यत्र सुस्थितं तदिहोच्यते।।
शुभदं सर्वमेतत्स्यातुर्वर्ण्ये चतुर्विधम्।
विस्तारात्षोडशोभागस्तथा हस्तचतुष्टयम्।।
प्रथमो भूमिकोच्छ्रायः उपरिष्टात् प्रहीयते।
द्वादशांसेन सर्वासु भूमिकासु तथोत्छषः।।[2]

स.टीं. सौम्यादिसमभूतले (उत्तरादिनिम्रधरातले) विप्रादिकः "क्रमेण"गृहं विरचयेत्। वा अग्रयो ब्राह्मजोऽखिले सर्वसचे भूतलेगृहं कुर्यात्। अत्रान्येषां नियमो नास्ति। अथवा यत्र यस्यां भूमौ हत्स्थिर मनः प्रसन्न तत्र निखिला सर्वेऽपि वर्णा गृहं कुर्युः।

---

१. किरणाख्ये व.स. पृ-६७

२. अ.पु.अ -२२४ , ३५-४०

अथ शल्यज्ञानमाद्दसद्मपश्रकृतः गृहार्थ प्रश्नकुर्तजनस्य मुखात् प्रथमतश्चेद्यदि वर्गादिचणंद्व (अ. क. च. ट. त. प. य. शा/नां मध्येऽन्यतमस्योचारणं) स्यात्तदा तद्दिग्गतं (तस्य वर्गस्य या दिक तत्र गतं) शज्यं आदिशेत्। तथा इपयैः वर्णमध्यतो मध्यस्थाने सुधीः शल्य आदिशेत् कथयेत्। तद्यथा प्रश्ने प्रथमः अकारश्चत्पूवास्यां, ककारश्चेईाग्नेप्यां, चकारश्चे-द्दक्षिणस्यां टकारश्चेन्नैऋत्यां, तकारश्चत्पश्चिमदिशि, पकारश्चेद्वायुकोणे, यकारश्चेदुत्तरस्यां, शकारश्चे दैशान्यां तथा हपयैः मध्येऽपि शल्यमस्तोति ज्ञेयम् एतदन्यवर्णे शल्यामाच एवेत्यर्थात् सिद्धयति।। तथा चोक्तम् -

"स्मृत्वेष्टदेवतां प्रष्टुव वनस्याचमक्षरम्। गृहीत्वा तु ततः शल्याशल्यं सम्यग्धिवार्यते।। अकवटतशहगया वर्णाः पूवादिमध्यान्तः। शल्यकरा इह नान्ये शल्यगृहे निवसतां नाश" इति। एतदेव स्पष्टं तत्रैवेक्तम्। "पृच्छायां यदि अः प्राच्यां नारशल्यं तदा भवेत्। सार्धहस्तप्रमाणेन तथा च मानुधमृत्युकृत्। आग्नेप्यां दिशि कः प्रश्ने खरशल्यं करद्वये। राजदण्डो भवेतत्र भयं नैव निवर्तते। याम्यायां दिशि चः प्रश्ने कुर्धादाकटिसस्थितम्। नरशल्यं गृहेशस्य मरणं चिररोगतः।। नैर्ऋत्यां दिशि टः प्रश्ने सार्धहस्तादधः स्थले। शुनोऽस्थि जायते तत्र बलानां जनयेन्मृतिम्।। तः प्रश्ने पश्चिमायां तु शिक्षोः शल्यं प्रजायते। साधहस्ते गृहस्वामी न तिष्ठति सदा गृहे।। वायव्यां दिशि पः प्रश्ने तृषांगाराश्चतु : करे। कुर्वन्ति मित्रनाश च दुःखप्रदर्शन तथा।। उदीच्यां दिशि यः प्रश्ने विप्रशल्यं कटेरघः। तच्छीघ्रं निधनत्वाय कुवेरसख्शस्य हि।। ईशान्यां दिशि शः प्रश्ने गोशल्यं साधहस्ततः। तद्गाधनस्य नाशाय जायते गृहमेधिनः।। हपया मध्ये कोष्ठे वक्षोमात्रे भवेदधः। नृकपास्मयो भस्म खोहं तत्कुलताशकृदिति "।।

शल्यज्ञानार्थवर्गचक्रम्

		पू.		
	श	अ	क	
उ.	य	ह प य	च	द.
	प३	त	ट	
		प.		

शल्यानां प्रविभागेण फलान्याह-

धनहानिर्दारुमये पशुपीडा रुग्भयानि चास्थिकृते।

(लोहमये शस्त्रभयं कपालकेशेषु मृत्युः स्यात्।।

अङ्गारे स्तेनभयं भस्मनि च विनिर्दिशेत्सदाऽग्निभयम्।

शल्यं हि मर्मसंस्थं सुवर्णरजतादृतेऽत्यशुभम्।।

मर्मण्यमर्मगो वा निरुणद्धयर्थागमं तुषसमूहः।)

अपि नागदन्तको मर्मसंस्थितो दोषकृद् भवति।।६०।।

दारुमये काष्ठमये शल्ये धनहानिर्वित्तशानो भवति। अस्थिकृते शल्ये पशूनां च पीडा व्यथा रुग्भयानि च भवन्ति। अपिशब्दः सम्भावनायां वर्तते। नागदन्तको हस्तिदन्तः शुभोऽपि मर्मसंस्थितो दोषकृदनिष्टदो भवति।।

वंशरज्जुलक्षणं महामर्माणि च प्रदर्शयितुमाह-

रोगाद्वायुं पितृतो हुताशनं शोषसूत्रमपि वितथात्।

मुख्याद् भृशं जयन्ताच्च भृङ्गमदितेश्च सुग्रीवम्।।६१।।

तत्सम्पाता नव ये तान्यतिमर्माणि सम्प्रदिष्टानि।

यश्च पदस्याष्टांशस्तत् प्रोक्तं मर्मपरिमाणम्।।६२।।

रोगादारभ्य वायुमनिलं यावत्सूत्रं तिर्यक् सन्दद्यात्। एवं पितृतो हुताशनं शिखिनं यावत्। वितथात् सूत्रं शोषं यावन्नयेत्। मुख्याद् भृशं यावज्जयन्ताच्च भृङ्गं यावत्। अदितेश्च

सुग्रीवं यावत्। सम्पाता इति। तदिति सूत्राणां परामर्शः। तेषां सूत्राणां ये परस्परं नव सम्पातास्तान्यतिमर्माणि महामर्माणि सम्प्रदिष्टा-न्युक्तानि। पदस्य पश्चाष्टांशोऽष्टमभागस्तन्मर्म-परिमाणं प्राक्कथितम्। एतदुक्तं भवति-क्षेत्रमेकाशीतिपदं विभक्तं कृत्वा यावत्प्रमाणं पदमुत्पद्यते तस्याष्टांशे मर्मपरिमाणमिति।।

वंशस्य च शिरायाश्च परिमाणज्ञानमाह-

पदशहस्तसंख्यया सम्मितानि वंशोऽङ्गुलानि विस्तीर्णः।

वंशव्यासोऽध्यर्धः शिराप्रमाणं विनिर्दिष्टम्।।६३।।

पदहस्तस्य संख्यया पदं यावत् ते हस्तो विस्तृतं भवति, तत्सम्मितानि तत्संख्याङ्गुलानि वंशो विस्तीर्णो भवति। रोगाद्वायुमित्यादिकं सूत्रषटकं वंशशबदेनोच्यते। एवं वंशव्यासो वंशविस्तारोऽध्यर्धो दिवं प्रगुणितः शिराप्रमाणं विनिर्दिष्टं कथितम्। शिराशब्देन पूर्वापरायता दक्षिणोत्तरायताश्च दश दश रेखा ज्ञेयाः। तथा ताश्च शास्त्रान्तरे पठयन्ते।

परीक्षितां भूमिं कृत्वा भूमौ वृत्तं विरच्य तस्य केन्द्रे स्थापितस्य द्वादशांगुल शंकोः छाया पूर्वाह्ने वृत्तस्य यं विन्दु मधिकृत्य प्रविशति वृत्तास्थितं तद् विन्दुः पश्चिमे व अपराह्ने छाया निर्गम् विन्दुनिष्ठ वृत्त विन्दुं पूर्वदिशायां जानीयात्

अत्र पु, द, प, उ एकं वृत्तम्। मु, पू, पु, प एका मत्स्याकार रेखा अस्ति। मु, द, के, द, पु, मत्स्यस्य मुख पृष्ठात एका रेखा अस्ति। अंस्योपरि पू, के, प. एका लम्ब रेखा अस्ति। उभयोः रेखयोः छिन्नत्वं प्राप्य वृत्त प्रदेशं पू- पूर्व, द-दक्षिणं, प-पश्चिमं, उ-उत्तरं स्व-स्वदिशायाः ज्ञापकत्वं सूचयति।

अत्रैव परिभाषार्थमाह-

सुखमिच्छन् ब्रह्माणं यत्नाद्रक्षेद् गृही गृहान्तः स्थम्।

उच्छिष्टाद्युपघाताद् गृहपतिरुपयप्यते तस्मिन्।।६४।।

गृही गृहपतिः सुखमिच्छन् सुखमभिलषन् गृहान्तः स्थं गृहमध्यगतं ब्रह्माणं पितामहं यत्नात् सर्वप्रयत्नेन रक्षेत् पालयेत्। यतस्तस्य ब्रह्मण उच्छिष्टाद्युपधातात्। उच्छिष्टमशुचि। आदिग्रहणाद-मेध्याद्युपस्करणं भाण्डः। एतेषां तत्र स्थापनादुपधातो भवति, तस्मात् तस्मिन् गृहे गृहपतिर्वेश्मस्वामी उपतप्यते उपतापं प्राप्नोति।।

यतो दिक् साधनं विनानिर्मितम् गृहं कुलनाशकरं भवति। अतः विश्वकर्ममतानुसारेण प्रासादस्य सदनस्य अलिन्दस्य, द्वारा अथवा भित्तेर्निर्माणे दिक्मुखतः कुलनाशः जायते। वास्तुपुरुषोऽयं तृतीय मासाभ्यन्तरे दिशा परिवर्तनं करोति। यस्मिन् मासे वास्तुपुरुषस्य दृष्टिः दिशि वापी कूप तड़ाग भवन प्रासादादीनां निर्माणं वर्ज्यम्।

भाद्रपदे आश्विने तथा कार्तिक मासे वास्तुपुरुषस्य सिरः पूर्व दिशायां यादः पश्चिम दिशायां दृष्टिः दक्षिण दिशायां भवति। मार्गशीर्ष पौष तथा माघ पासे दक्षिण दिशायां शिरः उत्तर दिशायां पादः पश्चिम दिशायां दृष्टिः भवति। फाल्गुन चैत्रे तथा वैशाखमासे पश्चिम दिशायां शिरः पूर्व दिशायां पादः दृष्टिः उत्तर दिशायां भवति। ज्येष्ठ आषाढ़ तथा श्रावणमासे उत्तर दिशायां शिरः दक्षिण दिशायां पादः दृष्टिः पूर्व दिशायां भवति। वास्तुपुरुषस्य विपरीत दिशायां तस्य शिरः भवति।

विकले वास्तुनि दोषप्रदर्शनार्थमाह-

दक्षिणभुजेन हीने वास्तुनरेऽर्थक्षयोऽङ्गनादोषाः।
वामेऽर्थधान्यहानिः शिरसि गुणैर्हीयते सर्वैः।।६५।।
स्त्रीदोषाः सुतमरणं प्रेष्यत्वं चरणवैकल्ये।
अविकलपुरुषे वसतां मानार्थयुतानि सौख्यानि।।६६।।

वास्तुनरे वास्तुपुरुषे दक्षिणेन सव्येन भुजेन बाहुना हीने रहितेऽर्थक्षयो वित्तनाशः, अङ्गनादोषाः स्त्रीकृता दोषा भवन्ति। वामेऽपसव्ये भुजे हीने वास्तुनरे अर्थानां धनानां च हानिर्विनाशो भवति। शिरसि मूर्धनि हीने वास्तुनरे सर्वैर्निः शेषैर्गुणैरारोम्यादिभिर्हीयते रहितो भवति।

चरणवैकल्ये पादभागहीने वास्तुनरे स्त्रीदोषा योषित्प्रभवा दोषाः सुमरणं पुत्रविपतिः प्रेष्यत्वं दासत्वं चापि भवति। अविकलपुरुषे परिपूर्णावयवे वास्तुनरे वसतां पुंसां मानार्थयुतानि सौख्यानि भवन्ति।

नं केवलं वास्तुनरस्यायं प्रविभागो यावन्नगरग्रामेष्वप्येवमेवेत्याह-

गृहनगरग्रामेषु च सर्वन्नैवं प्रतिष्ठिता देवाः।
तेषु च यथानुरूपं वर्णा विप्रादयो वास्याः।।६७।।

एवमनेनैव प्रकारेण गृहे वेश्मनि नगरे पुरे ग्रामे चैतैष्वपि सर्वत्र सर्वस्मिन् देशे देवाः सुराः प्रतिष्ठिताः परिकल्पिताः। एतदुक्तं भवति- यथा गृहे वास्तुनरस्य परिकल्पनां कृता तथैव नगरे ग्रामे च कार्या। तत्रापि च यानि मर्माणि तानि प्राग्वच्चिन्तनीयानि। तेषु नगरग्रामेषु

विप्रादयो ब्राह्मणाद्या वर्णा ब्राह्मणक्षत्रियवैश्यशुद्रा यथाक्रमं वास्या विासनीयाः। यत्र दिग्भागे यसेचितं तत्र वासयेदित्यर्थः।।

स्थाप्यन्ते ये यथा देवा नगरं सर्वतोदिशम्।

बाह्यान्तरासु भूमिषु ब्रूमहे तानतः परम्।।[1]

कथमिति तत्प्रतिपादयन्नाह-

वासगृहाणि च विन्द्याद्विप्रादीनामुदग्दिगाद्यानि।

विशतां च यथा भवनं भवन्ति तान्येव दक्षिणतः।।६८।।

विन्द्याज्जानीयात्। गृहे चतुः शाले ग्रामे नगरे वा ब्राह्मणानामुत्तरस्यां दिशि वासगृहाणि कार्याणि, पूर्वस्यां क्षत्रियाणाम् , दक्षिणस्यां वैश्यानाम्, पश्चिमायां शुद्राणामिति। तथा च कार्याणि यथा भवनं गृहाभ्यन्तरमङ्गणं विशतां तान्येव वासगृहाणि दक्षिणस्यां दिशि भवन्ति। एतदुक्तं भवति- प्राङ्मुखम्, पश्चिमाभिमुखस्य दक्षिणाभिमुखम्, उत्तराभिमुखस्यं पश्चिमाभिमुखमिति।।

अधुना यानि चतसृषु दिक्षु द्वात्रिशदं द्वाराण्युक्तानि तेषां शुभाशुभफलं वक्ष्यामीत्याह-

नवगुणसूत्रविभक्तान्यष्टगुणेनाथवा चतुः षष्टेः।

द्वाराणि यानि तेषामनलादीनां फलोपनयः।।६९।।

नवगुणेन सूत्रेण यानि विभक्तानि द्वात्रिशद् द्वाराणि नवगुणे सूत्रेणैकाशीतिपदे अष्टगुणेन चतुःषष्टेरिति करणाद् यानि द्वात्रिंशद् द्वाराण्यनलादीनि तेषामनलादीनां द्वाराणां क्रमेण परिपाटया फलोपनयः फलकथनं क्रियत इति वाक्याध्याहारः।।

अधुना तदेवाह-

अनिलभयं स्त्रीजननं प्रभूतधनता नरेन्द्रवाल्लभ्यम्।

क्रोधपरतानृतत्वं क्रौर्य चौर्य्य च पूर्वेण।।७०।।

शिखिसंज्ञे आग्नेयद्वारे अनिलभयं वायुभीतिर्भवति। एवं स्त्रीजननं कन्यकाजन्म पर्जन्ये। प्रभूतधना बहुवित्तत्वं जयन्ते। नरेन्द्रवाल्लभ्यं नृपवल्लभत्वमिन्द्रे। क्रोधपरता क्रोधशीलता सूर्ये। अनृतत्वमसत्यभाषित्वं सत्ये। क्रौर्य क्रूरता भृशे। चौर्य तस्करत्वमन्तरिक्षे। एवं पूर्वेण पूर्वस्यां दिशि निर्देशः।।७०।।

---

१. समरांङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०.१०७

दक्षिण आह-

अल्पसुतत्वं प्रैष्यं नीचत्वं भक्ष्यपानसुतवृद्धिः।

रौद्रं कृतध्नमधनं सुतवीर्यध्नं च याम्येन।।७१।।

अनिले अल्पसुतत्वमल्पपुत्रता। पौष्णे प्रैष्यं दासत्वम्। वितथे नीचत्वं नीचता। बृहत्क्षते भक्ष्यपानसुतानां वृद्धिः। याम्ये रौद्रमशुभम्। गन्धर्वे कृतध्नं कृतं हन्तीति। भृङ्गराजे अधने धनवर्जितम्। मृगाख्ये सुतवीर्यध्नं पुत्रबलनाशनम्। एवं याम्येन दक्षिणेन द्वारनिर्देशः।।

अध्यात्मः, धर्मः, आस्था च अस्माकं भारतीयसंस्कृत्याः प्राणः अस्ति। एतेषां सर्वेषां केन्द्रः ईश्वरः अस्ति।

पश्चिम आह-

सुतपीडा रिपुवृद्धिर्न सुतधनाप्तिः सुतार्थफलसम्पत्।

धनसम्पन्नृपतिभयं धनक्षयो रोग इत्यपरे।।७२।।

पित्र्ये सुतपीडा पुत्रव्यथा।दौवारिके रिपुवृद्धिः शत्रुबाहुल्यम्। सुग्रीवे सुतधनाप्तिः पुत्रधनावाप्तिः। कुसुमदन्ते सुतार्थफलसम्पत् पुत्रनफलसम्पत्तिः। वारुणे धनसम्पद् धनानां सम्पत्। असुरे नृपतिभं राजभीतिः। शोषे धनक्षयो वित्तनाशः। पापयक्ष्माख्ये रोगो गद इत्यपरे पश्चिमायां द्वारनिर्देशः।।

चतुर्विधं द्वारप्राशस्त्यमाह-

रोते भाद्रपदात्त्रिषु त्रिषु सुरः प्रागादिशीर्षोऽत्र हि

प्रोक्त सद्ममुखं तु गोल्यजघटेष्वर्के यमोदङ्मुखम्।

हृद्रोगैणकुलीरलेयगरवौ पूर्वापरास्यं गृहं

नान्यस्थे भुजकोटिघात इमहृच्छेषं स्युरायाः क्रमात्।।७।। मुहूर्तमार्तण्डः

सं.टी. – सुरो वास्तुपुरुषः भाद्रपदात् त्रिषु त्रिषु भासेषु क्रमेण प्रागादिशीषः शेते। अत्र शीर्षदिशि सद्यमुखं प्रोक्तम्। हृद्रोगैणकुलीग्लेयगरचौ कुम्भमकरकर्कसिंहगते सूर्ये पूर्वापरास्य गृह कुर्यात्। अन्यरथेऽन्यराशिस्थिते सूर्ये गृहं न कुर्यात्। अथ भुजकोटिघातः गृहदैर्ध्यविस्तारयोर्घात इभहृदष्टभक्तः शेषं क्रमात् ध्वजादय आयाः रधुः।।

अथायपरत्वेन द्वारमाह

पूर्वादिध्वजघूमसिंहशुनकोक्षाणः खरेमोष्ट्रका

धार्याः स्वस्वपदे ध्वजोऽखिलमुखः प्राग्याभ्यावक्त्रो गजः।

प्रगास्त्रो वृषभो विवारुणमुखः सिंहः प्रशस्ता इमे
धूमोऽग्नेः शुनकोऽन्त्यजस्यखगपस्योष्ट्रोऽड्टपत्न्याः खरः।।८।।
मुहूर्तमार्तण्ड

सं.टी.-पूर्वादिषु ध्वजधूमसिंहशुनकोक्षाणः खरेभौष्ट्रकाः बलिष्ठा भवन्तीति शेषः। इमे आयाः स्वस्वपदे "पूर्वस्यांध्वजः" आग्नेय्थां धूम इत्यादि स्वस्वस्थाने धार्याः। वा स्वस्वानुरूपकार्येषु यथायोग्यं ध्वंजादयो धार्या इति। अथायपरत्वेन मुखान्याह- ध्वजोऽखिल-मुखः सर्वदिगद्वारः , गजः प्रागढयाम्यवक्त्र, वृषभः प्रागास्यः पूर्वमुखः, सिंहो विवारुणमुखः पश्चिमां विना सर्वदिग्द्वारः शुभः। इमे चत्वार आयाः प्रशस्ताः सर्वेषां शुभग्रदा भवन्ति, अर्थादन्ये धूमादयश्चत्वारः समा आया अशुभा भवन्ति। अथाशुभायानामपि स्थानविशेषे शुभत्वमाहअग्नेगृह धुमः शुभः, अन्त्यजस्य गृहे शुनकः, खगपस्य पक्षिपालकस्य गृहे उष्ट्रः, अड्टपल्याः वेश्याया गृहे खरः शुभो भवति।।

अथोत्तर आह-

वधबन्धो रिपुवृद्धिः सुतधनलाभः समस्तगुणसम्पत्।
पुत्रधनाप्तिर्वैरं सुतेन दोषाः स्त्रिया नैःस्वम्।७३।।

रोगाख्ये वधबन्धः। सार्पे रिपुवृद्धिः। मुख्याख्ये सुतानां पुत्राणां धनस्य च लाभः। भल्लाटे समस्तानां निः शेषाणां शौर्यादीनां गुणानां सम्पत्तिः। सौम्ये पुत्रधनाप्तिः सुतवित्तलाभः। भौजङ्गे वैरं द्वेषः सुतेन पुत्रेण सह। आदित्ये स्त्रिया दोषास्तदुत्था अशुभाः। दित्याख्ये नैःस्वं निर्धनत्वम्। एवमुत्तरतो द्वारनिर्देशः।

नन्वत्र नवगुणसूत्रविभक्तानीत्यत्र नृपादीनां वर्णानां चैकाशीतिपदेन नवगुणसूत्र-विभक्तानि कार्याणि कुत एतन्निश्चीयते इति ? उच्यते – अष्टगुणनाथवा चतुःषष्टेरित्यस्मादेव विकल्पादवगम्यते। पूर्वाचार्य-प्रणीतपक्षस्यायं विकल्पः। यस्माद्विश्वकर्मणा एकाशीतिपदगतचतुः षष्टिपदान्युक्तानि। तेषु च प्रत्येकं विभङ्गान्यभिहितानि। तथा चाह-

तस्मान्नवगुणसूत्रविभक्तान्येकाशीतिपदे नृपादीनां कर्तव्यानि। अत्र केचिदनिश्चितबुद्धयो विकल्पांश्चोदयन्ति, यथा चतसृष्वपि दिक्षु नवगुणसूत्रविभक्तानि नव विभागा भवन्ति। अनिलभयं स्त्रीजननमित्यादीन्यष्टाष्टद्वारण्युक्तानि योऽसौ नवमो भागस्तत्र प्रदेशे किं कर्तव्यमिति।

अत्रोच्यते- प्रागेव वास्तुदेवतानां प्रविभागं कृत्वाऽनिलादीनां देवतानां प्रदेशेषु द्वाराणि प्रविकल्प्यानि, कल्पिते च द्वारभित्तिश्चिन्तनीया। तथा च नन्दी आह-

अत्राचार्येण गृहाणां द्वाराणां च सामान्येन लक्षणमुक्तम्। अन्यैराचार्यैर्गृहाणामष्टौ वास्तुपुरुषाः कथिताः। तेषां च नक्षत्राण्युक्तानि, तथा द्वारद्वात्रिंशंतो नक्षत्राण्युक्तानि। तत्र चन्द्रतारानुकूल्येन गृहाणां द्वाराणां च करणमुक्तम्, तच्च लोकतो दृश्यतेः यतोऽस्माभिरन्यशास्त्राद्वास्तुनराणां नामान्यानीश नक्षत्राणि च यथाक्रमेण प्रदर्श्यन्ते।। यद्यथा –

द्वारस्य वेधफलमाह-

मार्गतरुकोणकूपस्तम्भभ्रमविद्धमशुभदं द्वारम्।
उच्छ्रायाद् द्विगुणमितां त्वक्त्वा भूमिं न दोषाय।।७४।।

मार्गः पन्या, तरुर्वृक्षः, कोणोऽस्त्रिः, कूपस्तम्भौ प्रसिद्धौ, भ्रमो जलनिर्गमनप्रदेशः। एतैः सम्मुखैर्द्वारं विद्धमशुभदम्। कियति दूरे स्थितो वेधने न दुष्टफलदो भवतीत्याह-उच्छ्रा याद् द्विगुणमितामिति। द्वारोच्छ्रायाद् द्विगुणमितो दोषायेवैते वैधा न भवन्ति। नन्वत्र सामान्येनोक्तमुच्छ्रायाद् द्विगुणमितां त्यक्त्वा भूमिं न दोषायेत्यत्र न ज्ञायते किं वा वेधोच्छ्रायद्विगुणां किं वा विन्ध्योच्छ्रायद्विगुणां भूमिं त्यक्त्वां न दोषाय भवतीति, अत्रोच्यते आचार्येण समासंहितानिबन्धे स्पष्टतरं निबद्धम् तच्चाह-

तथा च भगवान् गर्गः- **बृ.सं., पृ-४८**[१]

अत्रैव विशेषफलान्याह-

रथ्याविद्धं द्वारं नाशाय कुमारदोषदं तरुणा।
पङ्कद्वारे शोको व्ययोऽम्बुनि स्त्राविणि प्रोक्तः।।७५।।
कूपेनापस्मारो भवति विनाशश्च देवताविद्धे।
स्तम्भेन स्त्रीदोषाः कुलनाशो ब्राह्मणाभिमुखे।।७६।।

रथ्याविद्धं मार्गेण विद्धं द्वारं नाशायं गृहस्वाभिनो भवति। तरुणा वृक्षेण विद्धं कुमाराणां बालकानां दोषदं दोषं ददाति। पङ्कद्वारे कर्दमविद्धे नित्यं यस्याग्रतः कर्दमो भवति, तस्मिन् शोको भवति। अम्बुनिः स्त्राविणि जलनिर्गमनमार्गे विद्धे व्ययो धनव्ययो भवति।

---

१. बृहत्संहितायाम् ५३ अ. उद्धृतं गर्गवचनम्

कूपेन विद्धे द्वारे अपस्मारो भवति। अपस्मारो वायुर्दोषदः। देवताविद्धे देवता सुरप्रतिमा तया विद्धे विनाशः स्वामिनो भवति। स्तम्भेन विद्धे स्त्रीदोषा दौः शील्यादिका भवन्ति। ब्राह्मणाभिमुखे कुलनाशो वा भवति। किं वो बाह्ये ब्राह्मणाभिमुखे इति नावगम्यते, यमादुत्तममुत्तरा-भिमुखं पञ्चमं द्वारमिष्टमुक्तम्। तद् गृहमध्यमं भवतीत्याह- वधबन्धो रिपुवृद्धिर्धनसुतलाभः समस्त-गुणसम्पदित्यादि। अत्रोच्यते- बाह्यस्याभ्यन्तरस्य च ब्रह्मणोऽ-भिमुखद्वारस्यानिष्टं फलं प्रत्येकदेवताविद्धस्य फलमिदमाह-

एवं चेत्तदाऽऽचार्येण पूर्वापरविरुद्धेन निबन्धनं स्यात्? अत्रोच्यते – सर्वेष्वेव वास्तुषु उत्सर्गाप-वादरूणे विविधा व्याख्या च भवति। तथा च यात्राप्रकारे प्राच्यादिषु सप्त सप्त नक्षत्राण्यभिधाय पुनः सर्वद्वारिकसंज्ञ् नक्षत्रचतुष्टयमाह। एवमत्रापि। तस्मादयमदोष इति।।

अन्यद् द्वारस्य विशेषमाह-

पीडाकरमतिपीडितमन्तर्विनतं भवेदभावाय।

बाह्यविनते प्रवासो दिग्भ्रान्ते दस्युभिः पीडा।।७७, ७८, ७९।।

स्वयमुद्घाटित आत्मनैवोद्घाटिते द्वारकपाटे उन्मादश्चित्तस्य भवति। स्वयं पिहिते निपीडिते कुलस्य वंशस्य विनाशेः स्वयं भवति। मानाधिके उक्तस्वप्रमाणादभ्यधिके द्वारे नृपभयं राजभीतिर्भवति। नीचे प्रमाणादल्पे दस्युभयं चौरभीतिर्व्यसनं दुःखं च भवति।

द्वारस्योपरि यद्द्वारं तन्न शिवाय न श्रेयसे भवति। यच्च सङ्कटं पृथुत्वेनाल्पं तच्च न शिवायैव भवति। आव्यात्तमतिविपुलं मुरजाकारं क्षुद्भयं ददाति। कुब्जमस्पष्टं द्वारं कुलनाशनं वंशक्षयावहं भवति।

अतिपीडितमुदुम्बरेणातिपीडितं गृहस्वामिनःपीडां करोति। अन्तर्गुहाभ्यन्तरे विनतं द्वारमभावाय मरणाय स्वामिनो भवति। बाह्यविनते बहिर्गते द्वारे प्रवासो भवत्यन्यदेशनिवासः। दिग्भ्रान्ते दिक्स्थे अन्या दिशं प्रेक्षमाणे दस्युभिश्चौरैः पीडा भवति।।

अत्रैव विशेषमाह-

मूलद्वारं नान्यैद्वरैरभिसन्दधीत रूपद्धर्या।

घटफलपत्रप्रमथादिभिश्च तन्मङ्गलैश्चिनुयात्।।८०।।

मूलद्वारं प्रधानमिति यावत्। तच्चान्यैपरपरैर्द्वारैः रूपद्धर्या रूपसमृद्धया नाभिसन्दधीत न सन्धानं कुर्यात्। एतदुक्तं भवति – मूलद्वारस्य यादृशी रचना कृता, तादृशी नान्यद्वाराणां कार्येति। तच्च मूलद्वारं मङ्गलैः घटैः कलशैः, फलैः, श्रीफलादिभिः पत्रैः पत्रलतादिभिर्वा प्रमथैर्गणैः, आदिग्रहणात् सिंहव्यालहं-सजीवजीवकैश्चिनुयाद् उपचितं कुर्यात्।।

तीर्थान्ते तटिनीतटे जलनिधेस्तीरे सरित्सङ्गमे,
शैलाग्रऽद्रितटे वनपवनयोरुद्यानदेशे तथा।
सिद्धाद्यायतनेषु वा गुरुवरो ग्रामे पुर पत्तने
वान्यत्रापि मनोरमे सुरसमिज्जायै क्षितिं कल्पयेत्।।[१]
ग्रामे वाथपुरेनरेन्द्रभवनंतत्षोऽशांशंभवेत्
मध्यात्पश्चिमदिकसमाश्रितमिदंदुर्गेभवेत्भूवशात् ।।
द्वारद्दक्षिणवामतश्चपुरतः कार्यास्त्रयश्चत्वराः
सर्वंवास्तुगृहादिवासरचनाभूपेच्छयाकारयेत् ।।[२]
शुभदा चतुरस्त्रा भूर्भूमिपानां विशेषतः ।
पुरस्य मध्यभागे वा निर्दिष्टे वा स्थलोत्तमे ।
भूपहर्म्यं प्रकर्तव्यं तल्लक्षणमनोहरम् ।।[३]
मध्ये पुरस्य कर्तव्यं गृहमम्भाजजन्मनः।
निवेशनं तथेन्द्रस्य तथैव हलिकृष्णयोः।।[४]
मातृयक्षगणाधीशान् शिवकान् भूतसङ्घकान्।
विनापि वेश्मभिः कुर्यात् पुरे चत्वरमार्गगान्।।[५]
अपराजिताप्रतिहतजयन्तवैजयन्तकोष्ठाकान्
शिववैश्रवणाश्चिनश्रीमदिरागृहं च पुरमध्ये कारयेत्।[६]

---

१. शिल्परत्न, ९.१
२. विश्वकर्मवास्तुशास्त्रम्, अ.१२.१-२
३. विश्वकर्मवास्तुशास्त्रम् , अ.१२.१-२
४. समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०.१३०
५. समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०.१३१
६. अर्थशास्त्रम्, अधिकरण- २, अ.४

मध्ये लक्ष्म्यादिदेवीनां मन्दिरं कारयेद्बुधः।[1]
प्राच्यां प्रत्यङ्मुखान् कुर्यात् प्राङ्मुखांश्चाम्बुभृदिशि।
याम्योदक्पार्श्वयोस्तस्य प्रादक्षिण्येन वंशगान्।।
दक्षिणस्यां न कुर्वन्ति त्रिदशानप्युदङ्मुखान्।[2]
निवेश्यते स्वदिग्भागेष्वेवं यस्मिन् सुरोत्तमाः।
सम्यक्समृद्धिमासाद्य चिरं नन्दति तत्पुरम्।।[3]
बहिः परिखायाः .... यथादिशं च दिग्देवताः।[4]

कोणचतुष्टये गृहादीनां ये दोषा निवसन्ति तांस्तन्निवासिनां च फलमाह-

पुरभवनग्रामाणां ये कोणास्तेषु निवसतां दोषाः।
श्वपचादयोऽन्त्यजात्यास्तेष्वेव विवृद्धिमायान्ति।।८१, ८२।।

प्रासादनां शिखरेभ्यः प्रयुज्यमानानां नानाविधरेखाणां, शिखरोपयोगि -घण्टा- कलश- ध्वजादिनिर्माणेप्रमाणम्।[5]

लक्ष्यते सर्वमङ्गदोषविधानकं, नयनोन्मीलनं चैव लक्षणम् अस्मिन् ग्रन्थे प्रतिपादितमस्ति।[6]

एतैः रचित मानऋषिणा विस्तारिता च।
गङ्गाशिरः कमलभूकमले श्रणेन्द्रगीर्वाणनारदमुखैरखिलेर्मुनीन्द्रैः।।
प्रौक्तं समस्ततरवस्त्नपि वास्तुशास्त्रं तन्मानसार ऋषिणापि हि लक्ष्यते स्म।[7]

अथैशान्यां चरकी, आग्नेय्यां विदारिनामा, नैर्ऋते पूतना, वायव्ये राक्षसी चेत्येवं प्रकारां बहिष्कोणेषु निवसन्ति। शास्त्रान्तरेष्वटौ पठयन्ते –

इत्याचार्योक्तः पक्षः शोभनः।

---

१. विश्वकर्मवास्तुशास्त्रम्, अ.९.९४
२. समराङ्गणसूत्रधारः (पूष्पेन्द्र), अ.१०.११२
३. समराङ्गणसुत्रधारः (पुष्पेन्द्र), अ.१०.१२३
४. अर्थशास्त्रतम् , अधिकरण-२, अ.४
५. अपराजितपृच्छा, सूत्र -२
६. मानसार, अ.१.३-१९
७. मानसार, अ.१.२

पुरभवनेति। पुरं नगरम्। भवनं गृहम्। ग्रामः प्रसिद्धः। तेषां ये कोणाश्चत्वारस्तेषु निवसतां निवसमानानां दोषा भवन्ति। तेष्वेव कोणेषु श्वपचादयः, श्वपचा डोमाः। आदिग्रहणात् चण्डालपुल्क-सप्रभृतयः। अन्त्यजात्याश्चर्मकाप्रभृतयः। एते निवसमाना विवृद्धिमायान्ति वृद्धिमाप्नुवन्ति, नान्य इति ।।

दिक्षु शुभाशुभान् वृक्षानाह-

याम्यादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते।

उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्था।।८३ ।।

एते तरवो वृक्षा याम्यादिषु दक्षिणाद्यासु दिक्षु प्रदक्षिणेन जाता अशुभफलदाः। तद्यथा- प्लक्षो याम्यायां दक्षिणस्यामशुभः। वटः पश्चिमायाम्। उदुम्बर उत्तरस्याम्। अश्वत्थः। पूर्वस्यामशुभ इति। एत एवोदगादिषूत्तराद्यासु दिक्षु प्लक्षवटोदुम्बराश्वत्थाः प्रशस्ताः। प्लक्ष उत्तरस्यां शुभः। वटः पूर्वस्याम्। उदुम्बरो दक्षिणस्याम्। अश्वत्थः पश्चिमायां शुभ इति। तथा च गर्गः- **बृ.सं., पृ-५२**

अधुनाऽरिष्टवृक्षद्वारेण गृहाणां पथिकान् वृक्षानाह-

छिन्द्याद्यदि न तरूंस्तानं तदन्तरे पूजितान् वपेदन्यान्।

पुन्नागाशोकारिष्टबकुलपनसान् शमीशालौ।।८४, ८५।।

कण्टकिनः कण्टकिवृक्षाः, खदिरप्रभृतय आसन्ना निकटवर्तिनो रिपुभयदाः शत्रुभीतिप्रदाः। क्षीरिणोऽर्कादय आसन्ना अर्थनाशाय भवन्ति। फलिनो वृक्षा आम्रप्रभृतयः प्रजाक्षयकराः प्रजानां क्षयं विनाशं कुर्वन्ति, न केवलमेते आसन्ना अशुभदा भवन्ति, यावदेषामपि दारूणिकाष्ठानि गृहार्थं वर्जयेत्।

यदि तान् कण्टकिवृक्षप्रभृतीस्तरून् वृक्षान् न छिन्द्यात् तदन्तरे तेषां मध्ये अन्यानपरान् पूजितान् वृक्षान् वपेत्। कांस्तानित्याह – पुन्नागेति। पुन्नागाः अशोकाः, अरिष्टाः, बकुलाः, पनसाः। एतास्तथा शमीशालौ। एतेषामन्यतमे तत्रस्थे तज्जा दोषा न बाधन्ते।

प्रशस्तभूलक्षणमाह-

शस्तौषधिदुमलता मधुरा सुगन्धा स्निग्ध समा न सुषिरा च महीनराणाम्।

अप्यध्वनि श्रमविनोदमुपागतानां धत्ते श्रियं किमुत्त शाश्वतमन्दिरेषु।।८६।

एवंविधा भूर्नराणां पुरुषाणामध्वनि पथि श्रमविनोदमुपागतानां श्रमापनयनं प्राप्तानामपि क्षमाऽत्रावस्थितत्वादपि श्रियं लक्ष्मी धत्ते ददाति, किमुत शाश्वतमन्दिरेषु किं पुनर्ये शाश्वतं स्थिरं मन्दिरं गृहं कृत्वा तत्र निवसन्ति। शस्तौषधिद्रुमलता, शस्ता औषधयो जायाजयन्ती जीवन्ति – जीवपुत्रा एवमादिका यत्र। द्रुमा वृक्षा याज्ञिकाः पलाशपिप्पलप्रभृतयः। लताश्चूतततयश्च श्यामलताप्रभृतयश्च यस्याम्। या च भुर्मधुरा मृष्टस्वादा। सुगन्धा शोभनगन्धा। स्निग्धा सस्नेहा। समा सर्वत्र तुल्या निम्नोत्तुङ्गैः रहिता अन्तः सारा।।

अन्यद् गृहे शुभफलं सन्निवेशवशेनाह-

चैत्ये भयं ग्रहकृतं वल्मीकश्वभ्रमसङ्कुले विपदः।

गर्त्तायां तु पिपासा कूर्माकारे धनविनाशः।।८७, ८८।।

सचिवालये मन्त्रिगृहे समीपस्थे निकटवर्तिनि अर्थनाशो धनविनाशः। धूर्तः परचञ्चनादक्षः। धूर्तगृहे समीपस्थे सुतवधः पुत्रमरणम्। देवकुले सुरगृहे समीपस्थे उद्वेगश्चितखेदः। चतुष्पथे चत्वारः पन्थानो यत्र तस्मिश्नकीर्तिलोकापवादः।

चैत्य इत्यनेन चैत्यवृक्षाः परिगृह्यन्ते। चैत्यवृक्षे आसन्ने भयं ग्रहकृतं ग्रहोत्पन्ना भीतिर्गृह-भर्तुर्भवति। ग्रहा भूतानि। तथा च बृहस्पतिराह- **बृ.सं., पृ-५३**

चैत्यवृक्षः कल्पवृक्षः। तथा च पुराणे-

वल्मीकसङ्कुले वल्मीकावृते भूभागे। श्वभ्रसङ्कुले च श्वभ्रावृते समीपस्थे विपदो व्यापदो भवन्ति। गर्ता प्रसिद्धा चिता तस्यां समीपवर्तिन्यां पिपासा तृषा भवति। कूर्माकारे भूभागे समीपस्थे धनविनाशो वित्तक्षयो भवति।।

अथापरं भूमिलक्षणमाह-

उदगादिप्लवमिष्टं विप्रादीनां प्रदक्षिणेनैव।

विप्रः सर्वत्र वसेदनुवर्णमथेष्टमन्येषाम्।।८९।।

विप्रादीनां ब्राह्मणक्षत्रियवैश्यशूद्राणामुदगादिप्लवं प्रदक्षिणेन भूभागेनेष्टं शुभम्। प्लवशब्देन निम्नत्वमुच्यते। तद्यथा- उदक्प्लवा भूर्ब्राह्मणानां प्रशस्ता। पूर्वप्लवा क्षत्रियाणाम्। दक्षिणप्लवा वैश्यानाम्। पश्चिमप्लवा शूद्राणाम्। विप्रो ब्राह्मणः सर्वत्र सर्वस्यां भूमौ वसेदुत्तरपूर्वदक्षिणमपश्चिमप्लवायामिति। अन्येषां क्षत्रियादीनामनुवर्णनमथेष्टं वर्णानुक्रमेण

शोभनाम्। तद्यथा- पूर्वप्लवा दक्षिणप्लवा पश्चिमप्लवा क्षत्रियाणाम्। दक्षिणप्लवा पश्चिमप्लवा वैश्यानाम्। पश्चिमप्लवा शूद्राणामेवेति।।

आयते : सिद्धयः सर्वाश्चतुरस्त्रे धनागमः।

वृत्ते तु बुद्धिवृद्धिः स्याद्भद्रं भद्रासने भवेत्।।

चक्रे दारिद्रयमितयाहुर्विषमे शोकलक्षणम्।

राजभीतिस्त्रिकोणे तु शकटे तु धनक्षयः।।

दण्डे पशुक्षयं प्राहुः सूर्पे वासे गवां क्षय :।

कूर्मे तु बन्धनं पीडा धनुः क्षेत्रे भयं महत्।।

कुम्भाकारे कुष्ठरोगो भवत्येवन न संशयः।

पवने नश्यति नेत्रं च मुरजे बन्धुविनाशनम्।।

भूमेर्विधानवेशन शुभाशुभमाह-

गृहमध्ये हस्तमितं खात्वा परिपूरितं पुनः श्वभ्रम्।

यद्युनमष्टिं तत् समे समं धन्यमधिकं यत्।।९०।।

गृहमध्ये भवनान्तर्हस्तमितं समप्रमाणं श्वभ्रमवटं खात्वा समन्ततः परिवर्तुलं हस्तायतं हस्तमात्रगम्भीरं पूनर्भूयः परिपूरितं तयैव मृत्तिकया यद्यूनं भवति, तदानिष्टमशुभं समे समं, न शुभं नाप्यशुभमित्यर्थः। यदधिकं भवति तद्धन्यं शुभमित्यर्थः।।

अन्यदप्याह-

श्वभ्रमथवाऽम्बुपूर्णं पदशतमित्वा गतस्य यदि नोनम्।

तद्धन्यं यच्च भवेत् पलान्यपामाढकं चतुः षष्टिः।।९१।।

अथवा श्वभ्रमवटं पूर्वोक्तमेवाम्बुना जलेन परिपूर्णं कृत्वा ततः पदशतं क्रमशतमित्वा गत्वा ततः पुनरागत्य यदि तज्जलमूनं न भवति तद्धन्यं शुभमिति, अन्यथा अधन्यम्। अथवा यत्र मृत्तिकानामाढकमपामम्बूनां चतुःषष्टिः पलानि भवेत्तद्धन्यमेव। एतदुक्तं भवति भूमौ मृतिकां संगृह्य अवटनिर्गतां तथा आढकमापूर्य मोलयेत्। तद्यदि चतुःषष्टिः, पलानि भवन्ति तद्धन्यं नान्यथेति। तथा च पराशरः- **बृ.सं., पृ-५५**

निमेषशतमतीत्याखातश्वभ्रगतजलगतां चारिणीं समुद्धृतामापूर्यमाणामतिरक्तां मृदं चतुः षष्टिप-लाढकां तुल्यां च इति।।

अन्यदप्याह-

आमे वा मृत्पात्रे श्वभ्रस्थे दीपवर्तिरभ्यधिकम्।

ज्वलति दिशि यस्य शस्ता सा भूमिस्तस्य वर्णस्य।।९२।।

अथवा आमे अपक्वे मृत्पात्रे मृन्मये भाण्डे श्वभ्रस्थे श्वभ्रान्तरगते, तत्र वर्णनामचिह्नैश्वतस्त्रो दीपवर्तीर्दत्वा ज्वालयेत्, तुल्यकालं ताश्च समाः समाः कार्याः। यस्य वर्णस्य दिश्यभ्यधिकं चिरकालं दीपवर्ती ज्वलति, तस्यैव वर्णस्य सा भूः शस्ता शुभा नान्यस्येति।।

अन्यदप्याह-

श्वभ्रोषितं न कुसुमं यस्य प्रम्लायतेऽनुवर्णसमम्।

तत्तस्य भवति शुभदं यस्य च यस्मिन् मनो रमते।।९३।।

अथवा अनुवर्णसमं ब्राह्मणादिवर्णचतुष्टयस्यानुवर्ण सितरक्तपीतकृष्णचिह्नितमेकजातीयं कार्यमित्यर्थः। कुसुमं पुष्पमनुवर्णसमं श्वभ्रोषितं रात्रौ श्वभ्रे स्थितं कृत्वा, ततो द्वितीयदिने यस्य वर्णस्य सम्बन्धि कुसुमं न प्रम्लायते न शुष्यति, तत्स्थानं तस्यैव वर्णस्य शुभदम्। अथवा यस्य वर्णस्य यस्मिन् भूभागे मनश्चितं रमते, तत्र तस्यैव शुभदं न तत्रैव विचारःकार्य इत्यर्थः। तथा चात्र गर्गः- **बृ.सं., पृ-५६**

अथान्यद् भूमिलक्षणमाह-

सितरक्तपीतकृष्णा विप्रादीनां प्रशस्यते भूमिः।

गन्धश्च भवति यस्यां घृतरुधिरान्नाद्यमद्यसमः।।९४।।

कुशयुक्ता शरबहुला दूर्वाकाशावृता क्रमेण मही।

ह्यनुवर्णं वृद्धिकरी मधुरकषायाम्लकटुका च।।९५।।

वास्तुलक्ष्म प्रवक्ष्यामि विप्रादीनाञ्च भूरिह।

श्वेतारक्ता तथा पीता कृष्णा चैव यत्र क्रमम्।

धृत रक्तान्न मथानां गन्धास्या रसतश्चभूः।

मधुरा च कषाया च अम्लाद्युपरसर क्रमात्।।

विप्रादीनां ब्राह्मणक्षत्रियवैश्यशूद्राणां सितरक्तपीतकृष्णा यथाक्रमेण भूमिः प्रशस्यते। श्वेतवर्णा ब्राह्मणानां भूः प्रशस्ता। रक्तवर्णा लोहिता क्षत्रियाणाम्। पीतवर्णा हरिता वैश्यानाम्।

कृष्णवर्णा शूद्राणाम्। घृतसमगन्धा ब्राह्मणानाम्। रुधिरसमगन्धा क्षत्रियाणाम्। अन्न सदृगन्धा वैश्यानाम्। मद्यसदृशगन्धा शूद्राणाम्।

कुशयुक्ता दर्भसंयुक्ता भूमिर्विप्राणां शुभदा। शरैः काण्डैर्बहुला संयुक्ता क्षत्रियाणाम्। दूर्वा शाद्वलम्,दूर्वायुता वैश्यानाम्। काशावृता शूद्राणाम्। एवं क्रमेण भूः प्रशस्ता। तथा मधुरकषायाम्ब-कटुका चानुवर्णं वृद्धिकरी। मधुरा ब्राह्मणानाम्। कषाया क्षत्रियाणाम्। आम्ला वैश्यानाम्। कटुका शूद्राणामिति। तथा च गर्गः- **बृ.सं., पृ-५७**

अधुना गृहप्रारम्भे विधानमाह-

विप्रः स्पृष्ट्वा शीर्षं वक्षश्च क्षत्रियो विशश्चोरू।

शूद्रः पादौ स्पृष्ट्वा कुर्याद्रेखां गृहारम्भे।।९६, ९७, ९८।।

पूर्वं भूमिं परीक्षेत पश्चाद्वास्तुं प्रकल्पयेत्।

श्वैतारक्ता तथा पीता कृष्णा चैवानुपूर्वशः।।

विप्रादिः शस्यतै भूमिः अतः कार्य परीक्षणम्।।

तिक्ता कषाया च तथा वैश्य शूद्रेषु शस्यतै।।

अरलि मो वै गर्तेस्वनु लिप्ते च सर्वशः।

शिल्पदीपककार ते श्वेता वर्णीया भूमिः ब्राह्मणादीनां कृते सत्वकृत्तीनां जनानां कृते समीचाना भवति। अस्यां भूमौ अहंकारः मद मोह मिथ्याभिमानश्च स्थान नास्ति। ब्राह्मणानां इत्युक्ते सात्विक जनानां कृते एषा भूमिः योग्या भवति। अस्याः स्वादः धृत सदृशं भवति सुगंधः घृतवदेव भवति।

कृष्टां हलविलिखिताम्। प्ररूढबीजां सहितव्रीहिकां कृष्टायामुप्तं बीजं सञ्जातं यस्यम्। गोऽध्युषितां गावोऽध्युषिता निवासिता यस्माम्। ब्राह्मणैश्च सह तां प्रशस्तां प्रशंसिताम्। गोब्राह्मणास्तत्र रात्रिमेकामुषिता इत्यर्थः। एवं कृते शुद्धिर्भूमेर्भवति। तथा चोक्तम्-

एवंविधां भूमिं गृहपतिर्गृहस्वामी सांवत्सरोद्दिष्टे दैवज्ञोक्ते काले समये सर्वगुणसहिते निरुपहते गत्वा।

नानाकारैर्बहुभिर्भक्ष्यैरपूपमोदकैलोपिकाप्रभृतिभिः। तथा दध्ना, अक्षतैश्च यवैः, सुरिभिभिः सुगन्धैः , कुसुमैः पुष्पैः धूपैश्च सुगन्धैर्दैवतपूजां दैवतानां पूजामार्चां क्षेत्रपतेश्च कृत्वा विधाय, ततः, स्थपतीन् विप्रान्, ब्राह्मणांश्चाभ्यर्च्य सम्पूज्य।

विप्रः स्पृष्टवा शीर्षमिति। गृहपतिर्विप्रो ब्राह्मणो यदि भवति तदा शीर्षं स्वमूर्धान स्पृष्टवा येन केनचिदभीष्टेन वस्तुना यथाचरितां रेखां कुर्यात्। एवं क्षत्रियो वक्षः स्पृष्टवा, वैश्यक्षोरू स्पृष्ट्वा, शुद्रः पादो स्पृष्ट्वा गृहारम्भे रेखां कुर्यात्।।

तस्यां कृतायां लक्षणमाह-

वक्रा पादालिखिता शत्रुभयक्लेशदा विरूपा च।

चर्माङ्गारास्थिकृता दन्तेन च भर्तुरशिवाय।।९९, १००, १०१।।

वैरमपसव्यलिखिता प्रदक्षिणं सम्पदो विनिर्देश्याः।

वाचः परुषा निष्ठीवितं क्षुतं चाशुभं कथितम्।।१०२।।

तां रेखां यदि गृहपतिरङ्गुष्ठकेन कुर्यात्, मध्याङ्गुल्याऽथवा प्रदेशिन्या वा ज्येष्ठाङ्गुल्यङ्गुष्ठद्वितीया प्रदेशिनी, तृतीया मध्यमा, चतुर्थ्यनामिका, पञ्चमी कनिष्ठिका, कनकेन सुवर्णेन, मणिना वा रजतेन रूप्येण, मुक्ताभिर्वा,दध्ना, फलेन श्रीफलादिना, कुसुमेन पुष्पेण वा, अक्षतैर्तवैर्वा, एतेषामन्यतमेन यदि वा करोति, तदा शुभं भर्तुः शुभं करोति।

शस्त्रेणेति। तां रेखां यदि शस्त्रेण करोति, तदा शस्त्रेणैव गृहपतेर्मुत्युः। एवं लोहेन बन्धो बन्धनम्। भस्मना अग्निभयं वह्निभीतिम्। तृणेन च तस्करभयं चौरभीतिम्। काष्ठेनोल्लिखिता रेखा राजभयं राजभीतिं करोति।

वक्रा अस्पष्टा पादेनालिखिता च या रेखा सा शत्रुभयं रिपुभीतिं क्लेशांश्च ददाति। विरूपा च या रेखाऽदृश्याऽथवा चित्तदूगाह्लादिनी न भवति साऽपि च शब्दाच्छत्रुभयक्लेशदा। चर्मणा अङ्गारकेण वाऽस्था दन्तेन वा कृता रेखा भवति, तदा भर्तुर्गुहस्वामिनोऽशिवाय न श्रेयसे भवति।

अपसव्येन स्वासव्येन स्वादक्षिणेन लिखिता वैरें करोति। प्रदक्षिणेन याच लिखिता तया सम्पदः समृद्धयो निर्देश्या वक्तव्याः। वामभागाद् दक्षिणभागे दक्षिणे नीयते सा प्रदक्षिणगता रेखा। तथा च प्रश्नकाले वाचो गिरः पुरुषा रूक्षा असङ्गतियुक्तिवाद्विन्यः। निष्ठीवितं श्लेष्मत्यागो मुखात् सद्यः। क्षतुं च नासाशब्दः। गृहारम्भकाले अशुभमनिष्टं कथितमुक्तम्।।

अधुना शल्यज्ञानं विवक्षुरादावेव तत्र विधानमाह-

अर्द्धनिचितं कृतं वा प्रविशन् स्थपतिर्गृहे निमित्तानि।

अवलोकयेद् गृहपतिः क्व संस्थितः स्पृशति किं चाङ्गम्।।१०३।।

रविदीप्तो यदि शकुनिस्तस्मिन् काले विरौति परुषरवम्।

संस्पृष्टाङ्गसमानं तस्मिन् देशेऽस्थि निर्देश्यम्।।१०४।।

गृहं वेश्म अर्धनिचितमर्धकृतं कृतं वा निःशेषं रचितं तत्र प्रविशन्नन्तर्विशन् स्थपतिर्वर्धकिः प्रवेश निमित्तानि चिह्नान्यवलोकयेत् पश्येत्। गृहपतिर्गृहस्वामी क्व संस्थितः, कस्मिन् स्थाने समवस्थितो वास्तुनस्य कस्मिन्नवयवे स्थितः , किं चाङ्गं स्वावयवं स्पृशति।

एतदप्यवलोकयेद् रविदीप्त इति। अत्र तावद्दीप्तदिग्लक्षणं व्याख्यायते। तद्यथासूर्योदयात् प्रभृति दिनस्य प्रथमप्रहारं यावत् तावदैशाीनी दिगङ्गारिणी पूर्वा दीप्ता आग्नेयी धूमिता शेषाः शान्ताः पञ्च। ततः प्रहरादूर्ध्वं प्रहरद्वयं यावत् तावत् पूर्वाऽङ्गारिणी आग्नेयी दीप्ता, याम्या धूमिता, शेषाः, शान्ताः। ततः प्रहरद्वयादूर्ध्वं प्रहरत्रयं यावदाग्नेयी दिगङ्गारिणी याम्या दीप्ता, नैर्ऋती धूमिता, शेषाः शान्ताः। ततः प्रहरत्रयादूर्ध्वं सूर्यास्तं यावत् तावद् याम्याङ्गारिणी नैर्ऋती दीप्ता, पश्चिमा दीप्ता, वायव्या धूमिता, शेषाः शान्ताः। ततो रात्रिप्रहरोर्ध्वं प्रहरद्वयं यावत् तावत् पश्चिमा दिगङ्गारिणी, वायव्या दीप्ता, उत्तरा धूमिला, शेषाः शान्ताः। ततः प्रहरद्वयादूर्ध्वं रात्रौ प्रहरत्रयं यावत् तावद्वायव्या दिगङ्गारिणी, उत्तरा दीप्ता, ऐशानी धूमिता, शेषाः शान्ताः। ततो रात्रौ प्रहरत्रयादूर्ध्वं सूर्योदयं यावत् तावदुत्तरा दिगङ्गारिणी, ऐशानी दीप्ता, पूर्वा धूमिता, शेषाः पञ्च शान्ता इति। तस्मिन् काले गृहप्रवेशसमये शकुनिः पक्षी रविवशेन तत्काले या दीप्ता तस्यां दिशि स्थितः सूर्याभिमुखश्च यदि परुषरवं रूक्षशब्दं च विरौति, तदा संस्पृष्टाङ्गसमानं गृहपतिना स्वकीयं यदङ्गं स्पृष्टं तत्समानं तदङ्गसम्भूतं तस्मिन् देशे यत्र गृहपतिः स्थितस्तत्रास्थि निर्देश्यं वक्तव्यम्। अत्र तत्समानं तदङ्गसम्भूतं। ननूक्तमेवमुच्यते - संस्पृष्टाङ्गसमानमित्यनेन ज्ञापयति। यत् तदङ्गं स्पृष्टं तत्प्रमाणे भूभागे शल्यं स्थितमिति ज्ञेयम्। उक्तमागमान्तरे-

अन्यदप्याह-

शकुनसमयेऽथवाऽन्ये हस्त्यश्वश्वादयोऽनुवाशन्ते।

तत्प्रभवमस्थि तस्मिंस्तदङ्गसम्भूतमेवेति।।१०५।।

शकुनसमये निमित्तकाले अथवाऽन्येऽपरे प्राणिनो हस्त्यश्वश्वादयः, हस्ती गजः, अश्वस्तुरगः, श्वादयः, श्वा सारमेयः, आदिग्रहणादुष्ट्राकाजाविकमार्जारप्रभृतयः। एते

यद्यनुवाशन्ते शब्दं कुर्वन्ति। एतेषामन्यतमो निमित्तकाले रविदीप्तो यदि वाशते, तदा तस्मिन् स्थाने गृहभर्त्रधिष्ठितेऽङ्ग्ह्य तत्प्रभवं तत्प्राणिजातं तदङ्गसम्भुतमेव गृहपतिसंस्पृष्टाङ्गसमानमेव-स्थिवक्तव्यम्। प्रमाणं प्राग्वदिति।।

अन्यदप्याह-

सूत्रे प्रसार्यमाणे गर्दभरावोऽस्थिशल्यमाचष्टे।

श्वश्रृगाललङ्घिते वा सूत्रे शल्यं विनिर्देश्यम्।।१०६।।

सूत्रे प्रसार्य यदि गर्दभस्य खरस्य रवः शब्दः श्रूयते, तदा अस्थिशल्यामाचष्टे कथयति। अथवा सुना श्रृगालेन वा लङ्घिते अतिक्रमिते तत्प्रभवमस्थिशल्यं विनिर्देश्यं वक्तव्यम्। गृहभर्तुरधिष्ठिते स्थाने संस्पृष्टाङ्गसमानं प्रमाणं प्राग्वदिति।।

शुभमाङ्गल्यज्ञानमाह-

दिशि शान्तायां शकुनिर्मधुरविरावी यदा तदा वाच्यः।

अर्थस्तस्मिन् स्थाने गृहेश्वराधिष्ठितेऽङ्गे वा।।१०७।।

तत्काले शान्तायां दिशि यदि शकुनिः पक्षी मधुरविरावी मधुरं विरौति, तदा तस्मिन् स्थाने यत्र शकुनिः स्थितस्तत्रार्थो वाच्यो धनं वक्तव्यम्। अथवा गृहेश्वरेण गृहपतिना वास्तुनरस्य यदङ्गमधिष्ठितं तत्र वाच्य इति। हस्तविज्ञानं प्राग्वदिति यदुक्तं संस्पृष्टाङ्गसमानमिति।

उत्तरे लम्बिता भूमिः प्रशस्ता गृहकर्मणि।

दक्षिणे लम्बिता सैव दुःखदा विकटा सदा।।[1]

देवानां तु द्विजातीनां चतुरस्त्रायताः श्रुताः।

वस्त्वाकृतिरनिन्द्या.......................।।[2]

तत्र तावत्प्रथमं भूमिनिखनने यावदङ्गं गृहभर्तुरुत्थितस्योर्ध्वबाहोर्निमज्जते, तावत्प्रमाणेन तच्छल्यं वक्तव्यम्। तथा च गर्गः- **बृ.सं., पृ-६१**

१. वास्तु सार विज्ञानम ४२५

२. मयमतम अ.३,१

श्वेतस्थानं द्विजानामीषद्रक्तं भूमिर्महीभुजाम्।
विशां पीतं च चतुर्थाना कृष्णवर्णं शुभप्रदम्।।[१]

स्वादे भवेद्या मधुरा सिताभा सर्वेषु वर्णेषु मही प्रशस्ता।
स्नेहान्विता बभ्रुभुजङ्गयोवां सौहार्दवत्याखुबिडालयोर्वा।।[२]

घृतगन्धा शुभास्वादे श्वेतेष्टा ब्रह्मणस्य भू:।।
रक्ता तु शोणतिगन्धा तु वरा क्षत्रियस्या।
पीताम्लातैलगन्धा च वैश्यवर्णन्नयस्य च।।
कटुका मत्स्यगन्धाभू कृष्णाशुद्रेरिऽचलेष्वति।
शरावेधृतपूर्णोऽस्मिन्नमेवर्त्तिचतुष्टये।।
पूर्वाद्यादीप्यते वर्ति विप्रादीनां शुभा मही।।[३]

.... चैकवर्णायुक्। एकसमानवर्णा भवेत्।[४]

धवलं रक्तवर्ण च स्वर्णं कृष्णं कपोतकम्।[५]

श्वेता रक्ता च पीता च कृष्णं कपोत सन्निभा।।[६]

सिता रक्ता च पीता च कृष्णा चैव क्रमान्मही।
विप्रादीनां च हि वर्णानां सर्वेषामयथवा हिता।।[७]

श्वेता च ब्राह्मणी भूमी रक्ता वै क्षत्रिया स्मृता।
पीतवर्णा भवेद्वैश्या शूद्रा तु कृष्णवर्णिनी।।[८]

श्वेता रक्ता तथा पीता कृष्णा चैव यथाक्रमम्।
विप्रादीनां प्रशस्ता स्यान्मृत्तिका च ततो द्विजः।।[९]

---

१. वशिष्ठसंहिता, ३९-३
२. राजवल्लभः अ-१.१४
३. वास्तुमण्डनम अ-१.६५,६८
४. मानसारः, अ.४ पृ-८
५. मानसारः, अ-३, पृ-१०
६. मयमतम,अ ३-५
७. समराङ्गणसूत्रधारण अ.८, ४८
८. अपराजितपृच्छाग्रन्थे, ५०-५१
९. मत्स्यपुराण, २५३, ११-१२

...... भूमिर्देवविप्रहिता।............ श्वेतवर्णा च भूरपि।।

..... रक्तवर्णा च भूरपि।। विपूला लोहयुग्मभूमिः क्षत्रियाणां हितप्रदा।।

नातिकृष्णा न रक्ता च....। भूरियं वैश्यजातीनां बलसम्पत्करा मता।।

(कटुमृस्त्ना कृष्णवर्णा.....।....... शूद्राणां क्षेमकारीणी)।[1]

अथान्यच्छुभाशुभज्ञानमाह-

स्कन्धाच्च्युते शिरोरुक् कुलोपसर्गोऽपवर्जिते कुम्भे।

भग्नेऽपि च कर्मिवदश्युते कराद् गृहपतेर्मृत्युः।।१०८, १०९।।

सूत्रे प्रसार्यमाणे यदि सूत्रचछेदो भवति, तदा गृहपतेर्मुत्युर्भवति। तथा कीलके निखनमाने अवाङ्मुखे अधोमुखे गते महान् रोगो गृहभर्तुभवति। तथा गृहनाथस्य वेश्मप्रभोः स्थपतीनां वर्धकिनां च स्मृतिलोपः स्मृतिभ्रंशो यदा भवति, तदा तेषामेव मृत्युरादेश्यो वक्तव्यः।

कुम्भे घटे आनीयमाने स्कन्धादसाच्युते चलिते शिरोरुग् गृहपतेर्भवति, तथा अपवर्जिते अधोमुखे गते कुलोपसर्गः कुलस्योपद्रवस्तस्यैव, तथा भग्ने कुम्भे कर्मिवधः कर्मकाराणां वधो मरणं भवति। कराद्धस्ताच्च्युते पतिते कुम्भे गृहपतेर्मुत्युर्मरणं भवति।

शिलान्यासप्रर्दनार्थमाह-

दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत् प्रथमम्।

शेषाः प्रदक्षिणेन स्त्मभाश्चैवं समुत्थाप्याः।।११०।।

छत्रस्त्रगम्बरयुतः कृतधूपविलेपनः समुत्थाप्यः।

स्तम्भस्तथैव कार्यो द्वारोच्छ्रायः प्रयत्नेनः।।१११।।

दक्षिणपूर्वे कोणे आग्नेयदिशि स्त्रग्गन्धधूपाम्बरोपहारहिरण्यमद्यमांसादिभिः पूजामर्चा कृत्वा प्रथममादौ शिलां् न्यसेत् स्थापयेत्। शेषा अन्याः शिलाः प्रदक्षिणेन न्यास्याः। एतदुक्तं भवति- प्राग्दक्षिणस्यां दिशि शिलान्यासं कृत्वा, ततो दक्षिणस्याम्, ततो नैर्ऋत्याम्, ततः पश्चिमायाम्, ततो वायव्याम्, तत उत्तरस्याम् , तत ऐशान्याम्, ततः पूर्वस्यां पठन्ति। उत्तरपूर्वे चैशानकोणे प्रथमं शिलान्यासं कृत्वा, ततः शेषाः प्रदक्षिणेन न्यास्या इत्येतल्लोकं स्थपतिषु दृश्यत इति। स्तम्भाश्चैवं समुत्थाप्याः, एवमनेनैव प्रकारेण स्तम्भाः, समुत्थाप्याः, यथा शिलान्यासः, कृतस्थता स्तम्भानामुत्थापनं कार्यमिति।

१. विश्वकर्मवास्तुशास्त्रम् ,अ-५,८-१३

स्तम्भद्वाराणां विशेषफलमाह- स्तम्भश्छत्रेणातपत्रेण स्त्रग्भिर्मालभिरम्बरैर्युतः। तथा कृतधूपविलेपनो दत्तधूपो दत्तानुलेपनः समुत्थाप्यः। तथैव तेनैव प्रकारेण प्रयत्नेन द्वारोच्छ्रायः कार्यः। एतदुक्तं भवति - यथा छत्रस्त्रगम्बरयुतः कृतधूपविलेपनस्तम्भ उत्थाप्यस्तथा द्वारमप्युत्थापनीयमिति। तथा च गर्गः- **बृ.सं., पृ-६३**

स्निग्धा .... आशुबीजोन्दमा।
सम्प्रोक्त बहुपांसुरक्षयजला ....।। [1]

घर्मागमे हिमस्पर्शा या स्यादुष्णा हिमागसे।
प्रावृष्युष्णहिमस्पर्शा सा प्रशस्ता वसुन्धरा।।[2]

.... श्रेष्ठा सर्वबीजप्ररोहणी।
.... स्निग्धा.....................।। [3]

सा भूमिरुत्तमा ज्ञेया त्रिरात्राङ्कुरवर्धिनी।
सा मध्यमा च विज्ञेया पञ्चरात्राङ्कुरप्रदा।।
मन्दाङ्कुरप्रदा भूमिरधमा चेति गद्यते।
सा वर्ज्या सर्वकार्येषु बीजानां क्षयकारिणी।। [4]
कुङ्कमागुरुकर्पूरस्पृक्कैलाचन्दनादिभिः।
सुगन्धा मिश्रितैरेभि : पृथक्स्थैवा वसुन्धरा।।
कल्हारपाटलाम्भोजमालतीचम्पकोत्पलैः
स्थलाम्बुप्रभवैश्चान्यैः सुगन्धा कुसुमैस्तथा।।
गोमूत्रगोमयक्षीरदधिमध्वा ज्यगन्धभाक्।
समानगन्धा मदिरामाध्वीकेभमदासवैः।।[5]

तिक्ता च कटुका चैव कषायलवणाम्लका।
मधुरा षड्रसोपेता सर्वसम्पत्करी धरा।।[6]

---

१. मनुस्यालयचन्द्रिका,१,अ.१७
२. समराङ्गणसूत्रधारण -२ःअ.८.५०
३. मयमतम, अ.३.३
४. विश्वकर्मा वास्तु शास्त्रम,
५. समराङ्गणसूत्रधारण, अ. ४४ -४७
६. मयमतम, अ. ३, ५,६

मोदाः स्वादुकषायतिक्तकटुकास्वादान्विताश्च स्मृताः।[1]
विप्राणां मधुरास्वादा कटुका क्षत्रियस्य तु।।
तिक्ता कषाया च तथा वैश्यशूद्रेषु शस्यते।[2]

मधुगन्धा पुष्पगन्धा सर्पिगन्धा च भूरपि।
स्थिरवर्णा च भूश्शस्त सर्ववास्तुषु कीर्तिता।।[3]

स्तम्भादीनां प्राणिपूषविष्टेषु तस्मिंश्च कम्पितपतितदुःस्थिते सति फलमाह-

विहगादिभिरवलीनैराकम्पितपतितदुः स्थितैश्च तथा।
शक्रध्वजसदृशफलं तदेव तस्मिन् विनिर्दिष्टम्।।११२।

विहगाः पक्षिणः। आदिग्रहणात् सरीसृपमधुमक्षिकाप्रभृतयो ग्रहीतव्याः। स्तम्भेषु द्वारेषु वा विहगादिभिरवलीनैः शिलष्टैस्तेषु संलग्नैरित्यर्थः। तथा स्तम्भादिभिराकम्पितैश्चलितैः पतितैवो अधोगतैश्च शक्रध्वज इन्द्रध्वजे शुभाशुभे यत् फलमुक्तं तदेव स्तम्भादौ विनिर्दिष्टमुक्तामिति। तथैन्द्रध्वजे –

वास्तुनो विशेषमाह-

प्रागुत्तरोन्नते धनसुतक्षयः सुतवद्यश्च दुर्गन्धे।
वक्रे बन्धुविनाशो न सन्ति गर्भाश्च दिङ्मूढे।।११३ ।।
इच्छेद्यदि गृहवृद्धिं ततः समन्ताद्विवर्धयेत्तुल्यम्।
एकोद्देशे दोषः प्रागथवाऽप्युत्तरे कुर्यात्।।११४।।

वास्तुनि प्राक् पूर्वस्यां दिश्युन्नते उत्तरस्यां स्थिते धनस्यार्थस्य सुतानां पुत्राणां च क्षयो विनाशो भवति। एवं दुर्गन्धे दुष्टागन्धे वास्तुनि सुतवधः पुत्रमरणं भवति। वक्रेऽस्पष्टे यथादिग्विभागमनवस्थिते बन्धुविनाशो बन्धुमरणम्। दिङ्मूढे दिग्भ्रष्टे यस्य दिग् न ज्ञायते तत्र गर्भा न सन्ति, न भवन्ति, विनश्यन्तीत्यर्थः।

---

१. विष्णुधर्मोत्तरपुराणे-
२. शिल्परत्नग्रन्थे , अ.३.१०
३. मत्स्यपुराणे ,
४. विश्वकर्मवास्तुशास्त्रम्

एवमन्यास्वपि दिक्षून्नतस्थितेऽनिष्टमेव फलं ज्ञेयम्। तस्माद्यदि गृहवृद्धिमिच्छेद्वाञ्छेत् ततस्तस्माद्धेतोः समन्तात् सर्वासु दिक्षु तुल्यं समं विवर्धयेत्, कदाचिदप्येकोद्देशे एकस्मिन् प्रदेशे स्थाने यः परिहार्यो वृद्धिदोषोऽस्ति स प्राक् पूर्वस्यां दिशि कुर्यादथवोत्तरे उत्तरस्यां दिशि कुर्यादिति।।

अथ नन्वत्र यदुक्तमेकोद्देशे दोषः प्रागथवाऽप्युत्तरे कुर्यात्, केन हेतुना क्रियत इति तदर्थं एवल्पदोषमाह-

प्राग्भवति मित्रवैरं मृत्युभयं दक्षिणेन यदि वृद्धिः।

अर्थविनाशः पश्चादुदग्वृद्धिर्मनस्तापः।।११५।।

वास्तुनि प्राक् पूर्वस्यां दिशि वृद्धिर्भवति, तदा मित्रवैरं सुहृद्भिः सह द्वेषो भवति। एवं दक्षिणे यदि वृद्धिर्भवतिः, तदा मृत्युभयं मरणभीतिः,। पश्चात् पश्चिमायां दिशि वृद्धेरर्थस्य धनस्य विनाशः क्षयः। उदगुत्तरस्यां दिशि वृद्धेर्मनस्तापश्चित्तसन्तापो भवति। एवं स्वल्पदोषत्वादुक्त-मेकोद्देशे दोषः प्रागथवाऽप्युत्तरे कुर्यादिति।।

नामर्क्षाद् द्विसुताङ्कदिग्भवगतो ग्रामः शुभोऽन्योऽन्यथा

तत्कोणेऽन्त्यभ्रुवां शुभं निवसतां दोषाः परेषामलम्।

कन्याकर्किधनुस्तुलाक्रियघटाः कौप्यण्डजो याम्यतो

मध्येऽन्ये न वसन्त्येन्द्रककुभो वर्गाः म्युरोजास्वनः।।

सं.टी.- नामर्क्षात् नामराशेः द्विसुताङ्कदिग्भबगतो ग्रामः शुभः स्यात्। अन्य उक्तसंख्यान्यराशिको ग्रामोऽन्यथाऽशुभः स्यादित्यर्थः। तत्कोणे ग्रामस्य कोणेऽन्त्यभुवां रजकादीनां निवस्रतां शुभं भवति। परेषां अन्यवर्णानां अलमत्यर्थ दोषा भवन्ति। तथा याम्यतो दक्षिणदिशमारभ्याष्टदिक्षु क्रमेण कन्याकर्किधनुस्तुलाक्रियघटाः कौर्प्यण्डजः (कौर्पीवृश्चिकः, अण्डजो मीनः) एते न वसन्ति, तथाऽन्ये (वृषमिथुनसिंहमकराः) मध्ये ग्राममध्यभागे न वसन्ति। अथ- इन्द्रिककुभः पूर्वदिशः सकाशात् क्रमेण अप्रमुखाः (अ-कच-टतपयशा इति) अष्टौ वर्गा ओजखिनो बलिनो भवन्ति , कथं भूताः स्वपञ्चमपराः (खस्मात् पञ्चमः परः क्षत्रुर्येषां ते तथोक्ताः) इत्यग्रिमश्लोकेनान्बयः।।

चतुः शालगृहे कस्यां दिशि किं कुर्यादित्याह-

ऐशान्यां देवगृहं महानसं चापि कार्यमाग्नेय्याम्।

नैर्ऋत्यां भाण्डोपस्करोऽर्थधान्यानि मारुत्याम्।।११६।।

चतुः शाले ऐशान्यां पूर्वोत्तरस्यां दिशि देवतागृहं कार्यम्। आग्नेय्यां पूर्वदक्षिणस्यां महानसं रन्धनस्थानम्। नैर्ऋत्यां दक्षिणपश्चिमायां भाण्डोपस्करणं गृहौपयिकानां स्थानं कार्यम्। मारुत्यां वायव्यां पश्चिमोत्तरस्यामर्थानां धनानां धान्यानां च स्थापनं कार्यम्।

अत्राचार्येण सामान्येन प्रविभाग उक्तः किरणाख्ये तन्त्रे विशेषतरः पठयते। तथा च -

जलस्य दिक्प्रविभागेण शुभाशुभफलमाह-

प्राच्यादिस्थे सलिले सुतहानिः शिखिभयं रिपुभयं च।

स्त्रीकलहः स्त्रीदौष्टयं नैःस्व्यं वित्तात्मजविवृद्धिः।।११७।।

वास्तुनः प्राच्यां पूर्वस्यां दिशि स्थिते सलिले सुतहानिः पुत्रमरणं भवति। एवमाग्नेय्यां शिखिभयमग्निभयम्। दक्षिणस्यां रिपुभयं शत्रुभयम्। नैर्ऋत्या स्त्रीकलहः, स्त्रीणामप्रीतिः। पश्चिमायां स्त्रीदौष्टयं स्त्रीणामुन्मत्तता दैः शील्यम्। वायव्ये नैः स्व्यं निर्धनत्वम्। उत्तरस्यां वित्तानां धनानां विवृद्धिः। ऐशान्यामात्मजानां पुत्राणां विवृद्धिर्भवति।।

गृहार्थमेतान् वृक्षान् वर्जयित्वा अन्यान् छिन्द्यादित्याह-

खगनिलयभग्नसंशुष्कदग्धदेवालयश्मशानस्थान्।

क्षीरतरुधवविभीतकनिम्बारणिवर्जितान् छिन्द्यात्।।११८।।

खगाः पक्षिणस्तेषां निलयो गृहं यत्र यस्मिन् वृक्षे, तथा यो वृक्षो भग्नः, यश्च दग्धोऽग्निप्लुष्टः, यश्च देवालयस्थः, सुरगृहे स्थितः, श्मशाने स्थितः। तथा क्षीरतरुः, क्षीरवृक्षः पिप्पलादिकः, धवः, विभीतकः, निम्बः, अरणिः, एतान् वृक्षान् वर्जयित्वा विहायान्यान् छिन्द्यात् शेषानन्यान् कल्पयेदिति।।

तरुच्छेदलक्षणं पतितस्य च शुभाशुभज्ञानमाह-

रात्रौ कृतबलिपूजं प्रदक्षिणं छेदयेद् दिवा वृक्षम्।

धन्यमुदक्प्राक्पतनं न ग्राह्योऽतोऽन्यथा पतितफः।।११९।।

वृक्षं तरुं रात्रौ कृतबलिपूजं निशि कृतो बलिरुपहारः पूजाऽऽर्चा च यस्य तं दिवा दिवसे प्रदक्षिण प्रादक्षिण्येन प्राक्प्रभृति छेदयेद् ऐशानीमादितः, कृत्वा पूर्वाग्नेययाम्यनैर्ऋत्यपश्चिमवायव्योत्तरान्तं यावत्। उदगुत्तरस्यां दिशि प्राक् पूर्वस्यां वा वृक्षस्य कल्पितस्य पतनं धन्यं प्रशस्तम्। अतोऽन्यथा पतितोऽन्यासु परिशिष्टासु दिक्षु पतितो न ग्राह्यस्त्याज्य इत्यर्थः।।

शुभाशुभत्वं वृक्षशल्यज्ञानमाह-

छेदो यद्यविकारी ततः शुभं दारु तद्गृहौपयिकम्।

पीते तु मण्डले निर्दिशेत् तरोर्मध्यगां गोधाम्।।१२०।।

मञ्जिष्ठाभे भेको नीले सर्पस्तथाऽरुणे सरटः।

मुद्गाभेऽश्मा कपिले तु मूषकोऽम्भश्च खड्गाभे।।१२१।।

वृक्षस्याविकारी विकाररहितच्छेदो यदि भवति ततस्तस्माद्धेतोस्तद्दारु काष्ठं गृहौपयिकं वेश्मनं औपयोगिकं शुभं भवति। तरोर्वृक्षस्य छेदमध्ये पीते पीतवर्णे मण्डले दृष्टे स्वाभाविकं रूपमपहाय यदि दृश्यते तदा मध्यगां मध्ये तरोः स्थितां गोधां विनिर्दिशेद् वदेत्। गोधा प्राणिविशेषः।

मञ्जिष्ठाभे मञ्जिष्ठावर्णे एवमेव मण्डले दृष्टे भेको मण्डूकः। एवं नीलमण्डले सर्प उरगः। तथा तेनैव प्रकारेणारुणे लोहितवर्णे मण्डले सरटः प्राणिविशेषः। कृकलासइति केचित्। मुद्गाभे मद्गसदृशे मण्डले अश्मा पाषाणः। कपिले कपिलवर्णे मूषकः। खड्गाभे खड्गसदृशे मण्डले कृष्णे अम्भो जलं वृक्षस्य मध्यगतं ज्ञेयम्। पाषाणाद्ये तदेव लक्षणमिति।।

गृहपतेः परिभाषार्थमाह-

धान्यगोगुरुहुताशसुराणां न स्वपेदुपरि नाप्यनुवंशम्।

नोत्तरापरशिरा न च नग्नो नैव चार्द्रचरणः श्रियमिच्छन्।।१२२।।

धान्यानां व्रीहीणां गवां सुरभीणां गुरूणां मित्रादीनां हुताशनस्याग्नेः सुराणां देवानामुपरि पृष्ठे श्रियमिच्छंल्लक्ष्मीमभिलपन्न स्वपेन्न सुप्यात्। वंशान्युक्तानि –

इत्येवं वंशानामुपरि तिर्यक् कृत्वा तदनुसारेण शय्यां दत्वा न स्वपेत् सुप्यात्। उत्तरस्याम् उदीच्याम् उपरस्यां पश्चिमायां वा दिशि शिरः कृत्वा न स्वपेत्। नग्नो दिग्वासाश्च न स्वपेत्। नैव चार्द्रचरणो जलक्लिन्नपादः स्वपेत्। तथा च गृहस्य स्वपतः पादस्थाने नागदन्ता न भवन्ति, तथा शयीत। तथा च विश्वकर्माह- **बृ.सं., पृ-७०**

प्रवेशलक्षणमाह-

भूरिपुष्पविकरं सतोरणं तोयपूर्णकलशोपशोभितम्।

धूपगन्धबलिपूजितामरं ब्राह्मणध्वनियुतं विशेद् गृहम्।।१२३।।

एवंविधं गृहं वेश्म विशेत् प्रविशेत्। कीदृशम् भूरिपुष्पविकरम्? बहुप्रकाराणां पुष्पाणां कुसुमानां विकरः समूहो यत्र , तथा सतोरणं तोरणसंयुक्तं तोरणं गृहाग्रे कुर्यात्। तोयपूर्णै र्जलपूरितैः, कलशैरुदकुम्भैरुपशोभितं भूषितम्। धूपैर्गुगुलप्रभृतिभिर्गन्धैः सुगन्धद्रव्यैरगुरुप्रभृति-भिर्बलिभिरुपहारैश्च पूजिता अर्चिता अमरा देवतां यत्र, तथा ब्राह्मणध्वनियुतं ब्राह्मणानां द्विजानां ध्वनिर्वेदशब्दस्तेन युतम्। अत्र सामान्येनोक्तं पूजितामरम्, तथापि वास्तुमध्यगता अमराः पूजनीया न बाह्यस्थाः शिखिपर्जन्यप्रभृत-योऽमाद्या वा। तन्त्रान्तरेऽप्युक्तम्

सा भूमिः ब्रह्मणादीनां वर्णानां सम्पदावहा।। मधुतैलाज्यगन्धाश्च (च)..................।।[1]

पुत्रागजातिपुष्पाब्जधान्यपाटलगन्धकैः।।

पशुगन्धसमा................................।[2]

सा शुभा सर्ववर्णानां सर्वसम्पत्करी धरा। दध्याज्यमधुगन्धा च ....।।[3]

धेनुभिश्च समायुक्तं (क्ता) किं च पुंनागजातिभिः।

सरसीरुहैर्धान्यैश्च पाटलीपुष्पगन्धकैः।।[4]

वर्णानां स्वादतः शस्ता सर्वेषां मधुराथवा।।[5]

माधुर्यमृत्तिका भूमिर्देवविप्रादिहितप्रदा। कषायमृत्तिका भूमि.........................।।

(कटुमृत्स्ना ....)।।[6]

माधुर्य च कषायं ब्राह्मणानां शुभप्रदम्। .... तिक्तम् ....२, अम्लरसान्वितम्, एवं।।[7]

कटुकारसम्।[8]

ब्राह्मणी मधुरास्वादा कषाया क्षत्रिया तथा।

क्षारस्वादा भवेद्वैश्या शूद्री स्यात्कटुका तथा।[9]

कषायमधुरं सम्यक् कथितं तत् सुखप्रदम्।[10]

तिक्तरसान्वितम्, अम्लरसान्वितम् , कटुकरसम्।[11]

---

१. मानसारग्रन्थे,
२. मयमतम,
३. मयमतम,अ.३.१०
४. मानसारग्रन्थे,,अ .३
५. समराङ्गणसूत्रधार, अ.८.४९
६. विश्वकर्मवास्तुशास्त्रम
७. मानसारः, अ.३.१०
८. मानसारः, अ.३., पृ-७
९. अपराजितपृच्छाकारः, ५१-५२
१०.मयमतग्रन्था अ. २.११
११.मयमतम, अ.२, पृ-८

२. प्रासादलक्षणाध्यायः

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह-

कृत्वा प्रभूतं सलिलमारामान् विनिवेश्य च।

देवतायतनं कुर्याद्यशोधर्माभिवृद्धये।।१।।

प्रभूतं पर्याप्तं सलिलं जलं कृतवा तत्र चारामान् वृक्षवाटिकान् विनिवेश्य वेशयित्वा यशोधर्मा-भिवृद्धये यशसः कीर्तेः धर्मस्य चाभिवृद्धयर्थं देवतायतनं देवतागृहं कुर्याद् विदध्यात्।

अत्रैव प्रशंसनार्थमाह-

इष्टापूर्तेन लभ्यन्ते ये लोकास्तान् बुभूषता।

देवानामालयः कार्यो द्वयमप्यत्र द्दश्यते।।२।।

इष्टं यज्ञादिकम्, पूर्तं वापीकूपतडागादिकम्। तथा चोक्तम्

इष्टापूर्तेन ये लोकाः पुण्यस्थानानि लभ्यन्ते प्राप्यन्ते, तान् बुभूषता भवितुमिच्छता प्राप्तुमिच्छतेत्यर्थः। देवानां सुराणामालायः कार्यः गृहं देवानां कर्तव्यमित्यर्थः। यतोऽत्र देवालये द्वयमपि दृश्यते। इष्टापूर्तेषु यत् फलं तदत्र दृश्यते प्राप्यत इत्यर्थः। तथा च काश्यपः- **बृ.सं., पृ-१२१**

कीदृशेषु स्थानेषु सुरा रज्यन्त इत्याह-

सलिलोद्यानयुक्तेषु कृतेष्वकृतकेषु च।

स्थानेष्वेषु सान्निध्यमुपगच्छन्ति देवताः।।३।।

सलिलयुक्तेषु जलसंयुतेषु, उद्यानयुक्तेषूपवनसहितेषु च स्थानेषु। कृतेषु निष्पादितेषु, अकृतकेषु स्वयं निष्पन्नेषु। एतेषु स्थानेषु देवताः सान्निधयं सन्निहितत्वमुपगच्छन्ति यान्ति।।३।।

नगरेषु, ग्रामेषु तथा अन्य सामान्य स्थानेषु यदा देवतायतनस्य निर्माणमावश्यकमस्ति तदा तत्र अपेक्षित भूम्याः यज्ञादि द्वारा शुद्धिकरणं कृत्वा तत् पश्चात् एतत् स्थानस्योपरि मन्दिर निर्माणं क्रियते स्म। गृह्यसूत्रेषु एषां "भूपरीक्षा" इति कथ्यते। गृह्यसूत्रेषु तथा पौराणिक

ग्रन्थेषु एवं स्थापत्य- शास्त्रेषु मन्दिरस्य एत्तम स्थानः प्रायः समुद्र- तटः, सरिता- तटः, सुन्दरमुपवनं, तथा पर्वतीय प्रदेशः अस्ति इति वर्णितं वर्तते।[1]

अन्यच्च कीदृशेष्वित्याह-

हंसकारण्डवक्रौञ्चचक्रवाकविराविषु।

पर्यन्तनिचुलच्छायाविश्रान्जलचारिषु।।४, ५।।

एवंविधेषु सरःसु नित्यं सर्वकालं देवता देवविशेषा रमन्ते क्रीडन्ति। कीदृशेषु? नलिनीछत्र-निरस्तरविरश्मिषु, नलिनी पद्मिनी सैव छत्रं तेन नलिनीछत्रेण पद्मिन्यातपत्रेण निरस्ता निराकृता रविरश्मयः सूर्यकिरणा येषु। हंसाः पक्षिविशेषास्तेषामंसाः स्कन्धास्तेभ्य आक्षिप्ता दूरे प्रेरितास्ते कह्लाराः पुष्पविशेषाः सितोत्पलास्तेषामाक्षेपणाय या वीथी मार्गस्तत्र यद्विमलं निर्मलं वारि जलं येषु।

हंसाः, कारण्डवाः क्रौञ्चाः, चक्रवाकाः- एते सर्व एव पक्षिविशेषाः। एषां विरावः शब्दो येषु सरःसु, तथा पर्यन्तेषूतान्तेषु ये निचुला वृक्षविशेषास्तेषां याश्छायास्तासु छायासु विश्रान्ता जलचारिणो जलप्राणिनो येषु सरःसु तेषु नित्यं देवता रमन्ते।।

अन्यत्कीदृशेष्वित्याह-

क्रौञ्चकाञ्चीकलापाश्च कलहंसकलस्वराः।

नद्यस्तोयांशुका यत्र शफरीकृतमेखलाः।।६।।

फुल्लतीरद्रुमोत्तंसाः सङ्गमश्रोणिमण्डलाः।

पुलिनाभ्युन्नतोरस्या हंसहासाश्च निम्नगाः।।७।।

यत्र यस्मिन् स्थाने एवंविधा नद्यः सरितस्तत्र नित्यं देवता रमन्ते। कीदृश्य? क्रौञ्चाः पक्षिविशेषास्त एव सशब्दत्वात् काञ्चीकलापो रशनाविस्तारो यासाम्। कलहंसा राजहंसास्तेषां यः कलो मधुरः स्वरः शब्दः सम्भाषणं यासाम्। तोयं जलं तदेवांशुकमम्बरं यासाम्। शफर्यः सूक्ष्ममत्स्यास्ता एव कृता मेखला याभिः। मेखला वस्त्रस्योपरि बध्यते। नीवीति लोकप्रसिद्धा। तथा च-

नीविराग्रन्थने नार्या जघनस्थस्य वाससः।।इति।।

---

१. भारतीय वास्तुकला का इतिहास, पृ-४

फुल्लतीरेति। यत्र ईदृश्यो निम्नगा नद्यस्तत्र नित्यं देवता रमन्ते। फुल्लाः पुष्पितास्तीरेषु प्रान्तेषु ये द्रुमा वृक्षास्त एवोत्तंसाः कर्णपूष्णाति मुण्डमाला वा यासाम्। पुलिनेषु तीरेषु ये अभ्युन्नता उच्चाः प्रदेशास्त एवोरस्या उरसि भवाः स्तना यासाम्। हंसाः पक्षिविशेषोस्त एव शुक्लत्वाद्वासो वसनं यासाम्। तास्तथाभूताः। तासू देवता रमन्ते।।

अस्माकं देशे मोहम्मदीयागमन समये वास्तुकला अतिवोत्कृष्टावस्थायामासीत् तथा तस्य परम्परा अतीव गुह्यमेवं सुदृढमासित्।

मन्दिरनिर्माणेन सह मूर्तिकलायाः विकासः अपि अभवत्, तथा एतेषां शनैः शनैः कलात्मकतायाः चरमादर्शः अपि प्रातः।[१]

धौलवीरायाः साक्ष्यमेवं ऋग्वैदिक सन्दर्भेन तुलनात्मकमध्ययेनाधारेण एतेषां वैदिक नगरस्य दृष्टान्तं मन्ते।[२]

भगवानस्रिहः (वैदिक हरप्पन्स, प्रथम संस्करणं, १९९४ ई.पृ-८४-८५) धौलवीरायाः साक्ष्यमेवं ऋग्वैदिक सन्दर्भेन तुलनात्मकमध्ययेनाधारेण एतेषां वैदिक नगरस्य दृष्टान्तं मन्ते।[३]

अन्यत्कीदृशेषु स्थानेषु रमन्त इत्याह-

वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु।

रमन्ते देवता नित्यं पुरेषूद्यानवत्सु च।।८।।

वनोपान्तेषु वनोपकण्ठेषु। उपान्तशब्दः प्रत्येकभिसम्बध्यते। नदीषु सरित्सु। शैलेषु पर्वतेषु। निर्झरोपान्तभूमिषु, निर्झरेण प्रपातपानीयेन ते युक्ता उपान्ता नदीप्रभृतीानां समीपास्तेषु भूमिषु। नियतं झरन्ति स्त्रवन्तीति निर्झराः। तेषु नित्यं सर्वकालं देवता रमन्ते क्रीडन्ते। पुरेषु नगरेषु, उद्यानवत्सु येषूद्यानान्युपवनानि विद्यन्ते तेषु नित्यं रमन्त इति। तथा च काश्यपः-

बृ.सं., पृ-१२३

---

१. मध्यकालीन भारतीय कलाएँ एवं उनका विकास, पृ-३३

२. मध्यकालीन भारतीय कलाएँ एवं उनका विकास, पृ-३२

३. प्राचीन भारत मे नगर तथा नगर –जीवन, पृ-२४-२५ उद्धृतम्

अधुना प्रतिष्ठाकरणे भूमिगुणानाह-

भूमयो ब्राह्मणादीनां या प्रोक्ता वास्तुकर्मणि।

ता एव तेषां शस्यन्ते देवतायतनेष्वपि।।९।।

ब्राह्मणादीनां ब्राह्मणक्षत्रियवैश्यशुद्राणां या भूमयो वास्तुकर्मणि प्रोक्ताः कथिताः। तद्यथा- इत्यादिनाः ज्ञेयाः। विप्रादीनां ता एव भूमयो देवताप्रासादेषु शस्यन्ते शोभन्त इति।

अधुना देवतागृहे वास्तुपुरुषलक्षणं द्वारप्रविभागं चाह-

चतुःषष्टिपदं कार्यं देवतायतनं सदा।

द्वारं च मध्यमं तस्मिन् समदिक्स्थं ग्रशस्यते।।१०।।

सदा सर्वकालं देवतायतनं सुरगृहं चतुः षष्टिपदं कार्यम्। अष्टाष्टकपदमथवा इति पूर्वमेव प्रदर्शितम्। तस्मिन् देवतायतने मध्यमं द्वारं मध्यवर्तिनं समदिक्स्थं समायां दिशि यथा तिष्ठति तथा प्रशस्यत इष्यते।।

प्रासादानां विधानमाह-

विस्तारार्धं भवेदर्भो भित्तयोऽन्याः समन्ततः।

गर्भपादेन विस्तीर्णं द्वारं द्विगुणमुच्छ्रितम्।।११, १२।।

त्रिपञ्चसप्तनवभिः शाखाभिस्तत्प्रशस्यते।

अधः शाखाचतुर्भागे प्रतीहारो निवेशयेत्।।१३, १४।।

द्वारमानाष्टभागोना प्रतिमा स्यात् सपिण्डिका।

द्वौ भागौ प्रतिमा तत्र तृतीयांशश्च पिण्डिका।।१५, १६।।

यो विस्तार इति। तस्य देवगृहस्य यो विस्तारो विष्कम्भो भवेत् स्यात् तद्द्विगुणा विस्ताराद् द्विगुणा समुन्नतिरुच्छ्रायो भवति। यथा मेरुप्रासादस्य द्वात्रिंशद्विस्तारः। विस्ताराद् द्विगुणा समुन्नतिश्चतुः षष्टिर्हस्ताःउच्छ्रायाद् यस्तृतीयांशस्तृतीयभागस्तेन च तुल्या तत्समा देगृहस्य कटिः स्मृतोक्ता। यथा मेरोश्चतुः षष्टिर्हस्ता उच्छ्रायः। तस्मात् त्रिभाग एकविशंतिर्हस्ता अष्टावङ्गुलानि। अनेन प्रमाणे कटिर्भवति। सोपानोपरि यतो देवगृहस्य प्रारम्भः सा कटिः रुच्यते।[1]

---

१. भारतीय वास्तुकला का इतिहास, पृ-३

विस्तारार्धमिति। देवगृहस्य यो विस्तार उक्तस्तदर्ध गर्भो भवति। यथो मेरोर्हस्ताद् द्वात्रिंशद्विस्तारः। तदर्धं षोडश। अनेन प्रमाणेन मेरोर्गर्भः। अन्याः समन्ततः सर्वासु दिक्षु विदक्षु भित्तयो भवन्ति। हस्तमात्रं भ्रमणाय सर्वासु विक्ष्वनावृतं स्थापयित्वा शेषं हस्तत्रयं भित्त्यवष्टब्धं कुर्यात्। गर्भस्य यः पादश्चतुर्थाशस्तेन मानेन विस्तीर्णं द्वारं भवति। यथा मेरोर्गर्भः षोडशहस्ताः। तस्य चतुर्भागश्चत्वारो हस्ताः। एष द्वारस्य विस्तारः। विस्ताराद् द्विगुणमुच्छ्रितं कार्यम्। एवमष्टौ हस्ता मेरुद्वारोच्छ्रायः कार्यः।

उच्छ्रायादिति। द्वारस्य य उच्छ्रायस्तस्य यः पादश्चतुर्भागस्तेन मानेन विस्तीर्णा शाखा द्वारिका कार्या। यथा मेरुद्वारस्योच्छ्रायोऽष्टौ हस्ताः। अस्य चतुर्भागो द्वौ हस्तौ। एष शाखाया विस्तारः। तद्वदुदुम्बरस्तद्वत् तेनैव प्रकारेणोदुम्बरः कार्यः। शाखयोरुपरि यत् काष्ठं दीयते यच्चाभः स उदुम्बर इत्युच्यते। तद्वदुदुम्बराविति केचित् पठन्ति। विस्तारपादप्रतिममिति। शाखाया यो विस्तारस्तस्य यः पादश्चतुर्भागस्तत्प्रतिभं तत्तुल्यं शाखायोर्बाहुल्यं घनत्वं स्मृतमुक्तम्। यथा मेरुद्वारशाखाविस्तारो द्वौ हस्तौ। विस्तारपादो द्वादशाङ्गुलानि। एतद् घनत्वम्।

त्रिपञ्चसप्तनवभिरिति। तद्द्वारं तिसृभिः पञ्चभिर्नवभिश्च शाखाभिर्द्वारिकाभिः प्रशस्यते इष्यते। शाखाविस्तारस्तिसृभिर्यदि न पूर्यते, तदा पञ्चभिः , पूरणीयः , ताभिरपि न पूर्यते, तदा नवभिः पूरणीय इति। शाखयोर्योऽधस्तलस्य चतुर्भागस्तुर्याशस्तस्मिन् प्रतीहारौ नन्दिदण्डादिकौ निवेशयेत् कारयेत्।

शेषमिति। शेषं भात्रगयं मङ्गल्यविहगैर्मङ्गल्यवद्भिः पक्षिभिः हंसकारण्डवचक्रवाकजीवक-प्रभृतिभिः। श्रीवृक्षैः स्वस्तिकश्चिह्नविशेषैः। स्वस्तिकस्य वास्तुनरस्य सदृशैर्घटैः कलशैः। मिथुनैर्युग्मैः। पत्रवल्लीभिः पत्रलताभिः। प्रमथैर्गणैश्चोपशोभयेत् शोभामुत्पादयेत्।

तेषां कार्ली, कन्हैरी, भज, कान्दन, वेदसा, नासिक, पीतलखोडा तथा अजन्तायाः गुहाः प्रमुखं प्रसिद्धं वर्तते।[1]

द्वारमानाष्टभागोनेति। द्वारस्य यन्मानं प्रमाणमुच्छ्रायस्तस्य योऽष्टभागोऽष्टांशस्तेन द्वारप्रमाणादूनां प्रतिमार्चा सपिण्डिका पीठसहिता कार्या। तत्र च द्वौ भागौ प्रतिमा कार्या तृतीयांश-स्तृतीयो भागः पिण्डिका पीठिका कार्येति। यथा मेरुप्रासादस्य द्वारोच्छ्रायोऽष्टौं

१. मध्यकालीन भारतीय कलाएँ एवं उनका विकास, पृ-३२

हस्ताः। अस्याष्टभाग एको हस्तः। अनेनोनं द्वारमानं सप्त हस्ताः। एवत् सपिण्डिकं कार्यमिति। अस्माद्भागद्वयं चत्वारो हस्ताः षोडशाङ्गुलानि। एतत् प्रतिमायाः प्रमाणम्। तृतीयो भागो हस्तद्वयमष्टावङ्गुलानि। एतत् पिण्डिकायाः प्रमाणमिति। एवं सर्वप्रासादेषूह्यम्। तथा च काश्यपः-

अधुना प्रासादानां नामान्याह-

मेरुमन्दरकैलासविमानच्छन्दनन्दनाः।

समुन्दपद्मगरुडनन्दिवर्धनकुञ्जराः।।१७।।

इत्येते विशतिः प्रोक्ताः प्रासादाः सञ्ज्ञया मया।

यथोक्तानुक्रमेणैव लक्षणानि वदाम्यतः।।१८, १९।।

मेर्वाधा पथापाठक्रमेण विंशतिः संज्ञाः प्रासादानाम्। मेरुः, मन्दरः, कैलासः, विमानच्छन्दः, नन्दनः, समुद्रः, पद्मः, गरुडः, नन्दिवर्धनः, कुञ्जरः, गुहराजः, वृषः, हंसः, सर्वतोभद्रकः, घटः, सिंहः, वृत्तः, चतुष्कोणः, षोडशाश्रिः, अष्टाश्रिः, इत्येवंप्रकारा एते विंशतिः प्रासादा मया संज्ञया प्रोक्ताः कथिताः। अतोऽस्मादनन्तरं यथानुक्रमेण। येनैवानुक्रमेणोक्ताः कथितास्तेनैवानुक्रमेण लक्षणानि वदामि कथयामि।।

शनैः शनैः शिखर पल्लवितमभवत् एतादृशा दशम शताब्दी पर्यन्तं हिन्दुमन्दिरमेकस्य भव्यप्रासादस्य स्वरूपं प्राप्तं जातम्।[1] तेषां तोरणं, प्रासादिका च क्षितिजाकारः क्रमशः छाद्यप्रमाणं न्यनं जातमिति उल्लेखनीयमसति।[2] हडप्पा सभ्यतायाम् इष्टिकायाः प्रयोगस्य प्रमाणं प्राप्यते।[3]

अस्मिन् काले महत् भव्य स्तूपनिर्माणमपि कृतम्। तेषां साँची, भारहूत, अमरावती तथा सारनाथस्य स्तूपः च सन्ति। मौर्यसम्राटअशोकः सम्पूर्णे देशे बौद्ध स्तूपस्य निर्माणं कृतवान्। तत्पश्चात् स्तूपनिर्माणस्य परम्परायाः विकासः जातः।[4]

---

१. मध्यकालीन भारतीय कलाएँ एवं उनका विकास, पृ-३२

२. मध्यकालीन भाारतीय कलाएँ एव उनका विकास, पृ-३२

३. (अ) भारतीय कला, पृ-२१,

(ख) प्राचीन भारत का इतिहास (डॉ. रमाशङ्कर त्रिपाठी), पृ-१४-१५

(ग) भारत का प्राचीन इतिहास (प्रो. सत्यकेतु) , पृ-७२-७३

४. भारतीय वास्तुकला का इतिहास, पृ-३

तत्रादावेव मेरुप्रासादस्य लक्षणमाह-

तत्रषडश्रिर्मेरुर्द्वादशभौमो विचित्रकुहरश्च।

द्वारैर्युतश्चतुर्भिर्द्वात्रिशद्धस्तविस्तीर्णः।।२०।।

तत्र तस्मिन् प्रासादलक्षणे मेरुर्नाम प्रासादः। षडश्रिः षड् अश्रयः कोणा यस्य। द्वादशभौमः , उपर्युपरि तस्य द्वादश भूमिका भवन्तीत्यर्थः। विचित्रकुहरः विचित्रा नानाप्रकाराः कुहरा अभ्यन्तरग-वाक्षास्तत्र भवन्ति। चतुर्भिर्द्वारैर्युतः चतुसृषु दिक्षु तस्मिन् द्वाराणि भवन्ति। द्वात्रिंशद्धस्तविस्तीर्णः, विष्कम्भाद् अर्थादेव चतुःषष्टिर्हस्तास्तस्यौच्च्यम्। तथा च काश्यपः- **बृ.सं., पृ-१२७**

मन्दरकैलासयोर्लक्षणमाह-

त्रिंशद्धस्तायामो दशभौमो मन्दरः शिखरयुक्तः।

कैलासोऽपि शिखरवानष्टाविंशोऽष्टभौमश्च।।२१।।

तत्र षडश्रिरित्यतत् सर्वत्रानुवर्तते नन्दनलक्षणं यावत्। मन्दरसंज्ञः प्रासादीस्त्रिंशद्ध-स्तायामस्त्रिंशत् करा विस्तीर्णः। विष्कम्भात् षष्टिर्हस्तास्तस्यौच्चम्। षडश्रिश्च। दशभौमो दशभिर्भूमिका-भिर्युक्तः शिखरैर्युक्तः। तथा च काश्यपः-

कैलासोऽपीति। अपिशबदः सम्भावनायाम्। कैलासोऽपि षडश्रिः। शिखरवान् शिखरैर्युक्तः। अष्टाविंशः अष्टाविंशतिर्हस्ता विस्तीर्णः। विष्कम्भात् षट्पञ्चाशद्धस्ता-स्तस्यौच्च्यम्। अष्टभौमोऽष्ट-भिर्भूमिकाभिर्युक्तः। तथा च काश्यपः- **बृ.सं., पृ-१२८**

विमाननन्दनयोर्लक्षणमाह-

जालगवाक्षकयुक्तो विमानसञ्ज्ञस्त्रिप्तकायामः।

नन्दन इति षड्भौमो द्वात्रिंशः षोऽशाण्डयुतः।।२२।।

विमानच्छन्दसंज्ञः षडश्रिः। जालगवाक्षकयुक्तः जालकोपलक्षितैर्गवाक्षकैश्च शारिकाभिर्युक्तः। त्रिसप्तकायामः एकविंशतिर्हस्तो आयामो विस्तीर्णः। विष्कम्भात् अर्थादेव द्वारचत्वारिंशद्धस्त-स्तस्यौच्चयम्। अष्टभूमिकश्च। तथा च काश्यपः- **बृ.सं., पृ-१२८**

नन्दन इति। नन्दनसंज्ञः षडश्रिः। षड्भौमः षड्भिर्भूमिकाभिर्युक्तः। द्वात्रिंशा द्वात्रिशद्धस्तो विस्तीर्णः विष्कम्भात् चतुः षष्टिर्हस्तास्तस्यौच्च्यम्। षोडशभिरण्डैर्युक्तः। अण्डः प्रासादस्योपरि भवति। तथा च काश्यपः- **बृ.सं., पृ-१२८**

समुद्गपद्मयोर्लक्षणमाह-

वृत्तः समुन्दनामा पद्मः पद्माकृतिः शया अष्टौ।

श्रृङ्गेणैकेन भवेदेकैव च भूमिका तस्य।।२३।।

समुद्गनामा वृत्तः परिवर्तुलः मुद्गाकारः। पद्मः पद्माकृतिः कमलाकारः। अष्टभिर्दलैर्युक्तः। एतो द्वावपि प्रासादावष्टौ शयाः अष्टौ हस्ता विस्तीर्णः। विष्कम्भात् षोडशहस्तास्तस्यौच्च्यम्। श्रृङ्गेणैकेन भवेत् स्यात्। एकेन शृङ्गेणैकेनाण्डेनोपलक्षितौ द्वावप्येतौ। तस्य च प्रासादद्वयस्यैकैव भूमिका भवति। तथा च काश्यपः- **बृ.सं., पृ-१२९**

गरुडनन्दिवर्धयोर्लक्षणमाह-

गरुडाकृतिश्च गरुडो नन्दीति च षट्चतुष्कविस्तीर्णः।

कार्यस्तु सप्तभौमो विभूषितोऽण्डैस्तु विशत्या।।२४।।

गरुडसंज्ञो गरुडाकृतिर्गरुाडाकारः पक्षी पक्षपुच्छयुक्तः। नन्दीति च। चशब्दः समुच्चये। नन्दिवर्धनसंज्ञश्च गरुडाकार,एव किन्तु पक्षपुच्छरहितः। षट्चतुष्कविस्तीर्णः गरुडो नन्दिवर्धनश्च षट्चतुष्कश्चतुर्विशतिर्हस्ता विस्तीर्णः। अष्टचत्वारिंशद्धस्तास्तस्यौच्चम्। तथा सप्तभौमः, सप्तभिर्भूमिका-भिर्युक्तः। अण्डानां विंशत्या विभूषितो गरुडो नन्दिवर्धनश्च। तथा च काश्यपः। **बृ.सं., पृ-१२९**

कुञ्जरगुहाराजयोर्लक्षणमाह-

कुञ्जर इति गजपृष्ठः षोडशहस्तः समन्ततो मूलात्।

गुहराजः षोडशकस्त्रिचन्द्रशाला भवेद्वलभी।।२५।।

कुञ्जरसंज्ञो गजपृष्ठो हस्तिपृष्ठाकारः। षोडशहस्तः समन्ततो मूलात् , मूलात् षोडशहस्तः समन्ततश्चतुर्दिक्कं षोडश हस्ता विष्कम्भः अन्येषां पाठः षोडशहस्तः, सुविस्तरो मूलात्। एवं द्वात्रिंशद्धस्तास्तस्यौच्च्यम्। उत्थितगजाकार एकभूमिकः। गुहराजो गुहाकारः। षोडशकः षोडश हस्ता विस्तीर्णो द्वात्रिंशद्धस्तास्तरस्यौच्च्यम्। एकभूमिकश्च। अनयोर्द्वयोरपि वलभी कुहरैस्त्रिचन्द्रशाला भवेत् स्यात्। तिसृभिश्चन्द्रशालाभिर्युक्ता इत्यर्थः। तथा च काश्यपः- **बृ.सं., पृ-१३०**

अधुना वृषहंसघटानां लक्षणमाह-

वृष एकभूमिश्रृङ्गो द्वादशहस्तः समन्ततो वृत्तः।

हंसो हंसाकारो घटोऽष्टहस्तः कलशरूपः।।२६।।

वृषसंज्ञ एकभूमिश्शृङ्गः, एकाया भूमिकयैकेन शृङ्गेण शिखरेण युक्तः। द्वादशहस्तो द्वादश हस्तो विस्तीर्णः। विष्कम्भाच्चतुर्विंशतिर्हस्तास्तस्यौच्च्यम्। समन्ततः सर्वासु दिक्षु वृत्तः परिवर्तुलः। हंसो हंसाकारो हंससदृशः। चञ्चुपक्षपुच्छयुक्तः। द्वादशहस्त-विस्तीर्णः।चतुर्विंशतिर्हस्तास्तस्यौच्चम्। एकभूमिकश्च। घंटसंज्ञः कलशरूपः कलशाकारः। अष्टहस्तो विस्तीर्णः। विष्कम्भात् षोडशहस्तास्तस्यौच्चम्। एकभूमिकश्च सर्व एकशृङ्गाः। तथा च काश्यपः- **बृ.सं., पृ-१३०**

अधुना सर्वतोभद्रस्य लक्षणमाह-

द्वारैर्युतश्चतुर्भिर्बहुशिखरो भवति सर्वतोभद्रः।

बहुरुचिरचन्द्रशालः षड्विंशः पञ्चभौमश्च।।२७।।

सर्वतोभद्रसंथः प्रासादश्चतुर्भिर्द्वारैर्युक्तः। चतसृष्वपि दिक्षु तस्मिन् द्वाराणि भवन्तीत्यर्थः। बहुशिखरो भवति, बहूनि प्रभूतानि तस्मिन् शिखराणि भवन्ति। बाहुरुचिरचन्द्रशालः, बह्वीभिः प्रभूताभी रुचिराभिः सुशोभनाभिश्चन्द्रशालाभिर्युक्तः। षड्विशं : षड्विंशतिर्हस्ता विस्तीर्णः। विष्कम्भाद् अर्थादेव द्वापञ्चाशद्ध-स्तास्तस्यौच्चम्। पञ्चभौमः पञ्चभिर्भूमिकाभिर्युक्तः। चतुरस्त्रः। तथा च काश्यपः। **बृ.सं., पृ-१३१**

सिंहवृत्तचतुष्कोणषोडशाश्र्यष्टाश्रीणां लक्षणमाह-

सिंहः सिंहाक्रान्तो द्वादशकोणोऽष्टहस्तविस्तीर्णः।

चत्वारोऽञ्चनरुपाः पञ्चाण्डयुतस्तु चतुरस्त्र :।।२८।।

सिंहः सिंहाक्रान्तः सिहांलङ्कृतः। द्वादशकोणो द्वादशाश्रिः। अष्टहस्तो विस्तीर्णः। अन्ये चत्वारः सर्व एव वृत्तचतुष्कोणषोडशाष्टाश्रयः संज्ञासदृशाकृतयः। वृत्तः परिवर्तुलः। चतुष्कोणश्चतुरस्त्रः। षोडशाश्रिः षोडशकोणः। अष्टाश्रिरष्टकोणः। एते अञ्जनरूपा अव्यक्तरूपाः सान्धकारा इत्यर्थः। बाह्यप्रकाश्यं तेषु न प्रविशत्ययमर्थः। देवप्रासादस्य सन्निकृष्टाश्चतसृष्वपि दिक्षृ भित्तीः कृत्वा प्रासादस्य पश्चिमभागे द्वारं कार्यम्। ताश्च भित्तय ऊर्ध्वभागे तथा छेदनीया यथा प्रासादोत्पन्ना एव लक्ष्यन्ते , न पृथक्स्थाः। तत्र बहिर्द्वारात् प्रविश्य प्रासादस्य वामभागेनागत्य पुरतः प्रासादस्य द्वारं कार्यम्। तत्र मणिमयी प्रतिमा तत्कान्त्या यत्र प्राकाश्य मृत्पद्यते। एते सर्व एवैकभूमिकाः कार्या एकाण्डाश्च। चतुरस्त्रः पुनः पञ्चाण्डयुतः कार्यः। पञ्चभिरण्डैः संयुक्तः। तथा च काश्यपः- **बृ.सं., पृ-१३१**

मयविश्वकर्मणोर्मतेन भूमिकाप्रमाणमाह-

भूमिकाङ्गुलमानेन मयस्याष्टोत्तरं शतम्।

सार्द्ध हस्तयंत्र चैव कथितं विश्वकर्मणा।।२९।।

मयस्य मतेनाष्टोत्तरशतमङ्गुलानां मानेन भूमिका भवति। तथा च मयः

विश्वकर्मणा सार्धं हस्तत्रयं भूमिकानां कथितमुक्तम्। चतुरशीत्यङ्गुलानीत्यर्थः। तथा च विश्वकर्मा- **बृ.सं., पृ-१३२**

अत्रापि परमतेनैकवाक्यतां दर्शयितुमाह-

प्राहुः स्थपतयश्चात्र मतमेकं विपश्चितः।

कपोतपालिसंयुक्ता न्यूना गच्छन्ति तुल्यताम्।।३०।।

अत्रास्मिन्नर्थे विपश्चितः पण्डिताः स्थपतयो वार्धकिनः प्रतिष्ठातन्त्रज्ञा मयविश्वकर्मणोरेकमतं प्राहुरुक्तवन्तः। विश्वकर्मणो मतेन या न्यूनाः प्रमाणहीना भूमयस्ताः कपोतपालिसंयुक्ता मयमतेन तुल्यतां गच्छन्ति समत्वं यान्ति। कपोतपालिग्रहणे बहिर्निर्गतानि सिंहमुखानि काष्ठान्युच्यन्ते। तथा चोक्तम्-

अथोपसंहारार्थमाह-

प्रासादलक्षणमिदं कथितं समासा न्दर्गेण यद्विरचितं तदिहास्ति सर्वम्।

मन्वादिभिर्विरचितानि पृथूनि यानि तत्संस्पृशनं प्रति मयात्र कृतोऽधिकारः।।३१।।

इदं मया प्रासादलक्षणं समासात् संक्षेपात् कथितमुक्तम्।गर्गेण मुनिना विरचितं कृतं तत्सर्वं निरवशेषमिहास्मिन्नस्ति विद्यते। यानि च पृथूनि विस्तीर्णानि मन्वादिभिर्मनुवस्ष्ठिमयनग्नजिद्भिर्विरचितानि कृतानि प्रासादलक्षणानि तानि प्रति मया द्वारमायानाष्टभागोनेत्यादिलक्षणलक्षितानि संस्पृशन्नताधिकारः कृतः। प्रासादलक्षणं कृतमित्यर्थः। अथवा तत्संस्पृशंस्तानि सर्वाणि लक्षणानि प्रतिसंस्पृशन् परामृशनं मयाधिकारः कृत इति।।

ऋग्वेदे "सुरणं गृहे ते"[1] अथर्ववेद वरुणगृहः[2] दाशुपो गृहे[3] ि

१. ऋग्वेद , ३.५३.६

२. अथर्ववेद, ७.८.३.१

३. ऋग्वेद , ४.४९.६,८.१०.१ आदि

वास्तोष्पते प्रति जानीह्यस्मान्स्व वेशो अनमीवो भवा नः।

यत् त्वमेहे प्रति तनो जुषस्व शं नो भव द्विपदे शं चतुष्पदे।।

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरन्दो।

अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व।।

वास्तोष्पते शग्मयां संसदा ते सक्षीमहि रण्वया गातुमत्या।

पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः।।[१]

अमीवहा वास्तोष्पते विस्वा रूपाण्यविशन्।

सखा सुशेव एधि नः।।[२]

अथर्ववेदे द्वौ शालासूक्ते स्तः। (वेदेषु शाला शब्दस्यार्थः गृहम् इति। तथा समराङ्गणसूत्रधारग्रन्थे 'गृहमेकं तु यच्छत्रं सर्वं शालेति सा स्मृता।[३]

तां व वास्तुन्यश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः।[४]

वास्तोष्पतिशब्दस्य शाब्दिकार्थः वास्तुनः (गृह)पतिः (स्वामी) इति। कोशग्रन्थेषु एतस्यार्थः इन्द्र इति दर्शितमस्ति।[५]

महर्षि दयानन्दः अस्य शब्दस्यार्थः गृहे निवसन् प्रमुखव्यवनः वा गृहरक्षकः इति करोति।[६]

अथ भूमिप्रदेशज्ञाः सूत्रकर्म विशारदाः।

स्वकर्मभिरताः शराः खनका यन्त्रकास्तदाः।

तथा वर्धकयश्चैव मार्गिणो वृक्षतक्षकाः।।[७]

सागर प्रतिरुपाभिः परिखाभिरलङ्कृताम्।[८]

---

१. ऋग्वेद, ७.५४.१.-३

२. ऋग्वेद ,७.५५.१

३. समराङ्गणसूत्रधारः, २२.१९

४. ऋग्वेद, १.१५४.६

५. (क) पद्मचन्द्रकोशः, पृ.३४८

(क) शब्दार्थभानु, पृ.२८७

(ग) शब्दस्तोममहानिधि, पृ.१०२३

(घ) हिन्दीशब्दसागर, खण्ड-९.पृ,४४४०

६. ऋग्वेद , १०.५४.१-३ तथा १०.५५.१, हिन्दी भाष्य पृ.१०९, ११ द्रष्टव्य

७. वाल्मीकिरामायण, अयोध्याकाण्ड , सर्ग-८०.१-२

८. महाभारत, आदिपर्व, अ.१९९२९

महाभारतेऽपि वास्तुविद्यायाः प्रकर्षः रामायणकालात् अधिकः आसीत्।[1]

ग्रन्थेऽपि षड् प्रकाराणां दुर्गाणामुल्लेखः प्राप्यते।[2]

महाभारते इन्द्रप्रस्थनगरस्य सम्बन्धितविवरणं नगरनिर्माणयोजनायाः उत्तममुदाहरणं प्राप्यते।[3]

उपमितां प्रतिमितामथो परिमितामुत।

शालाया विश्ववाराया नद्धानि वि चृतामसि।।[4]

इहैव ध्रुवां नि मिनोमि क्षेमे तिष्ठाति घृतमृक्षमाणा।

तां त्वा शाले सर्ववीराः सुवीरा अरिष्ट उप सं चरेम।।[5]

शतपथब्राह्मणं प्राचीनवंशः हविर्धानमेतद्वै देवानां निष्केवत्यं यत् हविधांना उदीची वै मनुष्याणां दिक् .....।[6]

---

१. भारतीय वास्तुकला का इतिहास, पृ-४८-४९
२. महाभारत, शान्तिपर्व, अ.८७.५
३. महाभारत, आदिपर्व, अ.१९९
४. अथर्व. ९.३.१
५. अथर्व, ३-१२-१
६. वैदिक स्स्कृति , भाग-१, पृ.१०५ एवं १६५

३. वज्रलेपलक्षणाध्यायः

वज्रलेपलक्षणं व्याख्यायते। तत्रादावेव वज्रलेपमाह-

आमं तिन्दुकमामं कपित्थकं पुष्पमपि च शाल्मल्याः।
बीजानि शल्लकीनां धन्वनवल्को वचा चेति।।१।।

एतैः सलिलद्रोणः क्वाथयितव्योऽष्टभागशेषश्च।
अवातार्योऽस्य च कल्को द्रव्यैरेतैः समनुयोज्यः।।२।।

श्रीवासकरसगुग्गुलुभल्लातककुन्दुरूकसर्जरसैः।
अतसीबिल्वैश्च युतः कल्कोऽथ वज्रलेपाख्यः।।३।।

तिन्दुकं तिन्दुकफलम्। आममपक्वम्। कपित्थकं कपित्थकफलमाममेव। शाल्मल्याः शाल्मलि-वृक्षस्य च पुष्पम्। शल्लकीनां शल्लकीवृक्षाणां बीजानि। धन्वनवल्को धन्वनवृक्षस्य वल्कस्त्वक्। वचा च। इत्येवंप्रकारः।

एतैर्द्रव्यैः सह सलिलद्रोणः क्वाथयितव्यः। द्रोणः पलशतद्वयं षट्पञ्चाशदधिकम्। यावदष्ट-भागावशेषो भवति द्वात्रिंशत् पलानि अवशिष्यन्त इत्यर्थः। ततोऽष्टभागावशेषोऽ-वतार्योऽवतारणीयो ग्राह्य इत्यर्थः। अस्य चाष्टभागशेषस्यैतद्द्रव्यैर्वक्ष्यमाणैः कल्कश्चूर्णः समनुयोज्यो विदातव्यः। तच्चूर्णसंयुक्तः कार्य इत्यर्थः।

कैरत्याहि- श्रीवासकेति। श्रीवासकः प्रसिद्धो वृक्षनिर्यासः। रसो बोलः। गुग्गुलुः प्रसिद्धः। भल्लातकः प्रसिद्ध एव। कुन्दुरूको देवदारुवृक्षनिर्यासः। सर्जरसः सर्जरसकवृक्षनिर्यासः। एतैः तथा अतसी प्रसिद्धा, बिल्वं श्रीफलम् - एतैश्च युतः समवेतः। अयं कल्को वज्रलेपाख्यः। वज्रलेपेत्याख्या नाम यस्य।।

अथास्या गुणानाह-

प्रासादहर्म्यवलभीलिङ्गप्रतिमासु कुडयकूपेषु।
सन्तप्तो दातव्यो वर्षसहस्त्रायुतस्थायी।।४।।

प्रासादो देवप्रासादः। हर्म्यम्, वलभी वातायनम्, लिङ्गं शिवलिङ्गम्, प्रतिमार्चा। एतासु तथा कुडयेषु भित्तिषु। कूपेषूदकोद्वारेषु। सन्तप्तोऽत्युष्णो दातव्यो देयः। वर्षसहस्त्रायुतस्थायी भवति, वर्षाणां सहस्त्रायुतं वर्षकोटि तिष्ठतीत्यर्थः।।

अथान्यद्वज्रलेपमाह-

लाक्षाकुन्दुरुगुग्गुलुगृहधूमकपित्थबिल्वमध्यानि।

नागफलनिम्बतिन्दुकमदनफलमधूकमञ्जिष्ठाः।।५।।

सर्जरसरसामलकानि चेति कल्कः कृतो द्वितीयोऽयम्।

वज्राख्यःप्रथमगुणैरयमापि तेष्वेव कार्येषु।।६।।

लाक्षा प्रसिद्धो वृक्षनिर्यासः। कुन्दुरुर्देवदारुवृक्षनिर्यासः। गुग्गुलुः प्रसिद्धः। गृहधूमोंऽगारधूमः श्यामेति प्रसिद्धः। कपित्थः कपित्थवृक्षफलम्। बिल्वमध्यम् एतानि तथा नागफलम्। निम्बः प्रसिद्धः। तिन्दुकं तिन्दुकफलम्। केचिन्नागबलाफलतिन्दुकमदनफलेति पठन्ति। नागबलाफलं तिन्दुकफलं मदनफलं मधूकफलं मञ्चिष्ठा प्रसिद्धा।

सर्जरसः सर्जवृक्षनिर्यासः , रसो बोलः, आमलकं धात्रीफलम् - एतानि च। इत्येवं प्रकारो द्वितीयः कल्कः कृतो वज्राख्यो वज्रलेपसंज्ञः। प्रथमगुणैः पूर्वोक्तैर्गुणैरेतैः सलिलद्रोणः क्वाथयितव्योऽष्ट-भागशेषश्चेति, तथा सन्तप्यो दातव्य इति। अयमपि वज्रलेपस्तेष्वेष प्रागुक्तेषु कार्येषु प्रासादादिषु। स च वर्षसहस्त्रायुतं स्थायी भवति।।

अन्यदप्याह-

गोमहिषाजविषाणैः खररोम्णा महिषचर्मगव्यैश्च।

निम्बकपित्थरसैः सह वज्रतलो नाम कल्कोऽनयः।।७।।

गोमहिषौ प्रसिद्धौ अजश्छागः एषां सर्वेषां विषाणानि श्रृङ्गाणि तैः, तथा खररोम्णा गर्दभरोमभिः। महिषचर्मणा गव्यैश्च निम्बकपित्थरसैः सह निम्बः कपित्थफलम्। रसो बोलः।एतैः सहान्यः कल्कः प्राग्वत् कृतः। एतैः सलिलद्रोणः क्वाथयितव्योऽष्टभाग- शेषश्चेत्यादि। वज्रतलो नाम अयमपि प्रथमगुणैस्तैष्वेव कार्येष्विति।।

अन्यदप्याह-

अष्टौ सीसकभागाः कांसस्य द्वौ तु रीतिकाभागः।

मयकथितो योगोऽयं विज्ञेयो वज्रसङ्घातः।।८।।

अष्टौ भागाः सीसकस्यः।कांसस्य द्वौ भागौ। रीतिकाभाग एकः। अयं योगो वज्रसङ्घातो नाम। मयकथितो मयेनोक्तो विज्ञेयो ज्ञातव्यः। अयमपि प्रथमगुणैस्तेष्वेव कार्येष्विति। अत्र प्रमाणानुसारेण नामपरिकल्पनोक्ता। अन्ये सममात्राः कार्या इत्यागमः। तथा च मयः-

४. प्रतिमालक्षणाध्यायः

तत्रादावेव परमाणुप्रमाणार्थमाह–

जालान्तरो भानौ यदणुतरं दर्शनं रजो याति।

तद्विन्द्यात् परमाणुं दर्शनं रजो याति।।१।।

भानावादित्ये जालान्तरगे गवाक्षस्यलकमध्यवर्तिनि यद्रजो धूलितोऽणुतंर सूक्ष्मतरं दर्शनं याति दृष्टिपथमायाति तत् परमाणुं नाम प्रमाणं विन्द्याज्जानीयात्। हिर्यस्मादर्थे। प्रमाणानां सर्वेषां तत्प्रथममाद्यं प्रमाणं परमाणुंसंज्ञम्।।

परमाणौ ज्ञातेऽङ्गुलप्रमाणज्ञानमाह–

परमाणुरजो बालाग्रलिक्षयूकं यवोऽङ्गुलं चेति।

अष्टगुणानि यथोत्तरमङ्गुलमेकं भवति संख्या।।२।।

एतानि परमाण्वादीनि यथोत्तरमष्टगुणान्यङ्गुलमेकं भवति। तद्यथा– अष्टभिः परमाणुभी रजो भवति। अष्टमी रजोभिर्बालाग्रम, अष्टाभिर्बालाग्रैर्लिक्षा, अष्टभिर्लिक्षाभिर्युका, अष्टभिर्यूकाभिर्यवः, अष्टभिर्यवैरङ्गुलम्। एवं यथोत्तरं परमाण्वादीन्यष्टगुणान्यङ्गलं संख्या भवति। तथा च–

समस्तायाः प्रतिमायाः प्रमाणमाह–

देवागारद्वारस्याष्टांशोनस्य यस्तृतीयोंडशः।

तत्पिण्डिकाप्रमाणं प्रतिमा तद्द्विगुणपरिमाणा।।३।।

देवागारे देवगृहे यद्द्वारं तस्य य उच्छ्रायस्तस्य योऽष्टांशोऽष्टभागस्तेन हीनस्य यः तृतीयोंऽश–स्तृतीयभागः, तत्पिण्डिकाप्रमाणं पीठिकापरिमाणम्, तद्द्विगुणपरिमाणा पीठिकाद् द्विगुणप्रमाणा प्रतिमा च भवति।।

त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दध।[1]

ब्रह्मणस्पतिरेता सं कर्मरईवाधमत्।[2]

हिरण्यं च मेऽयश्च मे श्यामं च मे लोहं च में सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम्।। (यजुर्वेद, १८.१३) **कर्मरेभ्यश्च वो नमो।** (यजुर्वेद, १६.२७), ...

१. ऋग्वेदः ९.११२.२

२. ऋग्वेदः, १०.७२.२

रथाय नावमुत नो गृहाय नित्यारित्रां पद्धतीं रास्यग्ने।

अस्माकं वीरॉं उत नो मघोनों जर्नांश्च या पारयाच्छर्म या च।।[1]

वासोवायोऽवीनामा वासांसि ममृजत्।[2]

प्रतिमाया अवयवप्रमाणमाह-

स्वैरङ्गुलप्रमाणैर्द्वादश विस्तीर्णमायतं च मुखम्।

नग्नजिता तु चतुर्दश दैर्ध्येण द्राविडं कथितम्।।४।।

यस्मात् काष्ठात् पााषाणादिकाद्वा प्रतिमा क्रियते तद्दैर्ध्यं पीठप्रमाणविवर्जितं द्वादशभागविभक्तं कृत्वा तत्रैको भागो नवधा कार्यः, सोऽङ्गुलसंज्ञा भवति। यस्मादष्टाधिकमङ्गुलशतं प्रतिमाप्रमाण वक्ष्यति- स्वैरङ्गुलप्रमाणैरिति। प्रतिमायाः स्वैरात्मीयैरङ्गुलप्रमाणैर्मुखं वदनं द्वादशाङ्गुलानि विस्तीर्णं विपुलमायतं च दीर्धं कार्यम्। नग्नजिता मुनिना द्वादशाङ्गुलानि विस्तीर्णं मुखं कथितं दैर्ध्येण च चतुर्दशाङ्गुलानि। एतद् द्राविडं द्रविडदेशजं मानम्। तथा च नग्नजित-

अन्यदप्याह-

नासाललाटचिबुकग्रीवाश्चतुराङ्गुलास्तथा कर्णौ।

द्वे अङ्गुले च हनुनी चिबुकं च द्वयङ्गुलं विततम्।।५।।

नासा चतुरङ्गुला दैर्ध्येण कार्या। ललाटं मुखपृष्ठं चतुरङ्गुलमेव। चिबकुं चतुरङ्गुलमेव। चिबुकग्रहणेन नासायाश्चतुरङ्गुलो भाग उच्यते। ग्रीवा चतुरङ्गुला दीर्धा, तथा कर्णौ श्रोत्रौ चतुरङ्गुलौ दीर्घौ। हनुनी द्वे द्वे अङ्गुले च विस्तृते। मुखगलसन्धी हनुनी, चिबुकं च द्वयङ्गुलं विततं विस्तीर्णं कार्यम्। चिबुकशब्देनात्र मुखस्याधोभाग उच्यते।।५।।

अन्यदप्याह-

अष्टाङ्गुलं ललाटं विस्ताराद् द्वयङ्गुलात् परे शङ्खौ।

चतुरङ्गुलौ तु शङ्खौ कर्णौ तु द्वयङ्गुलौ पृथुलौ।।६।।

---

१. ऋग्वेदः, १.१४०.१२

२. ऋग्वेदः, १०.२६.३

ललाटं विस्तारादष्टाङ्गुलं कार्यम्, तस्मात् परे भागे उभयतो द्व्यङ्गुलप्रमाणौ शङ्खौ कार्यौ, ललाटात् परतः कार्यावित्यर्थः। शङ्खौ चतुरङ्गुलावधोभागौ दीर्धौ कार्यौ, यतः शङ्खाधो गण्डभाग उच्यते। कर्णौ तु द्वयङ्गुलौ पृथुलौ विस्तीर्णौ कार्यौ।।६।।

अन्यदप्याह-

कर्णोपान्तः कार्योऽर्धपञ्चमे भ्रूसमेन सूत्रेण।

कर्णस्त्रोतः सुकुमारकं च नेत्रप्रबन्धसमम्।।७।।

अर्द्धपञ्चमे अर्धपञ्चममङ्गुलं यस्मिन् भागे। सार्धानि चत्वार्यङ्गुलानि नेत्रान्तादारभ्य तस्मिन् भ्रूसमेन सूत्रेण नेत्रमध्यगेन कर्णोपान्तः कार्यः। कर्णस्योपान्तः समीपः, कर्णाग्रमित्यर्थः। कर्णस्त्रोतः कर्णच्छिद्रं सुकुमारकं चकर्णस्त्रोतः समीपे उन्नतो मार्गस्तन्नेप्रबन्धसमम्। नेत्रप्रबन्धशब्देन प्रदूषिकोच्यते। तत्समं तत्तुल्यं कार्यम्। अङ्गुलप्रमाणमित्यर्थः।।७।।

पूर्मा एनं तनुत उत्कृणोति पुमान्वित तत्ने अधि नाके अस्मिन्।[1]

उर्णावती युवतिः सलमावती......।[2]

अन्यदप्याह-

चतुरङ्गुलं वसिष्ठः कथयति नेत्रान्तकर्णयोर्विवरम्।

अधरोऽङ्गुलप्रमाणस्तस्यार्धेनोत्तरोष्ठश्च।।८।।

अधरोष्ठोऽङ्गुलप्रमाणेन विस्तीर्णः कार्यः, उत्तरोष्ठश्च तस्यार्धेनाधरोष्ठस्यार्धेनार्धाङ्गुलविस्तीर्णः कार्यः।।

अन्यदप्याह-

अर्धाङ्गुला तु गोच्छा वक्त्रं चतुरङ्गुलायतं कार्यम्।

विपुलं तु सार्धमङ्गुलमव्यात्तं त्र्यङ्गुलं व्यात्तम्।।९।।

गोच्छा अर्धाङ्गुलविस्तीर्ण कार्या। वक्त्रं चतुरङ्गुलायतं कार्यम्। तथा सार्धमङ्गुलं विपुलं विस्तीर्णं कार्यम् यदव्यात्तमविकसितम्, व्यात्तं विकसितं मर्त्यसिंहादेस्त्र्यङ्गुलं विस्तीर्णं कार्यम्।।९।।

---

१. ऋग्वेदः, १०.१३०.२

२. ऋग्वेदः, १०.७४.८

अन्यदप्याह-

द्व्यङ्गुलतुल्यौ नासापुटौ च नासा पुटाग्रतो ज्ञेया।

स्याद् द्व्यङ्गुलमुच्छ्रायश्चतुरङ्गुलमन्तरं चाक्ष्णोः।।१०।।

नासापुटौ द्व्यङ्गुलतुल्यौ द्वयङ्गुलप्रमाणौ कार्यौ। तथा नासा पुटाग्रतो द्व्यङ्गुलतुल्यैव ज्ञेया ज्ञातव्या। नासाय द्वयङ्गुलमुच्छ्राय औच्च्यं स्याद्भवेत्। अक्ष्णोर्नेत्रयोर्द्वयोर्मध्यं चतुरङ्गुलप्रमाणं भवति। एतदनुक्तमपि ज्ञायते।।१०।।

अन्यदप्याह-

द्व्यङ्गुलमितोऽक्षिकोशो द्वे नेत्रे तत्त्रिभागिका तारा।

दृक्तारा पञ्चांशो नेत्रविकाशोऽङ्गुलं भवति।।११।।

अक्षिकोशोऽक्षिपुटो द्व्यङ्गुलमितो द्व्यङ्गुलप्रमाणः। द्वे अङ्गुले नेत्रे नयने। तत्त्रिभागिका तारा। अङ्गलद्वयत्रिभागप्रमाणा तारा नेत्रमध्ये कृष्णो भागः। दृक्तारा मध्यवर्तिनी कृमारी अङ्गुलद्वयपञ्चांशः पञ्चांशभागः। नेत्रविकाशो नयनवैपुल्यमङ्गुलं भवति।।

दुर्गद्वारं, जलाशयं, राजप्रासादः, देवप्रासादः, इत्यादयः स्थापत्यस्य सुशोभनम्-अङ्लकृतिः, गवाक्षं, प्रतिमानिर्माणम् इत्यादकं शिल्पविद्या ज्ञायते।[1]

दुर्गः जलाशयः, राजप्रासादः, देवप्रासाद, भवनं, सामान्यगृहम् - इत्यादि निर्माणं स्थापत्यकला ज्ञायते। इदं विशेषरूपेण शिल्प-स्थापत्य- शास्त्रं कथ्यते।[2]

वेदा यो वीनां पदमन्तरिक्षेण पतताम्। वेद नावः समुद्रियः।।[3]

विमुळीकाय ते मनो रथीश्वं न संदितम्।।[4]

अन्यदप्याह-

पर्यन्तात् पर्यन्तं दश भ्रुवोऽर्धाङ्गुलं ध्रुवोर्लेखा।

भ्रूमध्यं द्व्यङ्गुलकं भ्रूर्दैर्ध्येणाङ्गुलचतुष्कम्।।१२।।

१. क्षीरार्णवः, प्रस्तावना-पृ-४
२. क्षीरार्णवः, प्रस्तावना -पृ-४
३. ऋग्वेदः, १.२५.७
४. ऋग्वेदः, १.२५.३

भ्रुवोः पर्यन्तात् पर्यन्तं दशाङ्गुलानि प्रमाणम्। वामभ्रूपर्यन्ताद् दक्षिणभ्रूपर्यन्तं यावद् दशाङ्गुलानि। भ्रूवो लुखा भ्रूलेखा अर्धाङ्गुलं विस्तीर्णा। भ्रूमध्यं भ्रूवोरन्तरं द्व्यङ्गुलकं द्वयङ्गुलप्रमाणविस्तीर्णं कार्यम्। भ्रूदैर्ध्येण भ्रूर्दीर्घत्वेनाङ्गुलचतुष्कं कार्यमिति।।

अन्यत्-

कार्या तु केशरेखा भ्रूबन्धसमाङ्गुलार्धविस्तीर्णा।

नेत्रान्ते करवीरकमुपन्यसेदङ्गुलप्रमितम्।।१३।।

केशरेखा ललाटपरिवृता च भ्रूबन्धसमा भ्रूबन्धतुल्या कार्या दशाङ्गुलप्रमाणा चेत्यर्थः। अङ्गुलार्ध विस्तीर्णा। नेत्रान्ते चक्षुष्पर्यन्ते। करवीरकं दूषिकेति प्रसिद्धम्। तदङ्गुलप्रमितमङ्गुल-प्रमाणमुपन्यसेत् कारयेत्।।

अन्यदप्याह-

द्वात्रिंशत् परिणाहाच्चतुर्दशायामणोऽङ्गुलानि शिरः।

द्वादश तु चित्रकर्मणि दृश्यन्ते विंशतिरदृश्याः।।१४।।

शिरो द्वात्रिंशदङ्गुलानि परिणाहात् कार्यम्। चतुर्दशाङ्गुलान्यायामतो विष्कम्भादित्यर्थः। चित्रकर्मणि द्वादशाङ्गुलानि दृश्यन्ते विंशतिरदृश्या।।

अथान्यत्-

आस्यं सकेशनिचयं षोडश दैर्ध्येण नग्नजित्प्रोक्तम्।

ग्रीवा दश विस्तीर्णा परिणाहाद्विंशतिः सैका।।१५।।

नग्नजित्प्रोक्ते प्रतिमालक्षणे आस्यं मुखं सकेशनिचयं केशरेखया सहितं षोडशाङ्गुलानि। मुखं दीर्धं चतुर्दशाङ्गुलानि विस्तीर्णा कार्या। विंशतिः सैका एकविंशतिः परिणाहात्।।

अन्यदप्याह-

कण्ठाद् द्वादश हृदयं हृदयान्नाभी च तत्प्रमाणेन।

नाभीमध्याद् मेढ्रान्तरं च तत्तुल्यमेवोक्तम्।।१६।।

कण्ठाधोभागादारभ्य हृदयं यावद् द्वादशाङ्गुलानि। हृदयात् प्रभृति नाभीं च यावत्तत्प्रमाणेन द्वादशाङ्गुलान्येव। नाभीमध्याद् मेढ्रोन्तरं लिङ्गमध्यं च यावत् तत्तुल्यं तत्समभेवोक्तं कथितम्। द्वादशाङ्गुला-नीत्यर्थः।।

अथान्यत् –

ऊरू चाङ्गुलमानैश्चतुर्यता विंशतिस्तथा जङ्घे।

जानुकपिच्छें चतुरङ्गुले च पादौ च तत्तुल्यौ।।१७।।

ऊरू दीर्धा चाङ्गुलमानैश्चतुर्युता विंशतिः। तथा जङ्घे चतुर्विंशतिरेव दीर्धा। जानुकपिच्छे चतुरङ्गले च चतुरङ्गलप्रमाणे कार्ये, ये च लोके एक्कलके इति प्रसिद्धे। पादौं च तत्तुल्यौं तत्समौ गुल्फादारभ्याधो-भागश्चतुरङ्गुलः कार्यः।।

अथान्यदप्याह-

द्वादशदीर्धौ षट् पृथुतया च पादौ त्रिकायताङ्गुष्ठौ।

पञ्चाङ्गुलपरिणाहौ प्रदेशिनी त्र्यङ्गुलं दीर्धा।।१८।।

पादौ चरणौ पाष्ण्र्या आरभ्याङ्गुष्ठमूलं यावद् द्वादशाङ्गुलानि दीर्धौ कार्यौ, पृथुतया विस्तारेण षडङ्गुलानि। अङ्गुष्ठौ त्रिकायतो त्रीण्यङ्गुलानि दीर्धौ कार्यौ। पञ्चाङ्गुलपरिणाहौ परिणाहात् पञ्चाङ्गुलानि कार्यौ। प्रदेशिन्यङ्गुष्ठसमीपवर्तिन्यङ्गुली त्रीण्यङ्गुलानि दीर्धा कार्यो।

अन्यदप्याह-

अष्टांशाष्टांशोनाः शेषाङ्गुल्यः क्रमेण कर्तव्याः।

सचतुर्थभागमङ्गुलमुत्सेधोडङ्गुष्ठकस्योक्तः।।१९।।

शेषास्तिस्त्रोऽङ्गुल्यः क्रमेण परिपाट्या अष्टांशेनाष्टांशेन ऊनाः कर्तव्यः, प्रदेशिनीतो मध्यमा अष्टांशोना कार्या। अङ्गुष्ठास्योत्सेध उच्छ्रायः सचतुर्भागमङ्गुलमुक्त कथितः। शेषाङ्गुलीनामष्टांशोनानामङ्गु-ष्ठप्रमाणात् प्रमाणं कार्यम्।।

अन्यदप्याह-

अङ्गुष्ठनख्यः कथितश्चतुर्थभागोनमङ्गुलं तज्ज्ञैः।

शेषनखानामर्धाङ्गुलं क्रमात् किञ्चिदूनं वा।।२०।।

तज्ज्ञैः प्रतिमालक्षणज्ञैरङ्गुष्ठनखश्चतुर्थभागोनमङ्गुलं कथितः। शेषानमङ्गुलीनखा-नामर्धाङ्गुलं प्रमाणम्। अथवा क्रमात् परिपाट्या किञ्चिदूनमर्धाङ्गुलप्रमाणं कार्य यथा शोभा जायत इति।।

शिल्पशास्त्रस्य तथा वास्तुशास्त्रस्य व्यापकतायां भिन्नता अस्ति।[1]

अन्यदप्याह-

जङ्घाग्रे परिणाहश्चतुर्दशोक्तस्तु विस्तरात् पञ्च।

मध्ये तु सप्त विपुला परिणाहात् त्रिगुणिताः सप्त।।२१।।

जङ्घाग्रे जङ्घापर्यन्ते चतुर्दशाङ्गुलानि परिणाह उक्तः कथितः। विस्तरात् पञ्चाङ्गुलानि। जङ्घामध्ये मध्यभागे सप्ताङ्गुलानि विपुला विस्तीर्णा। परिणाहात् सप्त त्रिगुणिताः। एकविंशत्यङ्गुलानीत्यर्थः।

अन्यदप्याह-

अष्टौ तु जानुमध्ये वैपुल्यं त्र्यष्टकं तु परिणाहः।

विपुलौ चतुर्दशोरू मध्ये द्विगुणाश्च तत्परिधिः।।२२।।

जानुमध्ये अष्टावङ्गुलानि वैपुल्यं पृथुत्वम्। त्र्यष्टकं चतुर्विंशत्यङ्गुलानि परिणाहः, ऊरू मध्ये मध्यभागे चतुर्दशाङ्गुलानि विपुलौ विस्तीर्णौ। तत्परिधिस्तत्परिणाहस्तयोः पारिमाण्डल्यं द्विगुणोऽष्टाविंश-त्यङ्गुलानि भवन्ति।।

वास्तुकलायाः इतिहासः अत्यन्तं प्राचीनः अस्ति।कस्याति स्थानं वासयोग्यं निर्मीयते यथा कला वास्तुकला।[2] वास्तुकलायाः इतिहासः अत्यन्तं प्राचीनः अस्ति। सामान्यता निवास्थानमति वास्तुः तथा तत्सम्बन्धिताः कलाः इति वास्तुकलाः।

अन्यदप्याह-

कटिरष्टादश विपुला चत्वारिंशच्चतुर्युता परिधौ।

अङ्गुलमेकं नाभी वेधेन तथा प्रमाणेन।।२३।।

कटिरष्टादशाङ्गुलानि विपुला विस्तीर्णा। परिधौ परिणाहे चत्वारिंशच्चतुर्युता चतुश्चत्वारिशदङ्गुलानि। नाभी वेधेन गाम्भीर्येण तथा प्रमाणेन वैपुल्येन चाङ्गुलमेकं भवति।।

---

१. समराङ्गणसूत्रधार वास्तुशास्त्रम् (भवननिवेश, भाग-१, हिन्दी अनुवादः), पृ.१८

२. हिन्दी विश्वकोश खण्ड-१०, पृ-४४८

अन्यदप्याह-

चत्वारिशंद्द्वियुता नाभीमध्येन मध्यपरिणाहः।

स्तनयोः षोडश चान्तरमूर्ध्वं कक्ष्ये षडङ्गुलिके।।२४।।

नाभीमध्येन मध्यभागे परिणाहश्चत्वारिंशद्द्वियुता द्वाचत्वारिशदङ्गुलानि। स्तनयोर्द्वयारन्तरं मध्यं षोडशाङ्गुलानि। स्तनयोरूर्ध्वं तिर्यक् कृत्वा षडङ्गुलिके षडङ्गुलप्रमाणे कक्ष्ये कार्ये।

अन्यदप्याह-

अष्टावंसौ द्वादश बाहू कार्यौ तथा प्रबाहू च।

बाहू षड्विस्तीर्णे प्रतिबाहू त्वङ्गुलचतुष्कम्।।२५।।

अंसौ स्कन्धौ ग्रीवापार्श्वादंसान्तं यावदष्टाङ्गुलं विस्तीर्णं कार्यम्। अंससमीपवर्तिनो बाहू द्वाद-शाङ्गुलानि दीर्घौ कार्यौ। बाहुसमीपवर्तिनौ प्रतिबाहू तावेव द्वादशाङ्गुलानि दीर्घौ कार्यौ। बाहू षडङ्गुलानि विस्तीर्णौ, प्रतिबाहू त्वङ्गुलचतुष्कं विस्तीर्णौ।।

अन्यदप्याह-

षोडश बाहू मूले परिणाहाद् द्वादशाग्रहस्ते च।

विस्तारेण करतलं षडङ्गुलं सप्त दैर्ध्येण।।२६।।

बाहू मूले षोडशाङ्गुलानि परिणाहात्। अग्रहस्ते च प्रकोष्ठाप्रदेशे द्वादशाङ्गुलानि परिणाहः। करतलं हस्ततलं विस्तारेण षडङ्गुलं कार्यं दैर्ध्येणायामेन सप्ताङ्गुलानि।।

अन्यदप्याह-

पञ्चाङ्गुलानि मध्या प्रदेशिनी मध्यपर्वदलहीना।

अनया तुल्या चानामिका कनिष्ठा तु पर्वोना।।२७।।

अङ्गुष्ठादनन्तरं या अङ्गुली सा मध्यमायाः पर्वदलेन पर्वणोऽर्धेन हीना कार्या। सार्धानि चत्वार्य-ङ्गुलानि पूर्वरेखायाः प्रभृतिद्वितीयां रेखां यावत् पर्वोच्यते। अनया प्रदेशिन्या चानामिका कार्या। तस्या अनामिकायाः पर्वोना कनिष्ठिका कार्या।।

अनेन प्रकारेण वयं सिन्धु - घाटी सम्बन्धित संस्कृति प्रायः ई.पू.३००० वर्षाणि मन्यते, तेन स्पष्टं ज्ञातं भवति यत्- तत्कालेऽपि वास्तु, मूर्ति , चित्र, भाण्ड- निर्माणं च लौहवस्तु- रचना इत्यादि नैक प्रकारस्य भौतिक कलाः प्रसिद्धमासीत्,। [१]

(ऋग्वेद, २.४१.५) तथा′ ..... प्र याहि कल्याणीर्जाया सुरणं गृहे ते।′ (ऋग्वेद, ३.५.३.६) शतमश्मन्यीनां पुरामिन्द्रो व्यास्यत्।

अन्यदप्याह-

पर्वद्वयमङ्गुष्ठः शेषाङ्गुल्यस्त्रिभिस्त्रिभिः कार्याः।

नखपरिमाणं कार्यं सर्वासां पर्वणोऽर्धेन।।२८।।

अङ्गुष्ठः पर्वद्वयं कार्यः। शेषाः परिशिष्टा अङ्गुल्यस्त्रिभिस्त्रिभिः पर्वभिः कार्याः। सर्वासामङ्गुलीनां पर्वणोऽर्धेन नखपरिमाणं कार्यम्।।

एवमवयवलक्षणमभिधायाधुना स्वरूपप्रदर्शनार्थमाह-

देशानुरूपभूषणवेषालङ्कारमूर्तिभभिः कार्या।

प्रतिमा लक्षणयुक्ता सन्निहिता वृद्धिदा भवति।।२९।।

देशानुरूपैर्देशसदृशैर्भूषणैराभरणैर्हारकेयूरकटकादिभिः। वेषालङ्कारैः, शरीरालङ्कारैः। यस्मिन् देशे यादृशाः पुरुषाणां वेषास्तादृशैः, मूर्तिभिर्देहैः स्थूलसूक्ष्मावयवत्वेन देशानुरूपेणैव कार्या। यतः प्रतिमा लक्षणैः शास्त्रोक्तैर्युक्ता सन्निहिता सर्वकालं वृद्धिदा भवति, कर्तुर्वृद्धिं ददाति। तथा च काश्यपः-

भिषग्व्रह्मा सुन्वन्तम्......।। **(ऋग्वेद, ९.११२.१, यजुर्वेद, १९.१६)** , इत्यादि वैदिकयुगे प्रसिद्धं कलाः असीत्।**(ऋग्वेद, २.४१.५)** तथा′ ..... प्र याहि कल्याणीर्जाया सुरणं गृहे ते।′ तेषां वास्तुकला अपि सम्मिलितमासित् यथा- राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्त्रस्थूण आसाते।।′(ऋग्वेद , ८.२२.३), तथा द्रष्टव्य- ऋग्वेद, ७.५.३, ७.५६.१६, ८.२६.१७, आदि स्थानेषु वास्तुकलायाः प्रमाणं प्राप्यते।

अधुना प्रतिमानां विशेषलक्षणमाह-

दशरथतनयो रामो बलिश्च वैरोचनिः शतं विशंम्।

द्वाददशहन्या शेषाः प्रवरसमन्यूनपरिमाणाः।।३०।।

१. स्वतन्त्रकलाशास्त्र, भाग-२, पृ-७

दशरथतनयो दशरथपुत्रो रामः, वैरोचर्विरोचनपुत्रश्च बलिः। शतं विंशं विशंत्यधिकमङ्गुलशतं कार्यमित्यर्थः। शेषा अन्याः प्रतिमा द्वादशहान्या द्वादशकद्वादशकहीनत्वेन प्रवरसन्यूनपरिमाणा भवन्ति। विंशत्यधिकादङ्गुलशताद् द्वादशाङ्गुलान्यपास्याष्टाधिकं शतमङ्गुलानां प्रतिमा प्रधाना भवति। ततोऽपि द्वादशकमपास्य षण्णवत्यङ्गुलसमा मध्यमा भवति। ततोऽपि द्वादशकमपास्य चतुरशीत्यङ्गुला न्युनपरिमाणा प्रतिभा भवति। "स्वैरङ्गुलप्रमाणैर्द्वादशविस्तीर्णमायतं च मुखम" इत्येनन न्यायेन या प्रतिमोक्ता साष्टाङ्गुलं शतमधिकं भवति, यदत्रोक्तम्- दशरथतनयो रामो बलिश्च वैरोचनिः शतं विंशम् इत्यस्मिन् द्वादशानाम-ङ्गलानामधिकानां तैरधिकेन परिमाणः कार्यः सर्वावयवानाम्। एवं हीनत्वेऽप्युनपात एवेत्यनुक्तं ज्ञायत इति।।

हरेर्हरस्य धातुर्वा तद्देवीनामनेकथा।

आधारासनसंयुक्तं स्थानं गर्भगृह मतम्।।[1]

अधुना भगवतो विष्णोः स्वरूपकथनमाह-

अतसीकुसुमश्यामः पीताम्बरनिवसनः प्रसन्नमुखः।

कुण्डलकिरीटधारी पीनगलोरस्थलांसभुजः।।३१, ३२।।

द्विभुजस्य तु शान्तिको दक्षिणहरस्तोऽपरश्च शङ्खधरः।

एवं विष्णोः प्रतिमा कर्तव्या भूतिमिच्छद्भिः।।३३,३४,३५।।

कार्योऽष्टभुजो भगवानिति। भगवान् विष्णुर्नारायणोऽष्टभुजोऽष्टहस्तः कार्यः, चतुर्भुजो द्विभुज एव वा कार्यः। श्रीवत्साङ्कितवक्षाः। श्रीवत्सेन रोमावर्तेनाङ्कित् चिह्नितं वक्ष उरो यस्य, तथा कौस्तुभाख्येन मणिना भूषितमलङ्कृतमुरो वक्षो यस्य।

अतसीकुसुमवदतसीपुष्पवत् श्यामः। पीतान्यम्बराणि वसनं परिधानं यस्य। प्रसन्नमुखः सौम्यवदनः। कुण्डलं कर्णाभरणं किरीटं मुकुटं तद्धारणं शीलमस्य। पीनः पीवरो गलः कण्ठो यस्य। मांसल इत्यर्थः। तथा पीनोरः स्थलः। पीनांसः पीनस्कन्धः। पीनभुजः पीनबाहुः।

दक्षिणतो दक्षिणभागे अष्टभुजस्य ये चत्वारः पाणयो हस्तास्तेष्वेकस्मिन् खड्गो नन्दकः। द्वितीये गदा कौमोदकी। तृतीये शरः। चतुर्थे शान्तिदः द्रष्टुरभिमुख ऊर्ध्वाङ्गुलिःशान्तिदः करः। वामकरेषु वामहस्तेषु च कार्मुकं धनुः शार्ङ्गम्। खेटकं फरः। चक्रं सुदर्शनम्। शङ्खश्च पाञ्चजन्यः।

१. विश्वकर्मवास्तुशास्त्रम् , अ. ७३.१

अथशब्दो विकल्पे। तुशब्दो विशेषद्योतकः। यदि चतुर्भुजं कर्तुमिच्छति तदा दक्षिणपार्श्वे भुजद्वये एकः शान्तिदः करः। द्वितीयो गदाधरः। वामपार्श्वे भुजद्वये एकस्मिन् शङ्खो द्वितीये चक्रम्।

द्विभुजस्य विष्णोर्दक्षिणहस्तः शान्तिदः। अपरो वामः शङ्खधरः। एवमनेन प्रकारेण भूतिमि-च्छद्भिः समृद्धिमभिलषद्भिर्विष्णोर्नारायणस्य प्रणिमाऽर्चा कार्या।।

संछत्रा (चा ? शा) पि यस्य स्यात् तद् गर्भगृहमुच्यते।[1]

हलधरस्य लक्षणमाह-

बलदेवो हलपाणिर्मदविभ्रमलोचनश्च कर्तव्यः।

बिभ्रत् कुण्डलमेकं शङ्खेन्दुमृणालगौरतनुः।।३६।।

बलदेवो हलधरो हलपाणिर्लाङ्गुलहस्तः। मदविभ्रमलोचनो मदिरापानेन यो मदस्तेन विभ्रमे चलिते लोचने नयने यस्य स तथाभूतः कर्तव्यः। एवं कुण्डलं कर्णाभरणं विभ्रद् धारयन्। शङ्खेन्दु-मृणालगौरतनुंः शङ्खः प्रसिद्धः, इन्दुश्चन्द्रः। मृणालो विसम् तद्वद्गौरी श्वेता तनुर्यस्य स तथाभूतः।।

अथैकानंशाया लक्षणमाह-

एकानंशा कार्या देवी बलदेवकृष्णयोर्मध्ये।

कटिसंस्थितवामकरा सरोजमितरेण चोद्वहती।।३७।।

वामेऽथाष्टभुजायाः कमण्डलुश्चापमम्बुजं शास्त्रम्।

वरशरदर्पणयुक्ताः सव्यभुजाः साक्षसूत्राश्च।।३८, ३९।।

एकानंशेति। बलदेवकृष्णयोर्हलधरवासुदेवयोर्मध्ये अन्तरे एकानंशाभिधानां देवी वता कार्या विधेया। कीदृशी? कटिसंस्थितवामकरा कटिसंस्थितो वामकरो वामहस्तो यस्याः। इतरेण दक्षिणे सरोजं पद्ममुद्वहती धारयन्ती कार्या इति।

अथ चतुर्भुजा क्रियते तदा तस्या वामकरयोरेकस्मिन् पुस्तकं द्वितीये कमलं पद्मम्। दक्षिणभागे द्वयोः करयोरेकस्मिन्नर्थिषु वरदो द्वितीयेऽक्षसूत्रम्। उत्तानोऽधोऽङ्गुलिर्हस्तो वरदः।

वामेऽथाष्टभुजाया इति। अथाऽष्टभुजा क्रियते तदा तस्य वामहस्तचतुष्के एकस्मिन् कमण्डलूः। द्वितीय चापं धनुः। तृतीये अम्बुज् पद्मम्। चतुर्थे शास्त्रं पुस्तकम्। सव्ये दक्षिणभागे कौ हस्तो वरदः। द्वितीये शरः। तृतीये दर्णणमादर्शः। चतुर्थे अक्षसूत्रमिति।।

---

१. समराङ्गणसूत्रधारः, अ-२२.२०

शाम्बप्रद्युम्नलक्षणमाह–

साम्बश्च गदाहस्तः प्रद्युम्नश्चापभृत् सुरूपश्च।

अनयोः स्त्रियौ च कार्ये खेटकनिस्त्रिंशधारिण्यौ।।४०।।

शाम्बो द्विभुजो गदाहस्तश्च कार्यः। प्रद्युम्नः कामदेवश्चापभृद्धनुः शरहस्तः। सुरूपः शोभनरूपश्च। अनयोर्द्वयोः साम्बप्रद्युम्नयोः स्त्रियौ कार्ये। कीदृश्यो? खेटकनिस्त्रिंशधारिण्यौ, खेटकः फरः, निस्त्रिंशः खड्गः, तौ धारायन्त्यौ।।

ब्रह्मणः कुमारस्य च लक्षणमाह–

ब्रह्मा कमण्डलुकरश्चतुर्मुखः पङ्कजासनस्थश्च।

स्कन्दः कुमाररूपः शक्तिधरो बर्हिकेतुश्च।।४१।।

ब्रह्मा पितामहः कमण्डलुकरः कमण्डलुहस्तश्चतुर्मुखश्चतुर्वक्त्रश्च, पङ्कजासनस्थश्च पङ्कजासने पद्मासने स्थितः। स्कन्दः कार्तिकेयः कुमाररूपो बालरूपः। शक्तिधरः शक्तिमायुधविशेषं धारयति। बर्हिकेतुमूयूरध्वजः।।

अथेन्द्रलक्षणमाह–

शुक्लश्चतुर्विषाणो द्विपो महेन्द्रस्य वज्रपाणित्वम्।

तिर्यग् ललाटसंस्थं तृतीयमपि लोचनं चिह्नम्।।४२।।

महेन्द्रस्य द्विपो हस्ती ऐरावताख्यः शुक्लः श्वेतवर्णः। चतुर्विषाणश्चतुर्दन्तः स च कार्यः। वज्रपाणित्वं वज्रमायुधविशेषः कुलिशाख्यः स पाणौ यस्य स वज्रपाणिस्तस्य भावो वज्रपाणित्वम्। तृतीयं लोचनं नेत्र तिर्यग् ललाटसंस्थं तिर्यक् कृत्वा ललाटे स्थितं चिह्नमपि कार्यम्।।

भगवतो महेश्वरस्य लक्षणमाह–

शम्भो शिरसीन्दुकला वृषध्वजोऽक्षि च तृतीयमपि चोर्ध्वम्।

शूलं धनुः पिनाकं वामार्धे वा गिरिसुतार्धम्।।४३।।

शम्भोर्महेश्वरस्य शिरसि मूर्धनि कला चन्द्रकला कार्या। वृषध्वजः वृषो दान्तः स एव ध्वजः चिह्नं यस्य। ऊर्ध्वमूर्ध्वस्थितं तृतीयमपि अक्षि नेत्रं कार्यम्। शूलं त्रिशूलमेकस्मिन् हस्ते। धनुः चापं तदेव पिनाकसंज्ञमन्यस्मिन्। गिरिसुता गौरी वामेऽर्धे वा कार्या। अर्ध गौरीश्वर इत्यर्थः।।

बुद्धस्य लक्षणमाह-

पद्माङ्कितकरचरणः प्रसन्नमूर्तिः सुनीचकेशश्च।

पद्मासनोपविष्टः पितेव जगतो भवति बुद्धः।।४४।।

बुद्धः पद्माङ्कितकरचरणः कार्यः। करौ हस्तौ चरणौ पादौ पद्मेन कमलेनाङ्कितौ चिह्नितौ कृताभी रेखाभिरित्यर्थः। प्रसन्नमूर्तिः सौम्यदेहः प्रसादपरः। सुनीचकेशश्च सुनीचा अत्यल्पाः केशा मूर्धजा यस्य। केचित् सुनीतकेशश्चेति पठन्ति। सुनीता अतिनियमिताः। पद्मासने कमलासने उपविष्टः स्थितः। पितेव जगतः, जगतो विश्वस्य पितेक जनक इति। क्षान्तिशील इत्यर्थः।।

अथार्हतां देवस्य लक्षमणाह-

आजानुलम्बबाहुः श्रीवत्साङ्कः प्रशान्तमूर्तिश्च।

दिग्वासास्तरूणो रूपवांश्च कार्योऽर्हतां देवः।।४५।।

अर्हतां देवो जिन आजानुलम्बबाहुः कार्यः। जानुसम्प्राप्तहस्तः। श्रीवत्साङ्कः श्रीवत्समङ्कः चिह्नविशेषो यस्य सः। प्रशान्तमूर्तिर्जितेन्द्रियो रागद्वेषरहितः। दिग्वासाः नग्नः। तरुणो यौवनोपेतः। रूपवान् सुशोभनवपुः।

भगवतो भास्करस्य लक्षणमाह-

नासाललाटजङ्घोरुगण्डवक्षांसि चोन्नतानि रवेः।

कुर्याद्वदीच्यवेषं गूढं पादादूरो यावत्।।४।।

कमलोदरद्युतिमुखः कञ्चुकगुप्तः स्मितप्रसन्नमुखः।

रत्नोज्ज्वप्रभामण्डलश्च कर्तुः शुभकरोऽर्कः।।४८, ४८।।

नासाललाटेति। रवेरादित्यस्य नासा नासिका, ललाटं मुखाग्रम, जङ्घे ऊरु, गण्डो मुखगण्डः, वक्ष उरः प्रदेशः- एतान्युन्नतानि उच्चानि। उदीच्यवेषमुत्तरपथवेषं कुर्यात्। उदग्वेषमित्यर्थः। पादात् प्रभृत्युरो वक्षो यावत्। गूढं चोलकगुप्तम्।

बिभ्राण इति। स्वकररुहै स्वनखे बाहुभ्यां पङ्कजे कमले बिभ्राणः। सहजनखस्य करे लग्नत्वात् सपत्रभागस्य बाहोर्नालत्वाच्च कमले बिभ्राणः। मुकुटधारी मुकुटं मौलिंतं च धारयति। कुण्डलभूषितवदनः, कुण्डलाभ्यां कर्णाभरणाभ्यां भूषितमलङ्कृतं वदनं मुखं यस्य। प्रलम्बोऽतिदीर्घो हारो मुक्ताहारो यस्य। वियद्ग सारसनं तेन वृतः संयुक्तः।

कमलं पद्मं तस्योदमभ्यन्तरं तद्वद्द्युतिः, कान्तिर्मुखे वदने यस्य। कञ्चुकः प्रसिद्धस्तेन गुप्त आच्छादितः। स्मितं हसितं प्रसन्नं सौम्यमतिशोभनं मुखं वक्त्रं यस्य। रत्नैर्मणिविशेषैरुज्ज्वलो दीप्यमानः प्रभामण्डलः कान्तिसमूहो यस्य। एवंविधोऽर्क आदित्यः कर्तुः शुभकरः श्रेयः प्रदः।।

अथार्कमुद्दिश्य सर्वप्रतिमानां शुभाशुभमाह-

नृपभयमव्यङ्गायां हीनाङ्गायामकल्यता कर्तुः।

शातोदर्यां क्षुद्भयमर्थविनाशः कृशाङ्गायाम्।।४९, ५०।।

अन्धत्वमूर्ध्वदृष्टया करोति चिन्तामधोमुखी दृष्टिः।

सर्वप्रतिमास्वेयं शुभाशुभं भास्करोक्तसमम्।।५१, ५२।।

सौम्या नु हस्तमात्रेति। हस्तमात्रा हस्तप्रमाणा दीर्घा प्रतिमा सौम्या शुभावहा भवति। हस्तद्वयोच्छ्रिता वसुदा धनप्रदा भवति। या त्रिचतुर्हस्तप्रमाणा सा यथासङ्ख्यं क्षेमसुभिक्षाय भवेत्। त्रिहस्ता क्षेमाय चतुर्हस्ता सुभिक्षाय भवेत् स्यात्।

नृपभयमिति। अत्यङ्गयामिति। स्थूलावयवायां नृपभयं राजभयं भवति। हीनाङ्गायां प्रमाणहीना-वयवायां कर्तुरकल्यता अनारोग्यम्। शातोदर्या तनूदरायां क्षुद्भयं भवति। कृशाङ्गायां दुर्बलावयवायामर्थ-विनाशो वित्तक्षयः।

सक्षतायां क्षतसंयुक्तायां प्रतिमायां कर्तुः शस्त्रनिपातेन मणं निर्दिशेद्वदेत। वामे वामभागे अवनता प्रतिमा कर्तुः पत्नी भार्यां हिनस्ति मारयति, दक्षिणे विनता आयुर्जीवितं हिनस्ति मारयति। आयुषः क्षयं करोति। अन्धत्वमूर्ध्वदृष्टया प्रतिमा नेत्रनाशं करोति। अधोमुखी दृष्टिश्चिन्तां शोकं करोति। एवं भास्करोक्तसमं सूर्यकथिततुल्य शुभाशुभं सर्वासु प्रतिमास्वन्यासु ज्ञेयं ज्ञातव्यम्।।

अधुना लिङ्गस्य लक्षणमाह-

लिङ्गस्य वृत्तपरिधिं दैर्घ्येणासूत्र्य तत्त्रिधा विभजेत्।

मूले तच्चतुरस्त्रं मध्ये त्वष्टाश्रिं वृत्तमतः।।५३।।

चतुरस्त्रमवनिखाते मध्यं कार्य तु पिण्डिकाश्वभ्रे।

दृश्योच्छ्रायेण समा समन्ततः पिण्डिका श्वभ्रात।।५४।।

लिङ्गस्य वृत्तभागे यः परिणाहस्तं सूत्रेण परिच्छिद्य तत् सूत्रं दैर्ध्येण दीर्घत्वेन आसूत्र्य मित्वा तत्प्रमाणं काष्ठं मणिं वा कृत्वा त्रिधा विभजेत् भागत्रयं कुर्यात्। ततो लिङ्गस्य मूले योऽसौ त्रिभागस्तं चतुरस्त्रं कार्यम्। मध्ये यस्तमष्टाश्रिं कुर्यात्। अतः परं यस्तृतीयभागस्तं वृतं परिवर्तुलं कुर्यात्।

तत्र चतुरस्त्रं यद्भागं तदवनिखाते भूजाते कार्यं क्षेप्यम्। मध्य् यदष्टाश्रि तत् पिण्डिकाश्वभ्रे पीठगर्ते क्षिपेत्। श्वभ्रात् पीठविवरात् समन्ततः सर्वासु दिक्षु पीठिका दृश्योच्छ्रायेण समा कार्या। दृश्यभागस्य परिवर्तुलस्य लभ्यो य उच्छ्रायस्तत्समः। एतदुक्तं भवति- यावत्प्रमाणं वृत्तभागस्य दैर्घ्यं तावत्प्रमाणं समन्ततः पीठिकापृथुत्वं कार्यमिति।।

अन्यद्विशेषलक्षणमाह-

कृशदीर्घं देशघ्नं पार्श्वविहीनं पुरस्य नाशाय।

यस्य क्षतं भवेद् मस्तके विनाशाय तल्लिङ्गम्।।५५।

यल्लिङ्गं कृशं दुर्बलं दीर्घमभ्युच्छ्रितं तद्देशघ्नं देशं हन्ति। यत् पार्श्वाभ्यां विहीनं तत् पुरस्य नगरस्य नाशाय भवीत। यस्य मस्तके मूर्धनि क्षतं छिद्रं भवेत् स्यात् तल्लिङ्गं विनाशाय भर्तुरेव भवति।।५५।।

मातृगण एवं तस्य लक्षणमाह-

मातृगणः कर्तव्यः स्वनामदेवानुरूपकृतचिह्नः।

रेवन्तोऽश्वारूढो मृगयाक्रीडादिपरिवारः।।५६।।

मातृगणो मातृसमूहः स्वनामदेवानुरूपकृतचिह्नः कर्तव्यः। स्वनामा यो देवस्तदनुरूपं तादृकं कृतं चिह्नं लक्षणं यस्य। यथा ब्रह्मणो यल्लिङ्गम् ब्रह्मकमण्डलुकरश्चतुर्मुखः पङ्कजासनस्थश्च इति ब्राह्मी कार्या। कार्योऽष्टभुजो भगवान इति वैष्णवी। शम्भोः शिरसीन्दुकला इति रौद्रयः कार्याः। स्कन्दः कुमाररूपः इति कौमार्यः। शुक्लश्चतुर्विषाणो द्विपो महेन्द्रस्य वज्रपाणित्वम् इत्यैन्द्र्यः। दण्डी यमो महिषगः इति याम्यः। हंसारूढः पाशभृद्वरुणः इति वारुण्यः। नरवाहनः कुबेर इति कौबेर्यः। एवमन्यासां नारसिंहिवारा-हिवैनायकीनामप्यूह्यम् किन्तु तासां स्तनशोभा मध्यक्षामता नितम्बवैपुल्यं कार्यम् येन प्रकारेण स्त्रीरूपस्य शोभा जायत इति। रेवन्तोऽर्कतनयोऽश्वारूढः कार्यः। अश्वस्तुरगः तत्रारूढ-स्तदुपरि स्थित इत्यर्थः। तथा मृगया

मृगवधस्तत्क्रीडादिपरिवार इति। यः परिवारः स मृगयायुक्तः क्रीडायुक्तः। आदिग्रहणादश्ववाहने तत्परीक्षणं तदन्वेषणादि।

यमवरुणकुबेरलक्षणमाह–

दण्डी यमो महिषगो हंसारूढश्च पाशभृद्वरुणः।

नरवाहनः कुबेरो वामकिरीटी बृहत्कुक्षिः।।५७।।

यमः प्रेतपतिर्दण्डी दण्डहस्तो महिषारुढश्च कार्यः। वरुणोऽपाम्पतिः, हंसारूढः हंसः पक्षी तस्मिन्नारूढस्तस्योपरि स्थितः, पाशभूत पाशहस्तः कार्यः। कुबेरो वैश्रवणो नरवाहनो मनुष्यारूढः। खरवाहन इति केचित् पठन्ति वामकिरीटी वामभागे किरीटी मुकुटं यस्य। बृहत्कुक्षिर्विस्तीर्णकुक्षिः कार्यः। अत्र प्रणिमालक्षणं देवनां देवतानां यल्लक्षणंमाचार्येणोक्तं तेषां लोकप्रसिद्धा यथा यथा शरीरशोभा भवति, तथा तथोक्तवत्प्रतिमा कार्या लक्षणज्ञौः, स्वैरङ्गुलप्रमाणैरित्यादि यदुक्तं तत्सर्वं कार्यमिति। तथा च काश्यपः– **बृ.सं., पृ–१५४**

५. वनसम्प्रवेशाध्यायः

तत्रादावेव विधानमाह-

कर्तुरनुकूलदिवसे दैवज्ञविशोधिते शुभनिमित्ते।

मङ्गलशकुनैः प्रास्थानिकैश्च वनसम्प्रवेशः स्यात्।।१।।

कर्तुः प्रतिमाकर्तुः। अनुकूलदिवसे उपचयकर्तुर्ग्रहस्य दिने निरूपहते नक्षत्रे च। दैवज्ञविशोधिते शुभनिमित्ते, दैवज्ञेन कालविदा यच्च विशोधितं दत्तं शुभनिमित्तं शकुनं सुमुहूर्तादिकं च तस्मिन्। प्रास्थानिकैर्मङ्गलशकुनैः, प्रस्थाने भवाः प्रास्थानिकाः प्रस्थाने यात्रायां यानि मङ्गलशकुनानि उक्तानि तैः। सिद्धार्थकादर्शपयोऽञ्जनानौत्यादिकानि मङ्गलानि। श्रेष्ठे हयसिते प्राच्यामित्यादिकाः शकुनाः। एतैः प्रास्थानिकैर्मङ्गलशकुनैर्वनसम्प्रवेशः स्याद् भवेत्। वनेवृक्षबहुले देशे प्रवेशेः प्रतिमाकाष्ठार्थं कार्य इति। सूत्रधार मण्डनस्य मतानुसारं गृहे, देवालये, राजप्रसादे वा उद्याने निरुपिताः वृक्षाः लक्षणयुक्ताः अशुभवृक्षाः भवन्ति।।

वृक्षाः क्षीरसकण्टकाश्च फलिनस्त्याज्या गृहाद्दूरतः

शस्ते चम्पकपाटले च कदली जाती तथा केतकी।[1]

अत्र च वर्जनीयन् वृक्षानाह-

पितृवनमार्गसुरालयवल्मीकोद्यानतापसाश्रमजाः।

चैत्यसरित्सङ्गमसम्भवाश्च घटतोयसिक्ताश्च।।२।।

कुब्जानुजातवल्लीनिपीडिता वज्रमारूतोपहताः।

स्वपतितहस्तिनिपीडितशुष्काग्निप्लुष्टमधुनिलयाः।।३।।

तरवो वर्जवितव्याः शुभदाः स्युः स्निग्धपत्रकुसुमफलाः।

अभिमतवृक्षं गत्वा कुर्यात् पूजां सबलिपुष्पाम्।।४।।

एवंविधास्तरवो वृक्षा वर्जयितव्याः। कीदृशाः? पितृवनं श्मशानम्, मार्गः पन्थाः सुरालयं देवगृहम् , वल्मीको वल्मीककृतो मृत्स्तूपः, उद्यानमुपवनम्, तापसाश्रमस्तपोवनम् एतेषु ये जाता उत्पन्ना वृक्षाः, तथा चैत्यः प्रधानवृक्षः , सरितो नद्यस्तासां सङ्गमो मेलकस्तत्र येषां वृक्षाणां सम्भव उत्पत्तिः, तथा घटतोयेन कलशजलेन सिक्ताः सेचिता ये वृक्षाः, तेषां स्वयं रोपितत्वादच्छेदार्हत्वाम्।

१. राजवल्लभवास्तुशास्त्रम् , (जुगनू), अ.१.२८

कुब्जोऽस्पष्टः, अनुजातो वृक्षस्य अनु पश्चादन्यो यो वृक्षो जात उत्पन्नस्तेन योगेन पीडितः। ये च वृक्षा वल्लीभिर्निपीडिताः, वज्रमशनिर्मारुतो वायुस्ताभ्यां ये चोपहता भग्नाः, यश्च स्वपतितः, स्वयमेव पतितः, हस्तिना गजेन निपीडितो यो भग्नः , शुष्को विगतरसः, अग्निप्लुष्टोऽग्निना दग्धः, मधुनिलयो मधुमाक्षिकाणामाश्रयः।

एवमेते यथोक्तास्तरवो वर्ज्याः। अन्ये परिशिष्टा वृक्षाः शुभदाः। ते च स्निग्धपत्राः स्निग्धकुसुमाः सस्नेहपुष्पाः स्निग्धफलाश्च शुभदा एव। ततोऽभिमतमभीष्टं वृक्षं तरुं गत्वा आसाद्य तस्य सबलिपुष्पां बलिभिरुपहारैः पुष्पैः कुसुमैः सहितां पूजामर्चां कुर्यात्।।

वर्णानुक्रमेण वृक्षानाह-

सुरदारुचन्दनशमीमधूकतरवः शुभा द्विजातीनाम्।

क्षत्रस्यारिष्टाश्वत्थखदिरबिल्वा विवृद्धिकराः।।५।।

वैश्यानां जीवकसदिरसिन्धुकस्यन्दनाश्च शुभफलदाः।

तिन्दुककेसरसर्जार्जुनाम्रशालाश्च शूद्राणाम्।।६।।

सुरदारुर्देवदारुः। चन्दनं मलयजम्। शमी प्रसिद्धा। मधूको वृक्षः प्रसिद्धः। एते तरवो वृक्षाः प्रतिमार्थं देवविग्रहार्थं च द्विजातीनां ब्राह्मणानां शुभदाः। अरिष्टः, अश्वत्थ, खदिरो बिल्वश्चैते सर्व एव वृक्षविशेषो : क्षत्रस्य क्षत्रियजातेर्विवृद्धिकराः।

जीवकः, खदिरः, सिन्धुकः, स्यन्दन- एते वृक्षविशेषो वैश्यानां शुभफलदाः। तिन्दुकः, केसरः, सर्जः, अर्जुनः, आम्रः, शालः- एते वृक्षाः शूद्राणां शुभदाः। तथा च काश्यपः- **बृ.सं., पृ-१५७**

अत्रैव विशेषमाह-

लिङ्गं वा प्रतिमा वा द्रुमवत् स्थाप्या यथा दिशं यस्मात्।

तस्माच्चिह्नयितव्या दिशो द्रुमस्योर्ध्वमथवाधः।।७।।

लिङ्गं शिवलिङ्गं वा प्रतिमार्चा वा यस्माद् द्रुमवद्वृक्षवद्यथा दिशं स्थाप्याः। अयमर्थः- द्रुमस्य यः पूर्वाभिमुखो भागः स एव प्रतिमायाः पूर्वभागः कार्यः। एवं दक्षिणो दक्षिणः, पश्चिमः पश्चिमः, उत्तरभाग एव कार्यः। वृक्षस्य योऽधो भागः स एव प्रतिमाया अधोभागः कार्यः, वृक्षस्य य ऊर्ध्वभागः सोऽपि प्रतिमाया ऊर्ध्वभागः कार्यः। तस्माद्धेतोर्द्रुमस्य वृक्षस्य दिश आशाश्चिह्नयितव्याः। एवमूर्ध्वाधरी भागावपि चिह्नयितव्यौ। तथा च काश्यपः- **बृ.सं., पृ-१५८**

वृक्षच्छेदनविधानमाह-

परमान्नमोदकौदनदधिपललोल्लेपिकादिभिर्भक्ष्यैः।

मद्यैः कुसुमैर्धूपैर्गन्धैश्च तरूं समभ्यर्च्य।।८।।

सुरपितृपिशाचराक्षसभुजगासुरगणविनायकाद्यानाम्।

कृत्वा रात्रौ पूजां वृक्षं संस्पृश्य च ब्रूयात्।।९।।

परमान्नं पायसम्, मोदका लड्डुकाः, ओदनं भक्तम्, दधि क्षीरविकारः, पललमर्धनिष्पीडिता-स्तिलाः, उल्लोपिकाः, प्रसिद्धाः। आदिग्रहणाद् बहुभिर्भक्ष्यप्रकारैरपूपप्रभूतिभिर्लेह्यपेयचोष्यैः मद्यैः, कुसुमैः, पुष्पैः, धूपैर्गन्धैः, सुगन्धद्रव्यैश्च तरुं वृक्षं समभ्यर्च्य सम्पूज्य।

सुरा देवाः, पितरो देवयोनयः, पिशाचा देवयोनस एव, राक्षसा नक्तञ्चराः पिशिताशिनः, भुजगाः, पन्नगाः, असुरा दैत्याः , गणाः, प्रमथाः, विनायका विघ्नाः, आदिग्रहणाद् भूतप्रेतसिद्धविद्याधरागन्धर्वाः। एतेषां रात्रौ निशि पूजामर्चां कृत्वा विधाय वृक्षं तरुं पाणिना संस्पृश्य च इमं मन्त्रं ब्रूयाद् वदेत्।।

किं तदित्याह-

अर्चार्थममुकस्य त्वं देवस्य परिकल्पितः।

नमस्ते वृक्ष पूजेयं विधिवत् सम्प्रगृह्यताम्।।१०।।

यानीह भूतानि वसन्ति तानि बलिं गृहीत्वा विधिवत् प्रयुक्तम्।

अन्यत्र वासं परिकल्पयन्तु क्षमन्तु तान्यद्य नमोऽस्तु तेभ्यः।।११।।

हे वृक्ष ! अमुकस्य अमुकनाम्नो देवस्य सुरस्यार्चार्थं पूजार्थं परिकल्पितो व्यवस्थापितः, नमस्ते तव नमस्कारं भवतु। इयं पूजा मयोपनीता विधिवद्विधानेन सम्प्रगृह्यताम्।

इहास्मिन वृक्षोयानि भूतानि वसन्ति व्यवस्थितानि तान्यमुं बलिमुपहारं विधिवद्विधानेन प्रयुक्तमुपनीतं गृहीत्वा सङ्गृह्य अन्यत्रान्यस्मिन् वृक्षे वासं गृहं परिकल्पयन्तु व्यवस्थापयन्तु। तानि भूतान्यद्य क्षमन्तु क्षातिं कुर्वन्तु। तेभ्यो भूतेभयो नमोऽस्तु नमस्कारो भववतु।

ततः किं कुर्यादित्याह-

वृक्षं प्रभाते सलिलेन सिक्त्वा पूर्वोत्तरस्यां दिशि सन्निकृत्य।

मध्वाज्यदिग्धेन कुठारकेण प्रदक्षिणं शेषमतो निहन्यात्।।१२।।

प्रभाते प्रभातकाले वृक्षं तरुं सलिलेनोदकेन सिक्त्वा संसिज्य कुठारकेण परशुना मध्वाज्यदिग्धेन मधुना माक्षिकेणाज्येन घृतेन दिग्धेनोपलिप्तेन प्रथमं पूर्वोत्तरस्यामैशान्यां सन्निकृत्य छित्वा ततः शेषं प्रदक्षिणेन पूर्वाग्नेययाम्यनैर्ऋतपश्चिमवायव्योत्तरासु दिक्षु निहन्यात् छिन्द्यात्।।

पतितस्य तरोर्लक्षणमाह-

पूर्वेण पूर्वोत्तरतोऽथवोदक् पतेद्यदा वृद्धिकरस्तदा स्यात्।

आग्नेयकोणात् क्रमशोऽग्निदाहरुग्रागरोगास्तुरगक्षयश्च।।१३।।

पूर्वेण पूर्वस्यां दिशि, अथवा पूवोत्तरत ऐशान्याम्, उदगुत्तरस्या दिशि, यदा पतेत, तदा वृद्धिकरः स्याद् भवेत्। आग्नेयकोणात् प्रभृति क्रमेण यदा पतति, तदैतानि गर्गेण फलानि उक्तानि। तद्यथा- आग्नेयकोणे यदि पतति, तदा अग्निदाहो भवति, दक्षिणे रुजो रोगा भवन्ति, नैर्ऋते रोगा भवन्ति, पश्चिमायां रोगा एव, वायव्ये तुरगक्षयोऽश्वविनाशः।।

अत्र यन्नोक्तं तदत्रोह्यमित्याह-

यन्नोक्तमस्मिन् वनसम्प्रवेशे निपातविच्छेदनवृक्षगर्भाः।

इन्द्रध्वजे वास्तुनि च प्रदिष्टाः पूर्वं मया तेऽत्र तथैव योज्याः।।१४।।

अस्मिन्निह वनसम्प्रवेशे यन्नोक्तं यन्न कथितम्। किं तत्? निपातविच्छेदनवृक्षगर्भाः, निपातः पतनं वृक्षस्य। यथा-

विच्छेदनं यथा-

परशोर्जर्जरशब्दो नेष्टाः स्निग्धो घनश्च हितः।। इति।।

तथा वृक्षगर्भः- पीते तु मण्डले निर्दिशेत्तरोर्मध्यगां गोधाम् इत्यादि। एते निपातविच्छेदन-वृक्षगर्भाः। ते मया पूर्वमादाविन्द्रध्वजे वास्तुनि च ये वास्तुविद्याया प्रदिष्टा उक्तास्ते चात्रास्मिन् वनसम्प्रवेशे तथैव तेनैव प्रकारेण योज्या योजनीया इति।।

६. प्रतिमाप्रतिष्ठापनाध्यायः

तत्रादावेवाधिवासने मण्डपस्य लक्षणमाह-

दिशि याम्यायां कुर्यादधिवासनमण्डपं बुधः ग्राग्वा।
तोरणचतुष्टययुतं शस्तद्रुमपल्लवच्छन्नम्।।१।।

पूर्वे भागे चित्राः स्त्रजः पताकाश्च मण्डपस्योक्ताः।
आग्नेप्या दिशि रक्ताः कृष्णाः स्युर्याम्यनैर्ऋत्योः।।२।।

श्वेता दिश्यपरस्यां वायव्यायां तु पाणडूरा एव।
चित्राश्चोतरपार्श्वे पीताः पूर्वोत्तरे कार्याः।।३।।

बुधः पण्डितो याम्यायां दक्षिणस्यां प्राक् पूर्वस्यां वा अधिवासनमण्डपं कुर्यात्। अधिवासनं संस्कारविशेषः। केचित् सौम्यायामिति पठन्ति। सौम्यायामुत्तरस्याम्। कीदृशं मण्डपं तोरणचतुष्टययुतं चुतर्दिशं चतुर्भिस्तोरणैर्युक्तम्, शस्तानां प्रशस्तानां द्रुमाणां याज्ञिकानां पल्लवैः पत्रैश्वन्नमाच्छादितं कुर्यात्।

मण्डपस्य पूर्वभागे पूर्वस्यां दिशि स्त्रजो मालाः पताकाश्च वैजयन्त्यश्चित्रा नानावर्णा उक्ताः कथिताः। आग्नेय्यां पूर्वदक्षिणस्यां दिशि स्त्रजः पताका रक्ता लोहिताः। याम्यां दक्षिणं नैर्ऋती दक्षिणपश्चिमा तयोर्याम्यनैर्ऋत्योः कृष्णा कृष्णवर्णाः।।

अपरस्यां पश्चिमायां दिशि श्वेताः शुक्लवर्णाः कार्याः। वायव्यायां पश्चिमोत्तरस्यां दिशि पाण्डुरा ईषच्छुक्लाः। एवमुत्तरपार्श्वे उत्तरस्यां दिशि चित्रा नानावर्णाः। पूर्वोत्तरे ऐशाने स्त्रजः पताकाश्च पीतवर्णाः कार्या इति।।

ततस्ते पाण्डवास्तत्र गत्वा कृष्णपुरोगमाः।
मण्डपाञ्चक्रिरे तदं वै पुरं स्वर्गवदच्युताः।।
ततः पुण्ये शिवे देशे शान्तिं कृत्वा महारथाः।
नगरं मापयामासुर्द्वैपायनपरोगमाः।।

सागप्रतिरूपाभि : परिखाभिरलङ्कृतम्।
प्राकारेण च सम्पन्नं दीर्धमावृत्य तिष्ठता।।

द्विपक्षगरुडप्रख्यैद्वारेर्घोरप्रदर्शनै :।

गुप्तमत्र्यच्चय प्रखैगोपुरैर्मन्दरोपमैः।।[१]

प्राचीन भारते नगर-ग्राम-भवन- दुर्गादीनां निवेशनं सुनियोजितरुपेण भवति स्म। महाभारते इन्द्रप्रस्थनगरस्य योजना तस्य स्थापनाय पूर्व सिद्धं जामिति विवरणं प्राप्यते।

द्वारकामावृतां रम्यां सुकृतां विश्वकर्मणा।[२]

स्थपतेश्चाज्ञया सर्वे सूत्रग्राह्यादयाः सदा।।[३]

स्थापत्यादिचतुर्वर्णाः शिल्पिनः परिकीर्तितः।।[४]

भवन्ति शिल्पिनो लोके चतुर्धा स्वस्वकर्मभिः।

स्थपति : सूत्रग्राही च वर्धविकस्तक्षकस्तथा।

प्रसिद्धदेशसङ्कीर्णजातिजोऽभीष्टलक्षणः।।[५]

अमात्सर्योऽनसूसश्चातन्द्रितस्त्वभिजातवान्।

गणितज्ञः पुराणज्ञः सत्यवादी जितेन्द्रियः।।

चित्रज्ञः सर्वदेशज्ञश्चान्नदश्चाप्यलुब्धकः।

अरोगी चाप्रमादी च सप्तव्यसनवर्जितः।।[६]

प्रत्युत्पन्नमतिर्यः स्याद् वाहतः (कः) स्थपतिस्तथा।

कर्मकाले न मुह्येत् स प्रज्ञानेनोपबृंहितः।।

अप्रज्ञेयं दुरालोकं गूढार्यं बहुविस्तरम्।

प्रज्ञापोतं समारुह्य प्राज्ञो वास्तुनिरं (सिन्धु!) तरेत्।।[७]

शीलवान् पूजितो लोके शीलवान् साधुसम्मतः।

शीलवान सर्वकर्मार्हः शीलवान् प्रियदर्शनः।।[८]

---

१. महाभारत, आदिपर्व, १९९.२७-३१
२. महाभारत, सभापर्व, ५७.३
३. मानसार, २.१४
४. मानसार, २.१५
५. मयमतम्, अ.५.१३ १४
६. मानसार, २.१२-१३
७. समराङ्गणसूत्रधारः (जूगनु), अ.४४.१४-१५
८. समराङ्गणसूत्रधारः (जुगनू), अ.४४.१४-१७

ज्ञानवांश्च तथा वाग्मी कर्मस्वपि च निष्ठितः।
एवं युक्तोऽपि न श्रेयान् यदि शीलविवर्जितः।।[1]

शीलाधाने परं यत्नमाधि (ति) ष्ठेत् स्थपतिः सदा।
ततः कर्माणि सिद्धयन्ति जनयन्ति शुभानि च।।[2]

सुनामा दृढबन्धुश्च..........।[3]

वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः।
दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्तितः।।[4]

जानीयात् स्थापनार्हं स्थपतिम्।[5]

ग्रामादिकं वा नृगृहादिकं वा वाप्यादिकं वा विबुधालयं वा।
यः कर्तुमिच्छत्यथ संवृतं ते न स्यादगुरुशिल्पिरेतदर्थम (?)।।
विप्रः कुलीनः कृतसंस्द्रिद्वयौधः ? स्वाधीतवेदागमतत्त्ववेत्ता।
वर्णाश्रमाचार परोऽधिदीक्षो दक्षस्तपस्वी गुरुरास्तिकोऽस्तु।।[6]

अधुना प्रतिमायाः प्रविभागेन फलमाह-

आयुः श्रीबलजयदा दारुमयी मृन्मयी तथा प्रतिमा।
लोकहिताय मणिमयी सौवर्णी पुष्टिदा भवति।।४।।
रजतमयी कीर्तिकरी प्रजाविवृद्धिं करोति ताम्रमयी।
भूलाभं तु महानतं शैली प्रतिमाथवा लिङ्गम्।।५।।

प्रतिमा दारुमयी काष्ठानिर्मिता तथा मुण्यमी पार्थिवी आयुजीवितम् श्रियं लक्ष्मीम् बलं वीर्यम्, जयं विजयं च ददाति। मणियमी रत्ननिर्मिता प्रतिमा लोकानां जनानां हिताय भवति। सौवर्णी काञ्चननिर्मिता पुष्टिदा शरीरपुष्टिं ददाति।

---

१. समराङ्गणसूत्रधारः (समराङ्गणसूत्रधारः (जूगनु), अ.४४.१४-१५
२. समराङ्गणसूत्रधारः (जुगनू), अ.४४.१४-१८
३. समराङ्गणसूत्रधारः (जुगनू), अ.४४.१४-१९
४. वास्तुविद्या, ५.१५
५. मानसारः, २.१४
६. मानसारः, २.१६

रजतमयी रौप्यनिर्मिता कीर्तिं यशः करोति। ताम्रमयी प्रजानां पुत्रादीनां विवृद्धिं करोति। शैली शिलायमी प्रतिमार्चाऽथवा लिङ्गं शैलं शिलामयं महान्तमतिप्रभूतं भूलाभं करोति। तथा च काश्यपः- **बृ.सं., पृ-१६२**

पुनरपि विशेषमाह-

शङ्कूपहता प्रतिमा प्रधानपुरुषं कुलं च घातयति।

श्वभ्रोपहता रोगानुपद्रवांश्च क्षयं कुरुते।।६।।

शङ्कुस्तिर्यग् निर्गतः कीलकः। अङ्ग इति प्रसिद्धो लोके। तेनोपहता प्रतिमार्चा प्रधानपुरुषं नायकं कुलं वंशं च घातयति, श्वभ्रं गर्तस्तेनोपहता प्रतिमा रोगान् गदानुपद्रवान् दोषानं क्षयं च करोति। तथा च काश्यपः- **बृ.सं., पृ-१६२**

अथाधिवासनलक्षणमाह-

मण्डपमध्ये स्थण्डिलमुपलिप्यास्तीर्य सिकतयाथ कुशैः।

भद्रासनकृतशीर्षोपधानपादानं न्यसेत् प्रतिमाम्।।७।।

अधिवासनमण्डपस्य मध्येऽन्तः स्थण्डिलं भूभागमुपलिप्य ततः सिकतया बालुकया कुशैर्दर्भैश्चास्तीर्य। अथशब्दोऽत्र चार्थे। आस्तरणामाच्छादनं वालुकां प्रसार्यं तदुपरि दर्भैराच्छादनं कुर्यात्। तत्र प्रतिमां भद्रासनकृतशीर्षोपधानपादां न्यसेत्, भद्रासनं राजासनं तत्र कृतशीर्षां स्थितमस्तकां तथोपधानपादामुपधानं शीर्षोपधानं तत्र कृतपादां न्यसेत्।।

अन्यद्विधानमाह-

प्लक्षाश्वत्थोदुम्बरशिरीषवटसम्भवैः कषायजलैः।

मङ्गल्यसंज्ञिताभिः सर्वौषधिभिः कुशाद्याभिः।।८।।

द्विपवृक्षभोद्धतपर्वतवल्मीकसरित्समागमतटेषु।

पद्मसरः सु च मुद्भिः सपञ्चगव्यैश्च तीर्थजलैः।।९।।

पूर्वशिरस्कां स्नातां सुवर्णरत्नाम्बुभिश्च ससुगन्धैः।

नानातुर्यनिनादैः पुण्याहैर्वेदनिर्घोषैः।।१०।।

प्लक्षः, अश्वत्थः, उदुम्बर, शिरीषः, वट- एते सर्व एव वृक्षविशेषाः। एषां सम्भवैः कषायजलैरे-तत्पलवक्वथितपानीयैः, तथा मङ्गल्यसंज्ञिताभिः सर्वौषधिभिः। मङ्गल्यसंज्ञिताः प्रशस्तानाम्न्यो याश्चौषध्यः। यथा- जया, जयन्ती, जीवन्ती , जीवपुत्री, पुनर्नवा, विष्णुक्रान्ता

अभया, विश्वम्भरी, महामोदा, सहदेवी, पूर्णकोशा, शतावरी, सहस्त्रवीर्या लक्ष्मणा चेति, ताभिः, तथा कुशाद्याभिः, कुशा दर्भाः, आद्याः प्रथमा यासामोषधीनां ताः कुशाद्याः। आदि ग्रहणाच्छाद्वलाङ्कुरा ज्ञेयाः। एताभिरौषधिभिः।

द्विपो हस्ती, तेनोद्धता या मृत् वृषभो दान्तस्तेनोद्धता या मृत् , पर्वतमृत्, वल्मीकमृत्, सरिन्नदी द्वयोर्द्वयोर्नद्योर्यत्र समागमः संयोगो मेकलस्तत्र तटेषु या मृत्, पद्मसरः, सु च मृद्भिः पद्मैः कमलैः, संयुक्तानि यानि च सरांसि , तेषु या मृदस्ताभिः, तीर्थजलैः पुण्यतीर्थजलैः, सपञ्चगव्यैः, पञ्चगव्यसहितैः, गोमयम्, गोमूत्रम्, क्षीरम्, दधि, सर्पि, कुशोदकमिति।

एतैः प्रागुक्तैः प्रतिमां स्नाताम्, तथा ससुगन्धैः शोभनगन्धसंयुक्तै, सुवर्णरत्नाम्बुभिः सुवर्णरत्नगर्भतोयैः स्नातां कुतस्नातां पूर्वशिरस्कां पूर्वस्यां दिशि शिरः कृत्वा न्यसेत् स्थापयेत, तथा नानाविधानां तूर्याणां निनादैः, शब्दैः, सह तथा पुण्याहैः पुण्याहशब्दैर्वेदनिर्घोषै-र्वेदपदोद्गारैश्च सह।।

ततः किं कुर्यादित्याह-

ऐन्द्रंया दिशीन्द्रलिङ्गा मन्त्राः प्राग्दक्षिणेऽग्निलिङ्गाश्च।

वक्तव्या द्विजमुख्यैः पूज्यास्ते दक्षिणाभिश्च।।११।।

ऐन्द्रयां पूर्वस्यां दिशीन्द्रलिङ्गा मन्त्रा इन्द्रदैवत्या ऐन्द्रा मन्त्रा द्विजमुख्यैर्ब्राह्मणश्रेष्ठैर्वक्तव्याः पाठनीयाः। केचित् जप्तव्याः, इति पठन्ति। तथा प्राग्दक्षिणे आग्नेप्या दिशि। अग्निलिङ्गा अग्निदैवत्या मन्त्रा वक्तव्याः। ते च द्विजमुखा दक्षिणाभिः पूज्या अर्च्याः।।

स्थपतिस्तु स्वतुर्येभ्यस्त्रीभ्यो गुरुरिति स्मृतः।[1]

ततः किं कुर्यादित्याह-

यो देवः संस्थाप्यस्तन्मन्त्रैश्चानलं द्विजो जुहुयात्।

अग्निनिमित्तानि मया प्रोक्तानीन्द्रध्वजोत्थाने।।१२।।

धूमाकुलोऽपसव्यो मुहुर्महुर्विस्फुलिङ्गकृन्न शुभः।

होतुः स्मृतिलोपो वा प्रसर्पणं चाशुभं प्रोक्तम्।।१३।।

---

१. मस्त्यपुराणम् , २१५.४०

यो देवः संस्थाप्यः प्रतिष्ठापनीयः, तन्मन्त्रैस्तद्दैवत्यैविकैर्मन्त्रैर्द्विजो ब्राह्मणोऽनलमग्निं जुहुयात्। मया अग्निनिमित्तानि अग्निलक्षणानि इन्द्रध्वजोत्थाने उक्तानि कथितानि। स्वाहावसानसमये स्वय-मुज्ज्वलार्चिः, इत्यादि। अग्निर्धूमाकुलो धूमेनाकुलीकृतः सधूमः। अपसव्यो वामावर्तः। मुहुर्मुहुः, मुहुर्मुहुरिति शब्दं करोति। विस्फुलिङ्गकृद्विस्फुलिङ्गं करोति मुञ्चति, तथाविधो न शुभः। अथवा होतुः पुरोहितस्य स्मृतिलोपो विस्मृतिर्भवति, प्रसर्पणं च पश्चाद् गमनमशुभमनिष्ट प्रोक्तं कथितम्।।

स्थापनाधिपतिर्यस्मात्तस्मात्स्थयतिरुच्यते।[1]

ततः किं कुर्यादित्याह-

स्नातामभुक्तवस्त्रां स्वलङ्कृतां पूजितां कुसुमगन्धैः।

प्रतिमां स्वास्तीर्णायां शय्यायां स्थापकः कुर्यात्।।१४।।

तां प्रतिमा स्नातां कृतस्नानाम्। अभुक्तवस्त्रामभिनववस्त्रप्रावृताम्। स्वलङ्कृतां शोभनैरलङ्करणै-रलंकृताम्। कुसुमैः पुष्पैः। गन्धैः सुगन्धद्रव्यैरगुरुप्रभृतिभिश्च पूजितामर्चिताम्। स्थापकः प्रतिष्ठापकः। स्वास्तीर्णायां शोभनास्तृतायां शय्यायां कुर्यात् स्थापयेदित्यर्थः।।

ततस्तयाः सुप्तायाः किं कुर्यादित्याहः

सुप्तां सगीतनृत्यैर्जागरणैः सम्यगेवमधिवास्य।

दैवज्ञसम्प्रदिष्टे काले संस्थापनं कुर्यात्।।१५।।

तां प्रतिमां सुप्तां सगीतनृत्यैर्गाननृत्यसहितैर्जागरणैरस्वापनिषेवर्णैः सम्यक् कृत्वैवमनेन कारेणैवा-धिवास्य ततो दैवज्ञेन कालविदा योऽसौ सम्प्रदिष्ट उक्तः कालः, उद्गयेन सितपक्ष इत्यनेन विधानेन तस्मिन् काले समये संस्थापनं प्रतिष्ठापनं कुर्यात्।

कथं प्रतिष्ठापयेदित्याह-

अभ्यर्च्य कुसुमवस्त्रानुलेपनैः शङ्खतूर्यनिर्घोषैः।

प्रादक्षिण्येन नयेदायतनस्य प्रयत्नेन।।१६।।

कृत्वा बलिंप्रभूतं सम्पूज्यं ब्राह्मणांश्च सभ्यांश्च।

दत्त्वा हिरण्यशकलं विनिक्षिपेत् पिण्डिकाश्वभ्रे।।१७।।

१. मानसारः, २.११

स्थापकदैवज्ञद्विजसभ्यस्थपतीन् विशेषतोऽभ्यर्च्य।

कल्याणानां भागी भवतीह परत्र च स्वर्गी।।१८।।

तां प्रतिमाम्। कुसुमैः पुष्पैः, वस्त्रैरम्बरैः अनुलेपनैः समालम्भनैर्गन्धैः अभ्यर्च्य सम्पूज्य। ततः शङ्खानां तूर्याणां निर्घोषैः शब्दैः। आयतनस्य प्रासादस्य प्रयत्नेन प्रादक्षिण्येन नयेत्। अधिवासनमण्डपा-न्निष्क्राम्य प्रादक्षिण्येन प्रासादस्य गर्भगृहं प्रवेशयेदित्यर्थः।

ततः प्रभूतं बहु बलिमुपहारं कृत्वा ब्राह्मणान् द्विजान् सभ्यान् सभागतांश्च जनान् सम्पूज्याभ्यर्च्य हिरण्यशकलं सुवर्णखण्डं पिण्डिकाश्वभ्रे पीठगर्ते दत्त्वा विनिक्षिप्य ततः प्रतिमां विनिक्षिपेद् न्यसेत्।

स्थापकः प्रतिष्ठापकः, दैवज्ञः, सांवत्सरः, द्विजा ब्राह्मणाः, सभ्याः सभागताः प्रधान पुरुषाः स्थपतिः वर्धकिः, एतान् विशेषतोऽभ्यर्च्य इहास्मिन् लोके कल्याणानां श्रेयसां भागी फलभाग्भवति, परत्र च परलोके स्वर्गीभवति। स्वर्गमधिवसतीत्यर्थः।।

प्रतिष्ठापनलक्षणमाह-

विष्णोर्भागवतान् भगांश्च सवितुः शम्भोः सभस्मद्विजान्

मातृणामपि मण्डलक्रमविदो विप्रान् विदुर्ब्रह्मणः।

शाक्यान् सर्वहितस्य शान्तमनसो नग्नान् जिनानां विदुर्ये

यं देवमुपाश्रिताः स्वविधिना तैस्तस्य कार्या क्रिया।।१९।।

विष्णोर्नारायणस्य भागवतान्, सवितुरादित्यस्य मगान् मगब्राह्मणान्, शम्भोर्महादेवस्य, द्विजान् ब्राह्मणान् भस्मसहितान् पाशुपतानित्यर्थः। मातृणां ब्राह्मयादीनाम्। मण्डलक्रमविदो ये मण्डलक्रमं पूजाक्रमं विदन्ति जानन्ति, तान् स्थापकान् विदुः। ब्रह्मणः पितामहस्य विप्रान् ब्राह्मणान् विदुः। सर्वहितस्य बुद्धस्य शान्तमनसो जितेन्द्रियस्य शाक्यान् रक्तपटान् विदुः। जिनानामर्हतां नग्नान् नग्नक्षपणकान् विदुः। ये नरां यं देवमुपाश्रिताः शरण्यं भक्तिभावेन प्राप्तास्तैर्नरैस्तस्य देवस्य स्वविधिना आत्मीयदर्शनोक्तेन विधानेन। पञ्चरात्रविधिना विष्णोः। सौरदर्शनविधानेन सवितुः। वातुलतन्त्रोक्तेनान्यत-तन्त्रोक्तेनान्यतन्त्रोविधिना वा शम्भोः। मातृणां स्वकल्पविहितविधानेन ब्राह्मणैर्वेदविहितकर्मणा बुद्धस्य पारमिताक्रमेण। अर्हतां तद्दर्शनविधिना क्रिया कार्या इति।।

प्रतिष्ठाकाललक्षणमाह-

उदगयने सितपक्षे शिशिरगभस्तौ च जीववर्गस्थे।

लग्ने स्थिरे स्थिरांशे सौम्यैर्धीधर्मकेन्द्रगतैः।।२०।।

पापैरुपचयसंस्थैर्ध्रुवमृदुहरितिष्यवायुदेवेषु।

विकुजे दिनेऽनुकूले देवानां स्थापनं शस्तम्।।२१।।

उदगयने उत्तरायणे मकरादिराशिषट्कस्थे रवौ। सितपक्षे शुक्लपक्षे। तथैवोत्तरायणे शुक्लपक्षे शिशिरगभस्तौ चन्द्रे। शिशिराः शीतला गभस्तयो रश्म्यो यस्य तस्मिन् जीववर्गस्थे बृहस्पतिवर्गस्थे। वर्गो गृहहोराद्रेष्काणनवांशद्वादशांशत्रिंशद्भाभाख्यः। तथा लग्ने स्थिरे वृषसिंहकुम्भानामन्यतमे, तथाऽन्यस्मिन् मिथुनकर्कटकन्यातुलधन्विमीनानामन्यतमे स्थिरनवांशकोदये। यतोऽन्यराशयोऽनेनैव प्रकारेणान्तरे निषिद्धः।

सद्वर्गे स्थिरभोदये च भवनं कार्यं प्रवेशोऽपि वा।।इति।।

सौम्यैर्बुधजीवशुक्रैर्धीधर्मकेन्द्रगतैः, धीस्थानं पञ्चम् , धर्मसथानं नवमम्, केन्द्राणि लग्नचतुर्थ-सप्तमदशमानि, एतेषामन्यतमस्थानस्थैः पापैरादित्याङ्गारकशनैश्चरैरुपचयसंस्थैः, त्रिषडेकादशदशमस्था-नानामन्यतमस्थानस्थैः। तथा ध्रुवमृदुहरितिष्यवायुदेवेषु नक्षत्रेषु। उत्तरात्रितयं रोहिणी चेति ध्रुवाणि। मृगशिरश्चित्रानुराधा चेति मृदूनि हरिः श्रवणः। तिस्यः। वायुदेवः स्वातिः। एतेषु नक्षत्रेषु। विकुजे अङ्गारकविवर्जिते दिने वासरे। रविशशिबुधगुरुसितासितानां दिने। तस्मिंश्चानुकुले कर्तुः शुभकरे देवानां सुराणां स्थापनं प्रतिष्ठापनं शोभनंमिति शस्तं शोभनमिति।।

तथा चाष्टविधं कर्म ज्ञेयं स्थपतिना सदा।

आलेख्यं लेख्यजातं च शिल्पं कर्म तथैव च।

पाषणसिद्धहेम्नां च शिल्पं कर्म तथैव च।

एभिर्गुणैः समायुक्तः स्थपतिर्याति पूज्यताम्।।[१]

एतत् प्रतिष्ठापनं सर्वदेवानां सामान्यं मया कृतमित्येतदाह-

सामान्यमिदं समासतो लोकानां हितदं मया कृतम्।

अधिवासनसन्निवेशने सावित्रे पृथगेव विस्तरात्।।२२।।

१. समराङ्गणसूत्रधारः (जूगनु), अ.४४.२०-२१

इदं प्रतिष्ठापनां समासतः संक्षेप्तःसामान्यविशेषं वैदिकेन विधानेन सर्वेषां जानानां हितमनुकूल-मनायासकरं मया कृतं रचितम्। सावित्रे शास्त्रे प्रत्येकस्य देवस्याधिवासनसन्निवेशने। अधिवासनं प्रतिष्ठापनं निवेशनं च ते पृथक्पृथग्विस्तराद्विस्तारेण तत्र भवतः। अथवा सावित्रे सवितुरादित्यस्य ये अधिवासनसन्निवेशने पृथगेव विस्तारात् तच्छास्त्रे सौरे भवति इति।।

भृगुरत्रीर्वशिष्टश्च विश्वकर्मा मयस्तथा।

नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः।।

ब्रह्मा कुमारन्न्दीशः शौनको गर्ग एव च।

वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती।।

अष्टादशैते विख्याताः शिल्पशास्त्रोपदेशकाः।।[१]

१. मत्स्यपुराणम् , अ.२५२.२-४